MANJUSHA 1952 G.K.V.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar
Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

11083

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111053

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R 40836

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

श्रीशिवः शरणम्

षष्ठ-वर्षे] [पष्ठाद्याः संख्याः

111053

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Paspasahnika practically concluded.

Vol. IV of the Mañjūṣā (396 pages) contains articles on सेविका vs. सेवका, विश्रम vs. विश्राम, पत्र vs. पत्त्र, भवतीप्रसादात् vs. भवत्प्रसादात् etc., discussions of various readings, articles on the Mahābhāṣya and Contamination in language, S'aṅkarācarya's Saccidānandānubhava pradīpikā, short stories, long stories, humorous skits etc. etc. Rs. 6-8 only.

Vol. V of the Mañjūṣā contains 300+32+32 pages including "The S'iva sūtras and the Sanskrit alphabet" "Mahābhāṣya" "Critical studies on the text of Sāyaṇa's commentary on the Rigveda" etc. etc. Rs. 6/8/-

Vol. VI (in progress) contains the Paspas'ā—Āhnika of the Mahābhāṣya (pp. 33-120), the sublime आनोभद्रीय hymn of Rigveda with six commentries, discussions on Grammar, articles on Kālidāsa, Bhavabhūti, Bhāravi, and other writers, long stories, short stories, humorous etc. etc.

If you have not yet become a subscriber, send in your subscription at once.

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Six only.

Foreign : Rupees Nine

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The Madhuravāṇi (Bagalcott) writes : [illegible] मञ्जूषायै। कलकत्तानगरतः शब्दाब्धिलब्धवैदग्ध्यस्य कवितावनितास्वयंवरवृतवरस्य पण्डितप्रवरस्य श्रीक्षितीशचन्द्रचट्टोपाध्यायस्य सम्पादकत्वे प्रतिमासं नियतमाविष्क्रियमाणा मञ्जूषानामिका पत्रिका शिञ्जानमञ्जरीमञ्जुलपदैः गीतगुञ्जस्वरैश्च रञ्जयति रसिकपुञ्जम्। क्वचित् महाभाष्य-शब्देन्दुशेखरादिगत-सूक्ष्मतम-विषयसमीक्षणसंरम्भेण महामहापण्डितपुण्डरीकाणामपि शिरःकण्डूतिम् उपजनयति। कदाचित् कुशलग्रामवृद्धेव सरसकथाकथनेन कौतुकमुत्पादयति। कुत्रचिच्च प्राचीन-सरस-सुन्दर-सुभाषितानाम् आंग्लानुवादान् प्रकटीकृत्य उपकरोति छात्रवृन्दम्। क्वचिदपि च वेदवेदान्तमन्त्रतन्त्रादीनां भावार्थादिकं जिज्ञासते। मध्ये मध्ये तनुतरविनोदिकथाभिः हास्यलहरीरपि उद्भावयति। तत्र तत्र च शब्दशक्तिप्रकाशेन शब्दशुद्धिविचारैः पुरातनसाहित्यप्रकटीकरणेन च भिन्नभिन्नरुचिमपि वाचककुलं सम्यगाराधयति। प्रायः सर्वत्र सुसरलतरा सुबोधा च अत्रत्या भाषा विदुषामिव विद्यार्थिनामपि सविशेषं परितोषं जनयति। 'पण्डिता च पतिव्रता' इति ख्यातायाः क्षमादेवीरावमहोदयायाः "परित्यक्ता" इति विचित्रा चैत्राङ्कगता चारुतमकथा चमत्कुरुते सचेतसां चेतांसि हृदयङ्गमया निरूपणभङ्ग्या। तस्मिन्नेव मञ्जूषायाः चैत्राङ्के 'शिवसूत्रस् एण्ड संस्कृत आल्फाबेट्' इति विचारप्रचुरः सम्पादकानाम् आंग्लभाषायां लिखितः विवेचनात्मकः लेखः सर्वेषामपि विपश्चिदपश्चिमानां प्रशंसापात्रं भवतीति निश्चप्रचम्। वयं तु सादरं संसूचयामः "यावच्छक्यं संकृतभाषायामेव लेखा लेखनीयाः" येन शुद्धसंस्कृतविदुषामपि उपयोगो भवेत्।

शिञ्जन्मञ्जीरमञ्जूक्तिगुञ्जितै रसिकरञ्जिनी।
क्षितीशकृतिमञ्जूषा केषामेषा न तोषदा॥

सुवर्णकांक्षिभिः सरवैर्थलुब्धैर्मनीषिभिः।
अलङ्कारप्रियैरेषा मञ्जूषा गृह्यतां रसात्॥

उत्कृष्टलेखरत्नानां मञ्जूषैषा विशोभते।
सर्वथा समुपादेया सर्वैः सहृदयैरपि॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111053

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

Feb.–May. 1952.	फाल्गुन-चैत्र-वैशाख-ज्यैष्ठानाम् षष्ठवर्षस्य षष्ठ्यादिसंख्याचतुष्टयम्	Vol. VI. Nos. 6–9.

श्रीमच्छङ्कराचार्यविरचितम्

महावाक्यसिद्धान्तस्तोत्रम् ।

क्षणं ब्रह्माऽहमस्मीति यः कुर्यादात्मचिन्तनम् ।
तन्महापातकं हन्ति तमः सूर्योदयो यथा ॥१॥
अज्ञानाद्बुद्बुदो जातो ह्याकाशो बुद्बुदोद्भवः ।
आकाशाद्वायुरुत्पन्नो वायोस्तेजस्ततः पयः ॥२॥
पयसः पृथिवी जाता ततो व्रीहियवादिकम् ।
पृथिव्यप्सु पयो वह्नौ वह्निर्वायौ नभस्यसौ ॥३
नभोऽप्यव्याकृते तच्च शुद्धे शुद्धोऽप्यहं ह ekhein, out'
अहं विष्णुरहं विष्णुरहं विष्णुरहं हरि
either hold him nor
कर्तृभोक्त्रादिकं सर्वं तदविद्योत्थमे
अच्युतोऽहमनन्तोऽहं गोविन्दोऽहम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्दोऽहमशेषोऽहमजोऽहममृतोऽस्म्यहम् ।
नित्योऽहं निर्विकारोऽहं निर्विकल्पोऽहमव्ययः ॥६॥
सच्चिदानन्दरूपोऽहं पञ्चकोशातिगोऽस्म्यहम् ।
अकर्ताऽहमभोक्ताऽहमसङ्गः परमेश्वरः ॥७॥
अहमेव परं ब्रह्म वासुदेवाख्यमव्ययम् ।
इति ध्यानाश्रितो मुक्तो बद्ध एवाऽन्यथा भवेत् ॥८॥
अन्योऽसावहमन्योऽस्मीत्युपास्ते योऽन्यदेवताम् ।
न स वेद नरो ब्रह्म स देवानां यथा पशुः ॥९॥
आत्मानं सततं ब्रह्म संभाव्य विचरन्ति ये ।
न तेषां दुष्कृतं किञ्चिद्दुष्कृतोत्था न चापदः ॥१०॥
ब्रह्मैवाऽहं न संसारी मुक्तोऽहमिति भावयेत् ।
अशक्नुवन् भावयितुं वाक्यमेतत्सदा जपेत् ॥११॥
एकमासं ध्यानयोगाद् ब्रह्महत्यां व्यपोहति ।
संवत्सरकृताभ्यासः सिद्धयष्टकमवाप्नुयात् ॥१२॥
यावज्जीवं सदाभ्यासाज्जीवन्मुक्तो न संशयः ।
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ॥१३॥
मयि सर्वं लयं याति तद्ब्रह्मोऽस्म्यहमद्वयम् ।
नाऽहं देही न मे देहः केवलोऽहं सनातनः ॥१४॥
एकमेवाऽद्वयं ब्रह्म नेह नानाऽस्ति किंचन ।
अयं प्रपञ्चो मिथ्यैव सत्यं ब्रह्माऽहमव्ययम् ॥
...प्रमाणं वेदानुभवा गुरुवचस्तथा ॥१५॥

...नार्यविरचितं महावाक्यसिद्धान्तस्तोत्रं संपूर्णम् ।

अलङ्...
उत्कृष्टले...
सर्वथा समुपा...

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आभाणकमालिका

1\. None so old that he hopes not for a year of life.

न खलु तथाविधः कोऽपि वृद्धोऽस्ति यो वर्षमेकं जीविष्यामीति नाशंसते। अतिवृद्धोऽप्यवरतो वर्षमेकं जीवितायाशंसते।

(Lat.) Nemo enim est tam senex, qui se annum non putet posse vivere.

"अहन्यहनि भूतानि गच्छन्ति यममन्दिरम्।
शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्यमतः परम्॥"

2\. Not God above
Gets all men's love.

न विष्णुरपि नाकस्थः सर्वेषां भक्तिभाजनम्।

Gr. Oude gar ho Zeus Outh' huo:n pantess' andanei outhanekho:n.

Lat. Jupiter neque pluens neque abstinens omnibus placet.

For not even Jupiter can please all, whether he rains or does not rain.

३। (व) सापेर छुँछो गेला, गिलतेओ पारे ना, ओगरातेओ पारे ना।

सपण छुछुन्दरगिलनम्। न प्रभवति निगरितुं न वोद्गरितुम्।

To hold a wolf by the ears.

Greek. To:n o:to:n ekho: ton lukon, out' ekhein, out' apheīnai dunamai.

I have got a wolf by the ears, I can neither hold him nor let him go.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपनिषदर्थ-विमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

बृहदारण्यकोपनिषदि [२।१।७] श्रूयते—"स होवाच गार्ग्यः—य एवायमग्नौ पुरुष एतमेवाहं ब्रह्मोपास इति। स होवाचाजातशत्रुः—मा मैतस्मिन् संवदिष्ठाः। विषासहिरिति वा अहमेतमुपास इति। स य एतमेवमुपास्ते विषासहिर्ह भवति। विषासहिर्हास्य प्रजा भवति" इति।

व्याख्यातञ्चेदं भगवत्पादैः—अग्नौ वाचि हृदि चैका देवता। तस्या विशेषणं—विषासहिर्मर्षयिता परेषाम्। इति। विशदीकृतं चैतदानन्दगिरिणा—यद्धविर्विष्यते क्षिप्यते तत्सर्वं भस्मीकरणेन सहते तेनाग्निर्विषासहिरिति।

अग्नेर्मर्षणं तु लोके न प्रसिद्धम्, औष्ण्यं तेजः प्रतापः—इत्यादय एवाग्नेर्वैशेषिका गुणाः। अत एव यस्तावद् बालकः क्षिप्रमेव क्रुध्यति स्वतेजश्च प्रकटयति स एव अग्निर्माणवक इत्युपवर्ण्यते। अतोऽत्र विषासहि-शब्दस्यार्थः अमर्षयिता परेषाम्, अभिभविता परेषामिति। निघण्टावपि सहःशब्दो बलनामसु पठितः।

संहितास्वन्तरान्तरा विषासहि-शब्द उपलभ्यते, सर्वत्रैव च तस्यार्थः अभिभविता वा अभिभवित्री वा। तथाहि ऋग्वेदे [१०।१५९।२] श्रूयते—

उदसौ सूर्यो अगादुदयं मामको भगः।
अहं तद्विद्वला पतिमभ्यसाक्षि विषासहिः॥ इति।

अत्र सायणाचार्यव्याख्यानम्—असौ द्युलोकस्थः सूर्यः उदगात् उदयं प्राप्तवान्। मामकः मदीयः भगः भजनीयः अयमिन्द्रश्च सूर्यात्म-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नोदगात्। यद्वा मामको भगः मदीयमिदं सौभाग्यमुदगात्। तत् उद्यतं सूर्यस्य तेजः विद्वला ज्ञातवती, यद्वा पतिं भर्तारं विद्वला लब्धवंती, अहं विषासहिः विशेषेणाभिभवित्री सती अभ्यसाक्षि अभ्यभूवम् सपत्नीरिति शेषः। सहतेरभिभवार्थस्य लुङ्येतद्रूपम्। यद्वा विषासहिः सपत्नीनामभिभवित्री सती पतिमभ्यसाक्षि भर्तारमभ्यभूवम्। यथा मय्येव वशीकृतश्चिरं वर्तेत* तथा कार्षमित्यर्थः।

मन्त्रोऽयमथर्ववेदे [१।२९।५] इत्थं श्रूयते—

उदसौ सूर्यो अगादुदिदं मामकं वचः।
यथाहं शत्रुहोऽसान्यसपत्नः सपत्नहा ॥

अत्र विस्पष्टमेव सपत्नहा (सपत्नानां शत्रूणां हन्ता) इति श्रूयते।

ऋग्वेदीये मन्त्रे 'अभ्यसाक्षि' इत्यत्र 'विषासहिः' इत्यत्र च सहधातुरुपलभ्यते—उभयत्र चाभिभवार्थकोऽयम्। पुनरपि ऋग्वेदे [१०।१६६।१] श्रूयते—

ऋषभं मां समानानां सपत्नानां विषासहिम्।
हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् ॥

इति। व्याख्याता चेयमृक् सायणाचार्यैः—

हे सपत्ननाशनाभिमानिन्निन्द्र मा मां समानानां सदृशानामस्मत्कुलीनानां मध्ये ऋषभम् ऋषभवत्प्रशस्तं कृधि कुरु। तथा सपत्नानां शत्रूणां विषासहिं विशेषेणाभिभवितारं कुरु। यऽस्मत्कुल

---

*यद्यपि मुद्रितेषु पुस्तकेषु वर्तत इति पाठो मूले दृश्यते, वर्तेत इति च क्वाचित्कः पाठः पादटीकायां सन्निवेशितः, तथापि वर्तेत इति पाठस्य समीचीनत्वे नास्ति संशयलेशोऽपि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव जाता अस्माकमनिष्टमाचरन्ति ते सपत्नाः। अपि च शत्रूणामन्येषामपि शातयितॄणां वैरिणां हन्तारं हिंसितारं कृधि कुरु। तथा विराजं विशेषेण राजमानं गोपतिं गोस्वामिनं च मां कुरु। न केवलमेकस्या एव गोः पतिम्, अपि तु सर्वासामित्याह गवाम् इति। इति।

पुनरपि ऋग्वेदे [१०।१७४।५] श्रूयते—

असपत्नः सपत्नहाभिराष्ट्रो विषासहिः।
यथाहमेषां भूतानां विराजानि जनस्य च॥

इति। अत्रापि सायणाचार्येण विषासहिः-पदस्य शत्रूणां विशेषेणाभिभवितेत्यर्थः कृतः। मन्त्रोऽयमथर्ववेदेऽपि श्रूयते। केवलं तत्र प्रथमः पादः—सपत्नक्षयणो वृषेति [१०।२९।६]। अथर्ववेदभाष्ये सविस्तरं व्याख्यानमुपलभ्यते—विषासहिः विविधं पुनः पुनः परेषां सोढा अभिभविता॥ षह अभिभवे। अस्माद् यङन्तात् "सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्यौ" इति किप्रत्ययः। अतोलोप-यलोपौ इति।

अत्रेदमवधेयम्। सासहि-विषये भाष्ये पक्षद्वयमवलोक्यते। आदृगमहनजनः किकिनौ लिट् च [३।१।५७२] इति सूत्रे प्रथमतो भाष्यकारेण कात्यायनीयं वार्त्तिकमुपनिबद्धम्—सासहि-वावहि-चाचलि-पापतीनां निपातनम् इति, व्याख्यातं च—सासहि-वावहि-चाचलि-पापतीनां निपातनं कर्तव्यम्। वृषा सहमानं सासहिः। वावहिः चाचलिः पापतिः इति। ततश्च भाष्यकृतान्यदीयं मतमुद्धृतम्—अपर आह सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्याविति। काशिकायामभ्यासदीर्घत्वानुरोधेन द्वैतीयीकमेव मतमुद्धृतम्।

रामायणमहाभारतादिष्वप्ययमर्थ उपलभ्यते, यथा—"परं विषहते यस्मात् तस्मात् पुरुष उच्यते" इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रसङ्गात् सहधातुविषये किञ्चिदुच्यते। वेदादिषु प्राचीनग्रन्थेष्वभिभवार्थकः सहतिरुपलभ्यते। ततश्च यदा बौद्धधर्मस्य प्रादुर्भावः सञ्जातस्तदा परकृतावज्ञानादीनां गजनिमीलिकयाऽवधीरणमर्थः सञ्जातः। ततश्च परकृतनिग्रहस्यागतिकतया सहनमित्यर्थः सञ्जातः।

विषासहि in the Bṛhadāraṇyakopaniṣad (ii. 1. 7) is explained in the S'āṅkarabhāṣya as मर्षयिता परेषाम्. Accordingly Swami Mādhavānanda translates it by 'forbearing.' Senart translates it by 'irresistible' which is much better. But we must not be content with a negative epithet. In the Vedas, the word is used in the sense of 'overpowering others' (अभिभविता परेषाम्). So we should translate: overpowering or overwhelming or all-powerful. The sentence quoted by Patañjali is very happy: वृषा सहमानं सासहिः The mighty one (lit. bull) overpowering him that overpowers i. e. victorious over all oppressors, the oppressor of the oppressor. The root *sah* is semantically very interesting. In the Vedas it is used in the sense of 'overpowering', then it meant 'to tolerate' and lastly it came to be used in the sense of 'to bear all affronts and indignities like a worm that never turns'.

Some later commentators have explained "prasahana" in Pāṇini's rule "adheh prasahane" i. 3. 33 as meaning toleration also !!! Vopadeva very rightly uses "s'aktau" for "prasahane".

सभासाह is explained as सभाया अभिभावकः by Sadgurus'iṣya in एष वै ब्राह्मणानां सभासाहः सखा यत् सोमो राजा AB. iii.2.

111053

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदार्थविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

ऋग्वेदस्य सप्तममण्डले श्रूयते—

या आपो दिव्या उत वा स्रवन्ति
खनित्रिमा उत वा याः स्वयंजाः।
समुद्रार्था याः शुचयः पावका-
स्ता आपो देवीरिह मामवन्तु ।।४९।२

इति। अत्र प्रथमे पादे पक्षद्वयम्, द्वितीयेऽपि पक्षद्वयमिति स्पष्टमेव। व्याख्यातञ्चेदं वेदचतुष्टय-भाष्यकृद्भिः—या आपो दिव्या अन्तरिक्षभवाः सन्ति। उत वा अपि च या आपः नद्यादिगताः सत्यः स्रवन्ति गच्छन्ति याश्च खनित्रिमाः खननेन निर्वृत्ताः। उत वा अपि च याः स्वयंजाः स्वयमेव प्रादुर्भवन्त्यः समुद्रार्थाः *। समुद्र एवार्थी गन्तव्यो यासां ताः समुद्रार्थाः। शुचयः दीप्तियुक्ताः पावकाः शोधयित्र्यश्च भवन्ति। ता आपो मामवन्त्विति।

पाश्चात्त्यैर्व्याख्यातृभिरत्र पक्षत्रितयमेव कक्षीक्रियते, खनित्रिमा इति पदं च स्रवन्तिपदेन कर्तृतया योज्यते। तथाहि तेषां भाषान्तरारोपणम्—

Waters which come from heaven, or those that wander dug from the earth, or flowing free by nature,

Bright, purifying, speeding to the Ocean, here let those Waters, Goddesses, protect me. GRIFFITH, *The Hymns of the Rigveda*, Vol. II, p. 51.

---

* बहुषु हस्तलिखितेषु पुस्तकेष्वत्र 'समुद्रार्थाः' नास्ति। यथास्माभिर्दृश्यते तथा द्वैतीयीकं समुद्रार्था इति पदं निष्कासनीयं वा, तस्य स्थाने तथाभूता इति वा पठनीयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The waters of the sky, the waters of the river, the waters of the wells; the bright and cleansing waters, whose goal is the sea—may these divine waters protect me. PETERSON, *Hymns from the Rigveda*, p. 320.

The Waters that come from heaven or that flow in channels or that arise spontaneously, that clear and purifying have the ocean as their goal: let those Waters, the goddesses, help me here. MACDONELL. *Vedic Reader*, p. 117.

May the Waters of the sky, may those that flow produced by digging, and those that spring of themselves, the clear and purifying divine Waters that flow to the Ocean, help me. THOMAS, *Vedic Hymns*, p. 91.

"प्रादे पादे समाप्यन्ते प्रायेणार्था अवान्तराः" इति वचनमतीव समीचीनम्। अत्र एव सति सम्भवे स्रवन्तिपदेन खनित्रिमाः–पदस्यान्वयो न स्वीकरणीयः। अत एव प्राच्यविदुषामेव व्याख्यात्रादरणीयेति प्रतिभाति।

अनेनैव न्यायेन भाष्यकृतां स्वयंजाः-पदस्य प्रादुर्भवन्त्यः इत्यर्थकल्पनमप्युद्वेजकं प्रेक्षावताम्।

कालिदासभवभूती

[स्वर्गतद्विजेन्द्रलालरायः]

(२)

द्वितीयोऽङ्कः

रामस्य पञ्चवटीवने प्रवेशः, शूद्रकस्य च शिरश्छेदः। रामेण जनस्थानदर्शनम्।

तृतीयोऽङ्कः

वासन्त्यास्तमसायाश्छायासीतायाश्च पुरतो रामस्य परिदेवनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अङ्कस्यास्य विष्कम्भके तमसा-मुरलयोः संवादाद्विज्ञायते रामेण हिरण्मयी सीताप्रतिकृतिं सहधर्मिणीं विधायानुष्ठितः क्रतुरश्वमेध इति।) वनवासावसाने प्रसववेदनया ग्लायन्ती सीता गङ्गागर्भे पातयामासात्मानम्। पृथ्वीभागीरथ्यौ च तां पातालं नीत्वा ररक्षतुः, तस्याश्च यमजौ कुशलवौ महर्षेः पाणावर्पयामासतुः।

चतुर्थोऽङ्कः

जनकस्यारुन्धत्याः कौशल्यायाश्च परिदेवनम्। लवेन साकं तेषां साक्षात्कारः।

पञ्चमोऽङ्कः

लव-चन्द्रकेत्वोर्युद्धम्।

षष्ठोऽङ्कः

विष्कम्भके विद्याधरविद्याधर्योः संवादेन युद्धस्य तस्योपवर्णनम्। लव-कुश-चन्द्रकेतुभिः साकं रामस्य साक्षात्कारः, कुशमुखाच्च वाल्मीकिविरचितरामायणगाथाश्रवणम्।

सप्तमोऽङ्कः

रामेण सीतानिर्वासनाभिनयदर्शनम्, रामेण साकं सीताया मेलनम्।

भवभूतिना मूलरामायणस्याख्यानं प्रायेण लेशतोऽपि न स्वीकृतम्। प्रथमतस्तावद् रामाणयस्य रामो वंशगौरवरक्षणार्थं व्याजेन सीतां वनवासाय प्रेरयामास; भवभूतेस्तु रामः प्रजानुरञ्जनव्रतं परिपालयन् विनैव व्याजं निर्वासितवान् जानकीम्। द्वितीयतः, विच्छिन्नशिरसा शम्बूकेन दिव्यमूर्तिपरिग्रहः, छायासीतया साकं रामस्य साक्षात्कारः, लवचन्द्रकेत्वोश्च युद्धं रामायणे नोपलभ्यन्ते। सर्वतोऽपि गुरुतरं वैलक्षण्यं—रामेण साकं सीतायाः पुनर्मेलनम्।

किमिति कविभ्यां मूलमुपाख्यानं ोक्तपूर्वेण प्रकारेण विकृतिं नीतमिति साम्प्रतं विचारपदवीमवतरति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालिदासस्तावच्छकुन्तलायास्तनयेन शकुन्तलादुष्यन्तयोर्मेलनं सङ्घटितवान्। अवसरेऽस्मिन् कुशलवयोः कथा कवेर्मनसि समुदितेति सम्भाव्यते। अयञ्च व्यतिक्रमः कवित्वानुरोधेन परिकल्पितः। मेलनगतं वैषम्यमपि तथाविधं कविकल्पितमेव। परं प्रधानं वैषम्यम्—अभिज्ञानमभिशापश्च तदुद्देश्येन न कल्पितम्। गरीयसाभिप्रायेण कविना तदवतारितम्।

अभिज्ञानस्यास्य दुर्वाससोऽभिशापस्य च शकुन्तला-नाटके सन्निवेशस्यैकं तावत् फलं सञ्जातं दुष्यन्तस्य कलङ्कमोचनमिति पश्यामः। यस्तावत् कालिदासेन स्वीयनाटकस्य नायको विहितः, मूलोपाख्यानेऽसौ लम्पटो नरपतिः। स हि बहुपत्नीकः, मधुमत्त इव मधुकरः पुष्पात् पुष्पं विचरति। स खलु सुन्दरकुसुमकलिकादर्शमेव तत्रोत्पतेदिति किमिवात्राश्चर्यकरम्। स च मुग्धाया बालिकायाः प्रकारान्तरेण धर्मनाशं विधाय पलायनं समाश्रयेदित्यपि सर्वथा स्वाभाविकमेव। ततश्च राजसभायां वान्तःपुरे वा लज्जाकरं तं व्यापारं नैव प्रकाशयेदित्यपि नैवास्वाभाविकम्। परं कालिदासो दुष्यन्तं धार्मिकप्रवरकर्तव्यपरायणनरपतिरूपेणाङ्कयितुं प्रयासमास्थितवान्। अत एव कालिदासो द्विस्तावत् तं कलङ्कान्मोचितवान्। प्रथमतो गान्धर्वविवाहेन, द्वितीयतश्च अभिज्ञानाभिशापाभ्याम्।

नाटकेऽस्मिन्नुपवर्णितस्य दुष्यन्तचरित्रस्य मानसाणुवीक्षणयन्त्रेण पर्यवेक्षणे सर्वथा रसिकपुरुषतयैवासौ प्रतिभाति। तस्य च कण्वाश्रम आतिथ्यस्वीकरणेन साकं वैखानसमुखनिःसृतस्य "दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य"ति वचनस्य कश्चन सम्पर्कविशेषो वर्तत इति कविनानुक्तमपि वाचकेन विज्ञायत एव। अनेन खल्वाकारान्तेन प्रातिपदिकेन समुद्दीपितो राज्ञः कौतूहलविशेषः। राज्ञा यत् प्रत्युक्तम्, भवतु तां द्रक्ष्यामि—न खलु तत् सर्वथा तटस्थतयेति विभाव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथाच सखीजन-समभिव्याहृतां शकुन्तलामाश्रमोद्याने सन्निरीक्ष्य तेन यच्चिन्तितम्—दूरीकृता: खलु गुणैरुद्यानलता वनलताभिस्तदपि न खलु सर्वथा कलाविदेव चिन्तितम्। तथा चेत् तर्हि तदनन्तरमेव "छायामाश्रित्य" निगूढसन्दर्शनस्य किं तावत् प्रयोजनमासीत्? यत्रैव मनसि पापं तत्रैव सङ्गोपनचौर्यम्। स खलु तस्कर इव निगूढ-मवस्थित: सखीत्रयस्य संवादेन का वा शकुन्तलेति यदा व्यजानात्, तदा रत्नमेवंविधम् "आश्रमधर्मे नियुङ्क्ते" इति कण्वमुनिं यद् "असाधुदर्शी"ति व्यपदिष्टवान्, न खलु तच्चित्ते करुणरससमुद्रेकस्य फलम्। तेन खलु पादपान्तरितेन तापसी बाला सन्दृश्यते विचिन्त्यते च—

इदमुपहितसूक्ष्मग्रन्थिना स्कन्धदेशे
स्तनयुगपरिणाहाच्छादिना बन्धनेन।
वपुरभिनवमस्या: पुष्यति स्वां न शोभां
कुसुममिव पिनद्धं पाण्डुपत्रोदरेण॥ इति।

अपि पश्यति भवान् वाचकमहाभाग क्व वा राज्ञ: प्रधानतो लक्ष्यम्। अनन्तरमेव सुविस्पष्टोक्ति:—"अभिलाषि मे मन:" इति। वाचकस्य सर्वे संशया: समुत्सारिता:।

परं विषमेऽस्मिन् सङ्कट दुष्यन्तं सुतरां रक्षितवान्कालिदास:। लालसया प्रदीप्तोऽपि नरपति: शकुन्तलया साकं स्वस्य परिणयव्यापार-मेव विचिन्तयति। स च शकुन्तलाया: प्रभवं भविष्यच्चाधिकृत्य पृच्छति च विचिन्तयति च—"सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्त:करण-प्रवृत्तय:" इति। ततश्च यदा तेन विज्ञातं—शकुन्तला मेनकाया गर्भसम्भवा विश्वामित्रस्य दुहिता, तदा तस्य मनस्तो महीयान् भारोऽपगत:, तेन च स्वगतमुक्तम्—आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र च कविना प्रदर्शितम्—कामं राजा कामुको न पुनरसौ लम्पटः। मानसेऽस्मिन् विप्लवे न खलु पर्यहीयतासौ मनुष्यत्वेन, नापि वा कामान्धोऽप्यसौ पर्यभ्रश्यत विवेकेन। काममसावुपोषिताभ्यां नयनाभ्यां शकुन्तलां निरीक्षते, काममसौ तापस्या बालायाः सन्दर्शनमात्रत एव तां स्वस्यैवोपभोग्यां सम्भावयति, तथापि शकुन्तलया साकमात्मनो विवाहमेवासौ विचिन्तयति। तदा विजानीमः,—यदेव भवतु, न खल्वसौ बालिकां भ्रष्टां विधाय पलायितुमीहते, सङ्कल्पश्चास्य साधुरेवेति।

नूनं कामकवयो विवाहव्यापारं नितान्तत एव गद्यमयं सम्भावयन्ति। दिव्ये प्रेम्णि विवाहस्तावदन्तराय इव। तेषां मतेन विवाहो नाम नितरामनावश्यक एवावकरः। न खलु काव्ये लेशतोऽप्यस्य स्थानं वर्तत इति तेऽभिप्रयन्ति।

Platonic love व्यापारे (मानसप्रेम्णि) विवाहो निष्प्रयोजनः, नात्र सन्देहस्यावकाशः। तस्य हि भविष्यदितिवृत्तं तत्रैव प्रेम्णि पर्यवसितमिति। परं यत्र शारीरं मेलनं तत्र विवाहविधिरपरिहार्य एव। विवाहाभावे मेलनमिदं पाशव-व्यापारमात्रे पर्यवस्येत्, प्रेमव्यापारश्च कर्तव्यताज्ञानविरहितायां कामसेवायां परिणमेत्। विवाहो बोधयति—न खलु मेलनमिदमद्यतनमेव, न खलु क्षणिकसम्भोगमात्रमिदम्। वर्तत एवास्य महत्यायतिः, मेलनमिदं समग्रस्य जीवनस्य व्यापारः। विवाहो बोधयति—नारी खलु न केवलं भोग्यैव परं सम्मानार्हा। विवाहो नाम गृहे सुखस्योत्सः, सन्तानस्य कल्याणनिदानम्, सामाजिकमङ्गलस्याभ्युपायः। न केवलं व्यक्तेरेव शान्तिः परं समग्रस्य समाजस्यैव शान्तिरस्यामायतते। विवाह एव कुत्सितं कामं सौन्दर्येण मण्डयति, उद्दामायाः प्रवृत्तेर्मुखे रश्मिं नियच्छति, विश्वसृष्टिं च स्वर्गाभिमुखे समाकर्षति। पशूनां मध्ये विवाहो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नास्ति, असभ्यजातीयानां मध्ये विवाहो नास्ति । विवाहः खलु फलं सभ्यतायाः । नायं कुसंस्कारः, न चायमवकरः, नापि वा विपत्तिः ।

अपि तावत् काव्ये विवाहस्यावकाशो नास्ति ? किं तर्हि काव्ये उच्छृङ्खलकामसेवनस्य, नग्नमूर्तिसन्दर्शनेनोद्दीपितलालसायाः समुत्तेजनस्य, पाशव-संयोगसम्भूतस्य क्षणिकस्य चोन्मादस्यैवावकाशो वर्तते ? विवाहव्याजेनापि काव्येष्वमीषां व्यतिकराणां वर्णनं न्यक्कारजनकम् । सर्वेष्वेव महाकाव्येषु बीभत्सोऽयं व्यापारो गम्यमान एवावतिष्ठते । केवलं भारतचन्द्र इव कामकवयस्तस्योपवर्णनेन परममानन्दमभिविन्दन्ति । अन्तरेणापि विवाहं व्यापारस्यास्योपवर्णनं व्याधिग्रस्तस्य मस्तिष्कस्य विकार एव ।

महाभारतकारोऽपि विवाहमिमं काव्येऽपरिहार्यं विवेचितवान् । न खल्वसौ पाशवं सङ्गममुपवर्णितवान् । कालिदासश्च महाकविरेवासीत् । तेन दृष्टम्—कर्तव्यताज्ञानविरहिता लालसा नैव शोभना, कुत्सितैव सा । न खल्वसौ कुत्सितमङ्कयितुं प्रवृत्तः, सुन्दरमेवाङ्कयितुं प्रवृत्तोऽसौ । अत एव तेनाप्यत्र विवाहोऽपरिहार्योऽमन्यत । चन्द्रमा रम्यः, गगनं रम्यम्, कुसुमं रम्यम्, निर्झरिणी रम्या, नार्या आकर्णविश्रान्तं नयनयगलं रम्यं सरसश्च रक्तोऽधरो रम्यः । परं मनुजस्यान्तःकरणगतरम्यतायाः पुरतो रम्यत्वमिदं म्लानिमापद्यते । भक्ति-स्नेह-त्याग-कृतज्ञता-प्रभृतीनां स्वर्गीय-सुषमायाः पुरस्तान्नार्याः सुवृत्तौ बाहू स्फीतं च वक्षः व्रीडामेवानुभवन्ति । किं वास्ति रम्यतरं कर्तव्यताज्ञानात् ? कर्तव्यताज्ञानमिदं लालसामप्युद्भासयति, बीभत्समपि कामं सौन्दर्येण विमण्डयति । विवाहं वर्जयित्वा लालसा चेद्वर्ण्यते, नैव वर्णनं तद्रम्यं भवति, कुत्सितमेव भवति । यत् कामिनां परितोषायैव तद् भवति, तत्र बीजं न खलु तेषां रम्यत्वं परं तेषां कामोद्दीपकत्वम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थलान्तरेऽपि कविना दुष्यन्तोऽतिमात्रं परिरक्षितः। यदा तावद् राजधानीं प्राप्तो राजा शकुन्तलां विस्मृतवान्, तदा हेलयैव तेन पत्नी प्रत्याख्याता। कामुको जनः, विशेषतश्च बहुपत्नीकः सर्वथैवमेव विदधाति। परं कविरभिज्ञानेनाभिशापेन च दुष्यन्तं रक्षितवान्। गमनावसरे शकुन्तलायै यत् स्वनामाङ्कितमङ्गुरीयकं प्रदत्तं ततो विज्ञायते दुष्यन्तः शकुन्तलां तदात्व एव धर्मपत्नीत्वेनाभ्युपगतवान्। अभिशापतश्चास्माद् विज्ञायते न खलु राज्ञो विस्मृतिरियं लम्पटस्य विस्मृतिः, दैवकृतैवैषा, नात्र राज्ञः किमपि स्वातन्त्र्यमासीत्। किं बहुना, धर्मभयमेव शकुन्तलायाः प्रत्याख्यानस्य कारणमिति कविना प्रदर्शितम्। विषयोऽयं कविनत्थं नाटके सम्प्रवेशितः। चतुर्थेऽङ्के विरहविधुरा शकुन्तला दुष्यन्तस्य चिन्तायां निमग्नासीत्। दुर्वाससा समागत्योक्तम् "अयमहं भोः" इति। न खल्विदं प्राविशच्छ्रवणविवरमन्यमनस्कायाः शकुन्तलायाः। अनन्तरमेवानसूयया श्रुतं—दुर्वासाः शपति

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव॥ इति।

अनसूययावलोकितं महर्षिर्दुर्वासाः शकुन्तलां शप्त्वा प्रस्थित इति। सा द्रुतं समुपगत्य महर्षेः पादयोर्निपत्योक्तवती, बालेति वीक्ष्य मृष्यतामपराधो नः प्रियसख्या इति। अन्ततश्च प्रसादमुपगतेन दुर्वाससोक्तम्—कस्याप्याभरणस्याभिज्ञानरूपेण सन्दर्शनेन राज्ञः स्मृतिरुन्मिषेत् इति। ततश्च शकुन्तलायाः पतिगृहगमनावसरे अनसूया वा प्रियंवदा वा नैव न्यवेदयच्छापवृत्तान्तं शकुन्तलायै। गमनसमये स्वत एव समुद्विग्नायाः शकुन्तलाया मनस्यलमाशङ्कासमुत्पादनेनेति विमृश्य गोपित एव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्वृत्तान्त एताभ्याम्। केवलं गच्छन्त्यै शकुन्तलायै दुष्यन्तदत्त-मङ्गुरीयकं प्रदर्श्योक्तम्, यदि तावद्राजर्षिः प्रत्यभिज्ञानमन्थरो भवेत्, अभिज्ञानमिदं तस्मै प्रदर्शनीयमिति।

इदमेवाभिज्ञानं मूलं शकुन्तलानाटकस्य। परमन्तरेणापि दुर्वाससः शापमभिज्ञानवृत्तान्त आमूलान्तं नाटकेन समवदिष्यत, केवलं दुष्यन्तस्य धर्मदारपरित्यागिलम्पटरूपेण चित्रणमावश्यक-मभविष्यत्।

भवभूतिरपि सकृद्रामस्य रक्षणायैवंविधं कौशलमवलम्बितवान्। वाल्मीके रामः स्वकुलगौरवपरिरक्षणार्थं कैतवेन पतिप्राणां सीतां निर्वासितवान्। भवभूतिना दृष्टं तावता रामस्य चरित्रमाबिलं भवतीति। सर्वत्रैव न्यायविचारः परमो धर्मो नृपतीनाम्। तस्य सविधे—एकत्र समग्रं विश्वमपरत्र च न्यायविचारः। प्रध्वंसतां कुलम्, प्रध्वंसतां राज्यम्, न खलु कदापि निरपराधां दण्डयिष्यामि—तस्य मानसेन भावेनेदृशेनैव भवितव्यम्। कुलगौरवसंरक्षणं दुहितुश्च पात्र प्रदानं धर्म एव। परं ततोऽप्युच्चतरो धर्मो न्याय्यो विचारः। जानात्येव रामः—सीता निरपराधेति। यस्तावन्नरपतिः स्वकुलगौरवपरिरक्षणार्थं निरपराधां निर्वासयति न खलु लेशतोऽपि तस्य वंशगौरवं भवति परिरक्षितं स खलु सपरिजनो निर्वंश एव सम्पद्यते। भवभूतिना दृष्टम्—न खल्वनेन रामेण कार्यं मे सेत्स्यतीति। अत एवाष्टावक्रस्य पुरतो रामेण प्रतिज्ञापितवान्—

स्नेहं दयां तथा सौख्यं यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा॥ इति।

भवभूतिना दृष्टं प्रजारञ्जनरूपराजधर्मस्य परिपालनार्थं रामेण निर्वासिता निरपराधा सीता। एवमेव भवभूतिना यावच्छक्यं रामस्य चरितं दोषनिर्मुक्तं विहितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यत्रापि भवभूतिना परित्रातो रामः। पुण्यात्मा किल नरपतिः शूद्रकः, स किल शिरश्छेदानन्तरं दिव्यां मूर्त्तिं परिगृह्य रामं समुपस्थाय तस्मै जनस्थानं प्रदर्शयितुं प्रवृत्तः—न खलु रामायणवृत्तान्त एवंविधः समुपलभ्यते। रामायणस्य रामः शूद्रः सन् शूद्रकस्तपोऽतप्यतेति तमवधीत्। भवभूतिना दृष्टम्—सर्वथाविचार एवायम्। पुण्यकार्यस्य कृते प्राणैर्दण्डनम्! अनेन रामेण कार्यं न सेत्स्यतीति। अत एव तस्य रामः कृपया खड्गेन शूद्रकं पापादमोचयत्।

किन्तु कविद्वयस्यैवंविधाचरणस्य सविशेषं कारणं वर्तते।

प्रथमतस्तावत् संस्कृतभाषायाम् अलङ्कारशास्त्रसमाख्यः शास्त्रविशेषो विलसति, सुमहानपि कवयिता नैव प्रभवति तं समुल्लङ्घयितुम्। पुरा किल सर्वैरेव शास्त्रमनुवर्तनीयमासीत्। ये तावन्निरीश्वरवादिनो बभूवुः, किं बहुना यैस्तावद्वेदविरोधीनि मतानि प्रचारितानि तैरप्यवरतो मुखेनापि वेदस्य प्रामाण्यं स्वीकर्तव्यमासीत्। आभ्यामपि कविभ्यां तदलङ्कारशास्त्रमनुवर्तितम्। शास्त्रस्यास्य विधानमेकं यथा—यस्तावन्नाटकस्य नायकः स सर्वगुणान्वितो दोषरहितश्च विधातव्य इति।

अत्र केचन विप्रतिपद्येरन् विधिरयमतीव कठोरः, नाटककृतः स्वातन्त्र्यमनेन कुण्ठ्यते इति। परं गानस्य तानः, नृत्यस्य भङ्गिः, पद्यस्य छन्दः, सैन्यस्य गतिः, सर्वेषामेव महतां पदार्थानां सुबद्धो विधिर्वर्तते। निरङ्कुशा इति कवयोऽपि विधेस्तस्य शासनं लीलयोल्लङ्घयितुं नालं भवन्ति।

विधिर्वर्तत इत्येव काव्यं नाटकञ्च सुकुमारकलायामन्तर्भवति। विधिर्वर्तत इत्येव काव्ये एतावत् सौन्दर्यम्। साम्प्रतं विधिरयं समीचीनो वा न वेति विचार्यम्।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पताकास्थानम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

विदितमेवैतत् प्रायेण प्रियपाठकमहाभागानां यत् तारकासुरेण निपीड़िताः सुरगणा ब्रह्माणं शरणमीयुः। परमेष्ठिना च प्रोक्तम्—महेश्वरस्य तनय एवासुरपुङ्गवं तं शमयितुमलं नान्यः कश्चित्, अत एव—

उमारूपेण ते यूयं संयमस्तिमितं मनः।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लौहवत् ॥

इति। ततश्च विषयऽस्मिन् सुविषमे मन्मथ एव नः समीचीनः सहाय इति निश्चित्य महेन्द्रो मदनं सस्मार। तेन च तदात्व एव समुपस्थाय वासवेन स्वासनसन्निकृष्टं समुपवेशितेनोक्तम्—किमर्थं भवताहूतोऽस्मि। ब्रूहि कतमः सुरो वासुरो वा ते पीड़ाकारणम्।

तव प्रसादात् कुसुमायुधोऽपि
सहायमेकं मधुमेव लब्ध्वा।
कुर्यां हरस्यापि पिनाकपाणे-
धैर्यच्युतिं के मम धन्विनोऽग्रे॥ [कुमारसम्भवे ३।१०]

इति। अत्र देवानां मन्त्रणमजानतापि मदनेन 'अलमस्मि पिनाकपाणेरपि पराभवाय' इति यदुक्तं तद् वाचकानां विदितप्रकरणानामतीव प्रमोदं सञ्जनयति।

एतच्च होमरकविविरचितस्येलियदकाव्यस्य प्रारम्भं संस्मारयति। देवस्य सवितुः प्रियपुरोधसो दुहिता ग्रीक्वीरैरपहृत्यगामेमनन-महोदयाय प्रदत्ता। पुरोधसा महार्घ्योपायनपाणिनानुनीतोऽसौ ग्रीक्वीरस्तमरुन्तुदैर्वचनजालैरभिघ्नन् दूरमुत्सारितवान्। निपीड़ितस्य तस्य प्रार्थनेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवः सविता ग्रीसीयशूरेषु महामारीं व्यसृजत्। ततश्च प्रध्वंसितप्रायैर्ग्रीसीयैर्निमित्तज्ञो देवानां कोपकारणं विवरीतुमभ्यर्थितः समुवाच—अभयं चेद्दत्थ यूयं तर्हि तथ्यं विवृणुयाम्। मम वचनेन सर्वेषां ग्रीसीयानामीश्वरः कोपं गच्छेत्। को वा प्राकृतो जन ईश्वराणां प्रातिकूल्यमाचरन् प्रभवेत् क्षणमपि जीवितुमिति। ततश्चाखिलसमहोदयेन सान्त्वपूर्वमस्यभाषि, अलं भयेन। शपेऽहं देवेन सवित्रा, मयि जीवति न न खलु कोऽपि तवानिष्टमाचरितुं प्रभवेत्, सोऽस्माकमधिपतिरागामेमननो वा भवतु, अपरः कोऽपि वा भवत्विति। अत्राविदितसवितृवृत्तान्तेनाप्यखिलसवीरेण यत्तन्नाम्नैवाभयवचनमुदीरितं तत् कमपि वैचित्र्यविशेषं पुष्णाति। एतदप्यत्रावधेयम्। यद्यपि निमित्तज्ञेन नृपतेर्नाम न निर्दिष्टम्, तथापि तस्य भाषणतस्तदभिप्रेतो नरपतिरागामेमनन एवेति प्रतीयते, अतो नैतत्तथाविधां चारुतां धत्ते। कुमारसम्भवे पुनर्मदनस्य सविधे लेशतोऽपि महेश्वरस्य नाम केनापि नोदलेखि, न वा पितामहस्योपदेशो व्यवारि, तथापि तेन स्वत एव पिनाकपाणेरपि धर्यच्युतिं घटयेयमित्युक्तमित्यहो वैचित्र्यातिशयः।

**e: gar oiomai andra kholo:semen, hos mega panto:n*
Argeio:n krateei kai hoi peithontai Akhaioi.

For, methinks I shall make wroth a man who rules mightily over all the Argives, and whom the Achaeans obey.

Tharse:sas mala eipe theopropion, hoti oĩstha,
ou ma gar Apollo:na diiphilon, ho:i te su, Kalkhan,
eukhomenos Danaoĩsi theopropias anaphaineis,
ou tis emeũ zo:ntos kai epi khthoni derkomenoio
soi koile:is para ne:usi bareias kheiras epoisei
sumpanto:n Dano:n, oud' e:n Agamemnona eipe:s,
hos nũn pollon aristos Akhaio:n eukhetai eĩnai.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाप्निकव्यामोहः

[पण्डिता श्रीमती क्षमा देवी]

अकस्मादुत्थितो झञ्झावातः प्रचण्डः। मृदुलधवलवालुकापटलेनापह्नुतः सर्वतो दृष्टिगतप्रदेशः। प्रभञ्जनवात्योद्धताभी रेणुकाभिः शुष्कशीर्णपत्रनिकरैः पुनरेष द्वैगुण्यं प्राप्य कुटिलाकाशे धूसरपीतवर्णसमुच्चयः सरभसं विदूरमम्बरान्तः सहसावपत्याधश्च घूर्णयन्मानवाननविवराणि सर्वाणि पर्यपूरयन्नयनयुग्ममन्धीचकार, उच्छ्वासं च प्रत्यरुणत्। सायन्तनोऽन्धकारस्ततोऽपि द्विगुणितो मेघमालाभिः। अध्वनः सूक्ष्मरेखा भीषणनिर्जलमरुस्थल्यां सर्पन्ती शून्यशिखिरश्रेणीतः शिखरश्रेणीम्, अरण्यादरण्यानि प्रचण्डोष्णसिकतास्वकाण्डे खण्डिताभूत्। नास्ति सरलो मार्गो नाविषमा भूमिर्वा, नावलोक्यते पन्थाः कोऽपि वा। यस्मिन् विलक्षणमिदं प्रयाणं मयाङ्गीकृतमासीत्सोऽपि महासार्थः क्रमेण क्षीणक्षीणोऽभूत्। मामन्तरा च सार्थवाहेन सह सर्वेऽपि यात्रिका एकैकशस्तिरोऽभवन्। अतिश्रान्तः पिपासाकुलो दाशेर एवावशिष्टो मे सहायः। अत्यल्पान्नसामग्रीभाक् परिमितान्नं भोजं भोजं पर्यवसितनिखिलान्नांशः प्रतिघटिकं जलबिन्दुभिः स्वल्पैरात्मानं परितोषयन् न चिरात्क्षीणक्षीणगात्रस्ततश्चावसन्नसत्त्वः समभवम्। असहायः सन् गात्रचालनाक्षमः क्रमेण जड़तां नीतोऽहम्। रेणुरूषितरोमकुहरो झञ्झावातोत्स्फालितमृत्ताड़ितोऽसह्यवदनामर्दितमस्तकः प्रमथितपिपासाकुलीभूतो मृतप्रायः स्थितवानहमेकाकी। परं दृढ़सङ्कल्पोऽहमभीष्ट-

---

Take good heart and speak out what oracle soe'er thou knowest, for by Apollo, dear to Zeus, to whom thou prayest, Calchas, and declarest oracles to the Danaans, no one, while I live and have sight on the earth, shall lay heavy hands on thee beside the hollow ships, no one of the whole host of the Danaans, even if it be Agamemnon thou meanest, who now declares himself far the best of the Achaeans.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थलाभिगमनान्न व्यरमम् । अथानवरतं वालुकाघनराशिभिः प्रहतः प्रचण्डवातार्धशीर्णपटकुटीरे गतिमन्यामपश्यन्नशयिषि जोषमधोमुखः । तदारभ्य किमकरवं क्वासं किमुपनतं मे केनावलोकितः कियन्तं वा कालं नष्टसंज्ञः स्थितोऽहमिति न मनागपि किमपि तत्स्मृतिसरणिमायाति सम्प्रति । अद्वितीयः पटकुटीरे शयित एकविषयमात्रमधिकृत्य ध्यायं ध्यायं युगकल्पं कालमवास्थिषि । अभूत्प्रस्तुतमुद्दिश्य किञ्चित्पुरातनगिरिकन्दरं साद्भुतेतिहाससमुच्चयम् । यच्च चिरात्सैकतमरुप्रदेश इयत्कष्टकरप्रवाससाहसाय मां व्यलोभयत् तदद्भुतेतिहासश्रवणरोमाञ्चिताङ्गं मां तथेह समाह्वयद्यथा वार्धकागमाद्दीर्घप्रयाणस्य कष्टं सोढुमक्षमो भवेयमिति प्रागेव तद्द्रष्टुं समुत्कण्ठोऽभवम् । परमिदानीं नैकतिथं कालं प्रचण्डोष्मदन्दह्यमानशरीरः पर्यटन्न विजने प्रदेशे स्वाशयनिष्पत्तेरसम्भवभावनया भग्नमनोरथो विमनस्कश्चाभवम्। तत्प्रथितगुहामाहात्म्यं यन्मया पुनः पुनः साम्रेडं मनसा दृष्टिविषयः कृतमासीत्तदिदानीं काल्पनिकमेव मे प्रत्यभात् । मदभीष्टस्थानसन्दर्शनासाध्यतां मन्वानो निराशया विदीर्णहृदयोऽभवम् । दुरापाशयस्यास्य रहस्यं यन्मां पूर्वं बद्धाशं व्यधात् तदिदानीं प्रखरातपतप्तसिकतासु शयानं मां व्यडम्बयत् । पर्यन्ते मदीया क्लेशमयी विचारसरणिः सहसा खण्डितासीत्प्रशान्तता च सद्यो व्यराजत । सर्वतः शून्यशून्यता । निःशेषतः स्मृतिलोपोऽपि ।

अथान्धीकुर्वतः सिकतासमुच्चयादाविरभूत्कश्चिद्विशीर्णगात्रः प्रवयाः प्राचीनतममनुजमेथूसेलाख्यसमवयस्क इव । हिमाचलहैमशिखरसहोदरसान्द्रजटाधारी मुनिवेषोऽयं तापसोऽङ्गारप्रतिमनयनो महौजा मन्दपदेन मामुपेत्य गभीरदृशा निरीक्ष्य मां क्षणं तूष्णीं स्थितवान् । विनष्टासोः पुनः पुनः समाप्तजीवितस्य कस्यचिन् मनुष्यस्यालोकनेनेव क्वचिदप्रत्ययं क्वचिद्विस्मयं सूचयता विशालनयनयुगेन मामनिमिषं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यरूपयत्। तद्वलिनग्रीवाया अवलम्बमाना रुद्राक्षमालातिदीर्घोपयोगादिव जीर्णप्राया तत्तुहिनश्वेतकूर्चः प्रतिक्षणविगलत्कचतन्तुः कृशतां भेजे। तथापि प्राप्तेदृगवसादचिह्नस्य वलिनभूतस्यानने तस्य प्रत्यभादात्मसंयमप्रशान्तताभक्तिवैराग्यादीनां किमपि निदर्शनं तेजो विस्मयकारकम्। सूक्ष्मं निरीक्ष्यमाणायां दृशि तस्य व्यराजत स्थैर्यानुकम्पौदार्यादिगुणरत्नसन्दोहः। अथ मुहूर्तं मरुस्थली विचक्षणपरिवर्तनमवाप। सर्वमप्यस्फुटं स्पर्शागोचर इव ददृशे। श्वेतसिकतावर्तो मज्जीर्णकुटीरमास्फालयन् तदसंख्यविवरान्तर्लब्धप्रवेशः सवेगं पर्यभ्राम्यदभितः। पुञ्जीभूतवालुकासन्दोहेन क्षणार्धमन्धीकृतः सम्भ्रान्तचेता निश्चलश्चाहमवास्थिषि। पलितशिरा गलितवयस्कोऽयमध्वगः पितृवनादुत्थित इव प्रत्यभान्मे। नेदिष्ठतामुपेतस्य तस्याकारः काल्पनिक इव बभौ। अविश्वासोत्क्षिप्तं स्मृतिलोपाभिभूतं प्रचण्डालापात्पिपासार्दितकण्ठं स्थविरस्यास्य पृच्छासूचकं निरीक्षणं मामसंवादिनमकरोत्। क्वाद्यतनसमये गन्तुमुद्यतोऽसीति पप्रच्छ स आयताक्षियुगलेन तूलशुभ्रमसृणभ्रूलताच्छादितेनाविरतं निरूपयन्माम्। सुवर्णमयीं नगरीमिति कथमपि समुदीरिते मया स नितम्बनिहितकरो लोलश्वेतकूर्चो दयार्द्रस्मितास्यः प्रवया इङ्गितेनैव सुवर्णनगरीं प्रति मत्कल्पितां यात्रामभ्यनन्दयत्। ततश्च मधुरया गम्भीरया च गिरा प्रोक्तवान्। आ! सुवर्णपुरीम्? अद्भुतनगरीम्? यात्रेयं पवित्रीकरिष्यति तवात्मानम्। अप्यस्ति ते विश्वासोऽद्भुतचमत्कारे सुवर्णनगर्यास्तत्पवित्रगिरिकन्दरे च। इति स्वप्रतिपादनस्य साक्षात्कारादिव मां वशीकर्तुमिवाप्राक्षीत्सः। अपरञ्च मया तन्माहात्म्यस्य वर्णनमित्यस्पष्टमवोचम्। अपि जातुचित्पृष्टस्त्वयात्मा किमिति सुवर्णपुरी जीवनाखिलसुखोपपन्ना स्यादिति। पुनः स प्रवया मामन्वयुङ्क्त। किमिति सा व्याधिदुर्भिक्षविप्लवविमुक्तेति। शिरो यावद्विधूयते मया तावत् स्ववचसोच्चैरुच्चैः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समद्ध त इव तत्स्मतिसौन्दर्योर्ध्वपदमारूढ़ इव प्रत्यभात्। क्षणोत्तरं सुवर्णपुरातिहासमाख्यातुमुपाक्रमतातिगम्भीरगिरा—"अहो सुवर्णनगरी बभूवकदा निरानन्दा मरुस्थलीव यावन्न पवित्रीकृतासीत्केनापि दिव्यशक्तिना सिद्धात्मना। सततमुदासीनानामपि प्रतनुप्रभावाणां सान्निध्यात् तपस्विनां दुःसहं दुःखमपनीयते, किमुतेदृशानां सन्तोषामृततृप्तानां सिद्धिमार्गोपदेष्टृणां महात्मनाम्। विपद्ग्रस्तामबलामभ्यरक्षदात्मानं निर्माष्र्टुं धरातलमागतः साक्षाद्विष्णुरिव स पुण्यात्मा।" इत्युक्त्वा क्षणार्धं स व्यरमत्साकल्येन स्ववृत्तान्तं मच्चेतसि दृढ़ं निवेशयितुमिव। ततोऽभ्यधात्पुनः। "दिव्यपुरुषोऽयं नूनं सत्याय धर्माय च स्वप्राणानुपाहरत्। मद्वचसि श्रद्दधासि चेन्मामनुव्रज, अहं ते सुवर्णनगरीं दिव्यकन्दरं च त्वां नयेयम्।" इति साग्रहं निर्दिष्टवति तस्मिन् सद्यः समुत्थाय तमेनं मरुप्रदेशमन्वसरम्। तं सम्प्राप्य, किञ्चित्पर्यटनं च कृत्वा पश्चिमोत्तरदिशि शुष्कविजनवनस्पतिविरहितस्य पर्वतस्याधो विशालां नगरीमेकामद्राक्षम्। तन्मन्दिराणां सुवर्णशिखराणि अभ्रितप्रदोषे देदीप्यमानानि दूरात्सन्तप्तचामीकरदीप्तय इव चकासिरे। अस्माकं पुरो वर्त्मनोर्द्वयोरेकतरो दीर्घश्वेतरिक्तः सुवर्णनगरीमध्यगच्छदन्यश्च विपिनगुल्मावृतः प्रति कन्दरम्। मदीयमार्गदर्शकोऽत्र क्षणं प्रतीक्ष्याग्रवर्तिनं विस्तीर्णं प्रदेशं निरूपयन् गिरिगह्वरगामिनमध्वानमगृह्णात्। दुग्धधारयेव धवलित इव ज्योत्स्नया पन्था दिवाकरप्रचण्डतापतप्तः शनैः शनैः शैत्यमभजत्। प्रदेशस्यास्य प्रशान्तता न चिरात्प्रवयसो मुखाच्छ्रोष्यमाणेतिहासवैलक्षण्यं प्रागेवासूचयत्स्फुटम्। यथा यथा विशालशाखिसङ्कुलं दुस्तरारण्यमगाहिष्वहि तथा तथा स्वप्नदृष्टस्थलस्य प्रत्यक्षदर्शनेनेव विस्मयादिभावनाभिः काभिरप्यभिभूतोऽहम्। अथानतिदूरं गत्वा कन्दरस्योपगढ़ं शिखरं गन्धसारसुरभितं समासादितमावाभ्याम्। पुण्यगर्भागारे प्रवेशात्प्राक्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पादुके अपनय चेतसश्च सर्वप्राकृतविचारान् निष्कासयेति दक्षकरतर्जन्यङ्गुष्ठाभ्यां कूर्चं परामृशन् गम्भीरस्वरेण मामादिशत्। मयाप्यनुष्ठिता झटिति तदाज्ञा। अथ यावद् गुहायास्तमोमयीं शैवालाच्छादितां दृषत्सोपानपंक्तिमवारोहाव तावत्तस्याः समाधिसदृश्या निःशब्दतया निष्प्रभत्वेन गाम्भीर्येण च महाविस्मयाकुलोऽभवम्। अहो परःशतवर्षीयकालात्ययेन नावगाह्यं शाश्वतं च स्यात् पुनर्गर्भागारमेतदित्यतर्कि मया साश्चर्यम्। मदीयमार्गदर्शकस्य पदमनुचरन्महापरिणाहमणिशिलामयीं पुरुषस्य मूर्तिं शुभाशिषो वितरन्तीमिव सामिप्रकाशितमध्यभागे गुहाया अद्राक्षमहम्। प्रतिमाया अस्या विशालद्रुमकाण्डसदृक्षं बाहुयुगलप्रकाण्डं तत्पादयोर्निपतितां विपद्गतां शरणार्थिनीं कामपि वनितां परित्रातुमिवोन्नमितमासीत्। प्रतिकृतिमेनामालोक्य जीवनचक्रविमुक्तान् निर्वाणेप्सून् अनुयायिनः स्वश्रेष्ठतत्त्वचतुष्टयमुपदिशतः प्रथितयशसो भगवतो बुद्धस्याजण्टाख्यायां गुहायां स्थिता नैपुण्यातिशयेन घटिता प्रतिमा मत्स्मरणसरणीमारुक्षत्। अशंसान्मे कमपि बालभावमानन्दोल्लासिनी नयनयुगले, मूर्तेस्तस्या उन्नतमंसयुगलं सुदीर्घबाहू, पीयूषवर्षिणी अक्षिणी, दाक्षिण्यगाम्भीर्यबुद्धिमत्ताद्योतकं विशालं ललाटम्, शान्ततया स्नातं च शरीरम्। भ्रूमध्यस्थापिताचलदृष्टिः समाधिस्थितेव परब्रह्मविचारवशा ददृशे प्रतिमा। तपः-सन्न्यास-स्वार्थत्यागाद्युदात्तभावा भासन्ते स्म स्फुटं तत्प्रतिमामुखे। अथ तन्मूर्तेः पादयोः पुरो निपत्य कृताञ्जलिः साष्टाङ्गप्रणिपातं कुरु परस्तात् तदीयपावनकथां ते निवेदयिष्य इत्यवोचत स्थविरोऽध्वगः। प्रतिध्वनद्गुहावितानाभोगे तस्य स्वरो दीर्घतामुपेतः प्रत्यभाद् वतालध्वनिरिव भीषणः। तदादेशं निःशब्दमनुसरते पुनश्च समुत्थिताय मे तमीमयं कोणमेकमात्मानमनुयातुं संज्ञां प्रददौ यथा प्रभवेयं स्फुटतरं प्रतिमां तां पूज्यतमामालोकयितुम्। कन्दरान्तश्चित्रविचित्रच्छायापटले

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थविरस्याख्यायिकाविषयस्य प्रत्यभादमानुष इव शरीराकारः। तदायपाण्डुराननं त्वक्पत्रसदृशं गम्भीरनयनयुगलं च मामवर्णनीय-मोहावस्थाकुलं वितेनाते। निरन्तरधृतप्राण आयुःशृङ्खलागाढसंलग्न इवादृश्यत प्रवयाः, अकथयदाख्यायिकां च तामद्भुतां यथा—

"व्यतीतं खलु संवत्सराणां शतद्वयं तदागमस्य प्रथमतोऽत्र। नातिदूरवर्तिनी नगरीयं सर्वत्र दुर्भिक्षरोगादिकारणकलापान्मृत्युच्छाया-न्धकारावृतासीत्। चतुर्षु वर्षेषु वर्षाभावान्मक्षिका इव प्रजा अवसेदुः प्रतिक्षणम्। नृपतिः करणसिंहो नगरीमिमां प्रशासत् स्वप्रजा-निर्विशेषं प्रजां दुःखार्णवनिमग्नां दर्शं दर्शं शोकाग्निना दन्दह्यमानः प्रतिपत्तिमूढोऽवतस्थे। नगरीयं विध्वंसितप्राया यावत्तिष्ठति ताव-दस्मादेव गिरेरवारुक्षत्कोऽपि दिव्यपुरुषः। विदितनगरविपज्जालो दीनदुःखदावदहनोद्विग्नस्तत्परिहारविचक्षणः प्रचण्डग्रीष्मतापे दिवा तमिस्रायां च जपतपोध्यानादिभि भंगवद्भक्तिनिष्ठो दीर्घदीर्घं काल-मयापयत्, दुःखितप्रजायाश्च संरक्षणाय परमात्मानमभ्यर्थयामास। ततः कतिपयमासाभ्यन्तरे वृष्टिमहौघेनादृष्टपूवण प्लाविता नगरी प्रवाहैर्जनानां विस्मयातिशयोद्गारैश्च पर्यपूर्यत।"

अत्र प्रवयाः क्षणमात्रं वृत्तान्तस्य पौर्वापर्यस्मरणपराधीन इव किञ्चिद् व्यरमत्। ततश्च जोषं प्रतिमायाः पादयोरन्तिकनिहिताङ्गार-पात्रे धूपगन्धसारखण्डानि जपन् किमपि युगपत्प्रक्षिप्य मन्दतरस्वरेण निवेदयितुमाख्यानं पुनरुपाक्रमत—"धराधिपः करणसिंहो गर्वोच्छू-नाधरः श्रेष्ठपुरुषस्यास्याद्भुतकृतिमपूर्वामाकर्ण्य तमेनं स्वप्रासाद-मलङ्कर्तुं न्यमन्त्रयत। परं शुद्धात्मना तदनुग्रहे नोररीकृते भूपेन्द्रो-ऽभिमानी तमभिनन्दयितुं स्वयं तदन्तिकमुपेतवान्। अथ व्यतीतेषु बहुषु वत्सरेषु गृहीतमानवाकृतिर्दिव्यपुरुषोऽयं स्वधर्मरक्षणसक्षणः सत्यतासमर्थनाय क्वचित्तिरोभविष्यति ध्रुवमिति जनतायां वार्ता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथितासीत्। प्रचण्डातापवर्षासु स्वरुचिरदेहयष्टिमिन्द्रियसंयमेन क्लेश्यमानस्यानवरतप्रजागरेण ज्ञातयोगाच्छ्रेष्ठपदमीप्सोस्तस्य दर्शनामृतेन स्वान्तरङ्गं सन्तोषयितुं तदन्तिकमाबालस्त्रीपुरुषवृन्दं परःशतशः प्रतिदिनं समाययौ। यात्रिका नानाविधोपहारानानीय तदीयपादयोः समीपं निदधुः। आ मध्याह्नादामध्याह्नं ध्यायतस्तस्य वृक्षशकुन्तकास्तदङ्कोपरि समुत्प्लुत्य खर्जूरिका आस्वादयन्, नीलवर्णकपोताश्च शातितण्डुलकणाननुपाभुञ्जत। योगिराडयं शताधिकवर्षदेशीयोऽपि नवयौवनभूषित इव बभौ। अहो प्रभावोऽयं खलु तस्यामरभावस्य। तदाननस्य देदीप्यमानच्छविं रुचिरताजितमारां शरीराकृतिं तद्दिव्यप्रभावशंसि विशालललाटं दर्शं दर्शं वृद्धा युवतयश्च क्षणमनिमेषा विस्मृतात्मदेहास्तस्थुः स्ततश्चात्यन्तं तं चकमिरे। तास्वासीत्करणसिंहराजस्य दुहिता भारतीनाम्नी कुन्दकुड्मलसुकुमाराङ्गयष्टिः कमललोचना बालार्कपेलवकान्तिः पीयूषमधुरवचना विनयशीला च।" निशम्यैतत्सविस्मयमपृच्छं किं नृपात्मजापि कषायाम्बरधारिणि तापसे बद्धानुरागा संवृत्तेति। वृद्धो मामाश्वासयितुमुदतरत्, तथैव खलु। परं स्वप्रेम्णः सिद्धिरसाध्येति विजानत्यपि यौवनोपयुक्तभोगान्निखिलानुत्सृज्य तं पुण्यात्मानं स्वहृदयेश्वरं दृढमाकलयन्ती तस्यैव ध्यानमनवरतमकरोत् सा। निराहारा निरानन्दा च राजकन्येयं क्रमेण हास्यवर्जिता बभूव। तदीयशरीरयष्टिं प्रतिदिनमधिकाधिककृशां दर्शं दर्शं सन्त्रस्तौ तत्पितरौ कुमारीमपृष्ट्वा सह केनचिद्राजकुमारेण तस्या विवाहवाङ्निश्चयं कृतवन्तौ। विदित्वैतद् भारती नैराश्यभुजङ्गेन दष्टेव भयविह्वला मृतप्रायाऽवतस्थे। अथो गत्यन्तराभावादुद्वाहस्य पूर्वस्मिन् दिने तपस्विनीयमबला सूर्यास्तमनात्प्रागलक्षिता दौवारकैर्विचारभारविरुद्धगतिरपि हृदयेश्वरमुपतिष्ठासुः शङ्कातङ्कमपास्य पितुः प्रासादात्पलायनमकरोत्। हेमन्तक्षणिकसन्ध्यासामयिकनीललोहितच्छाया-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याप्ते प्रदोषे पिङ्गलकदम्बकक्षेत्रेषु सुरभिसुमनःस्रजमादाय हस्ते शनैः शनै र्गिरिकन्दरमभिमुखमेव कथमप्येकला प्रातिष्ठत् । अत्र पर्वतश्रेणीतः पर्वतश्रेणीमटव्या अटवीं अधित्यकातोऽधित्यकामन्तरा नासीत्कोऽपि पन्थाः सरलः। ततश्च श्वासनिरोधादतिसम्भ्रान्ता भ्रंष्टाध्वा क्षणं यावत् निश्चला तिष्ठति तावदकस्मादतिभीषणा सकडकडाशब्दं सौदामिनी समदीप्यत। यावच्च तच्चमत्कारचकिता कम्पमाना सखडखडाशब्दायमानदन्ततितिस्तावत् सतडतडाशब्दं गुटिकास्थूलैर्धाराबिन्दुभिर्वर्षितुमारब्ध मघवा। किंकर्तव्यतामूढात्र यावन्निराशयाश्रुपूर्णाक्षी पयःपूरेण पलायमाना सक्रन्दं ध्यायन्ती तिष्ठति तावद्दैवयोगात् कश्चिन्मेषपालस्य क्षत्रवटुराजानुधूलिधूसरितचरणयुगलः पटच्चीवरार्धाच्छादितशरीरोऽपर्याप्ताशनपाण्डुवदनो दीर्घदण्डधरक्रुशकरस्तत्सविधे समाययौ। अयि किमिति रोदिषीति पृष्टा माणवकेन तेन भारती तस्मै स्वमभीष्टं न्यवेदयत्। एहि तावन्मया सहेति तदीयहस्तमादाय दारकस्तां शनैः शनैर्वनमार्गेण गिरिकन्दरमनैषीत्। राजकन्या चातिश्रान्ता स्विन्नाङ्गयष्टिर्विवर्णवदना दुःखदन्दह्यमानहृदया बटुना सार्धं समहायासं कतिपयघटिकाभिर्गिरिशिखरं प्राप्य गुहां पवित्रां प्रविश्य च पुण्यात्मानं सिद्धपुरुषं गाढध्याननिमग्नमालोकयत्। अथ बद्धाञ्जलिपुटा सकम्पं ससाध्वसं निरुच्छ्वासं च तमुपाययौ मन्दं मन्दं भारती। मेषपालस्य पुत्रस्तमोमयकोणे गह्वरस्यैकस्मिन् पातितोभयजानु समुपविश्य विलक्षणालोकमिमं व्यलोकयत्। संक्षुब्धं मानसमात्मनो निग्रहीतुं बलवत्प्रयतमाना राजकन्या चिरादनभिनन्दितपानभोजना केतकीव पाण्डुरच्छविर्व्रीडाभरमन्थरा ग्रीवां नमयन्ती स्वपादाग्रमेवावलोकयन्ती क्षणं तावत्तूष्णीं तस्थौ ततश्च सिद्धात्मानमभ्यार्थयत भगवन्, स्वीक्रियतां क्षुद्रजनोऽयमिति। स च तदाकर्ण्य नयनयुगलमीषदुन्मील्य समन्दहासवदनो जोषमास्त। पुनस्तया प्रार्थितो विधूय शिरो निरुत्तर एव स्थितवान्। प्रसीद भगवन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्गीक्रियतां तव किङ्करीयम्, निरस्ता पुण्यपादाभ्यां चेद्विनङ्क्ष्यति सा खलु। भगवत्पादपङ्कजयोः समर्पयतु सा जीवनमात्मीयमिति प्रह्वं पुनःपुनरभ्यर्थ्य जीवनाख्यानमात्मनः शुद्धात्मनस्तस्य श्रुतिद्वन्द्वस्यातिथीकृतवती। तद्यथा प्राह सा। अहो भगवतः प्रथमदर्शनात्प्रभृत्येव भगवति बद्धादरा समभवं ततश्च भगवतो दिव्यप्रभावचमत्कारपरम्परया कुसुमशरशरजातविद्धचित्ता मनसिजावेशजनितानवरताभिलाषां सलज्जं कथमपि कतिपयमासान् प्राणानधारयम्। प्रतिनक्तं स्वप्ने भगवत्पुण्यदर्शनब्रह्मानन्दं विन्दन्ती जाग्रती च भगवच्चित्रं मानसभित्तिकायामालिखन्ती कथमपि जीवनयात्रामयापयम्। नैराश्याच्च दिने दिने कृशीभूतां मां वीक्ष्य पितृचरणैः केनापि राजपुत्रेण सह मम विवाहे निश्चिते सति मर्मण्यभिहतेवोत्कीलितप्राणेव च समभवम्। पर्यन्ते गत्यन्तरमपश्यन्ती अनभीष्टोद्वाहादात्मानमभिरक्षितुं पितुर्गेहान्निभृतं पलायमाना भगवतश्चरणाब्जयोः समीपमागतवती परमसङ्कटादस्मात्परिरक्षेद्भगवानिति। एवं विलपन्त्या तयोपयाचितो भूपेन कन्यया सिद्धात्मा प्रत्युवाच मृदुगिरा। वत्से विरक्तः प्रपञ्चसुखोपभोगाच्च विमुक्तोऽस्मि खलु। अतोऽन्विष्यतामन्यः कोऽप्यनुकूलस्तरुण इति। अनेन तस्य वचसा तद्वचनसुधारसपिपासुभ्यामिव कर्णाभ्यामेकतानताजडीकृताभ्यामिव नयनाभ्यां चित्रार्पितेवाभवद्भारती। किञ्चिद्भीतेव किञ्चित्स्तब्धेव किञ्चित्खिन्नेव किञ्चित्क्षुब्धेव च सा समतिष्ठत। सस्वान पुण्यात्मनस्तस्य वाक् तमोमयकोणे विलीनस्य माणवकस्य श्रुतावमानुषीव। अथ यावद्भारती क्षणं स्तिमिता तिष्ठति तावदश्रावि दूरात्सघडघडं प्रतिध्वनिर्घोटकखुराघातध्वनेर्बधिरीकृतक्रोशार्धान्तरालवर्तिप्राणिवर्गस्य प्रशान्तप्रदोषेऽस्मिन्। क्रमेण ध्वनिरुच्चादुच्चतरः समजनि। मेषपालकस्यात्मजः शीघ्रमुत्थाय कन्दरायाः सोपानपङ्क्तिं जवेनारोहत्। कम्पमानहृदया तपस्विनी भारती कुरङ्गक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोचना व्याधभयाभिभूतेव कुरङ्गी दुःखपारावारे मज्जतीवानन्यगतिः केशकलापमाकर्षन्ती निराशान्धकारे नष्टेव समाक्रोशन्मुक्तकण्ठम्। हा हा हतास्मीति सा व्याहरत्तपस्विनी। विजनस्थलेऽस्मिन्नागमनेनातिक्रान्तविनय क्षुण्णस्वाभिमानमात्मानं मेने। ततश्च विवर्णवदना स्वेदबिन्दुस्नातललाटा च राजपुत्री बाष्पौघनिग्रहे प्रयतमाना करौ सम्पुटीकृत्य प्रेङ्खीभूय भूतलमाबिलं चकार नयनजलधारया। तुरङ्गखुरध्वनिः प्रतिक्षणमेधमानो गिरिकन्दरस्याधिकाधिकं नेदीयान् दम्भोलिवद्भीषणतां भेजे। "भगवन् त्रायस्व मां त्रायस्वेति" भारती महात्मनः पादारविन्दयोर्निपत्य विततबाहुपल्लवा क्वणद्दन्ततितिर्म्लानपुष्पशिथिलितसुकुमाराङ्गयष्टिः सकरुणमभ्यार्थयत। तत्क्षणे माणवकः कन्दरसोपानमूर्ध्नो भूपतिर्भूपतिरित्युच्चैराक्रोशन् सन्त्रासविवर्णास्यः सवेगमवरुह्य प्राविशद् गुहाम्। परितश्च गह्वरमभिरक्षणाय गुप्तस्थानमन्विष्यन् एहि तत्राभ्यन्तरकोणऽन्तर्हितौ भविष्यावेति कम्पमानां राजकन्यामसूचयत्। विधूते शिरसि तया वेपमानया ऽऽपादमस्तकं बटुरन्धकारे परामृशन् तमोवृतकोणं निरुच्छ्वासो विलीनो यावत्तिष्ठति तावद्भारती करपल्लवे प्रसभं समपीडयन्नैराश्येन। हा हा ध्रुवमेव मे विनाशोऽद्य ध्रुवमेव पतनं ध्रुवमेव च मे पशुमारैर्मारणम्। आशाङ्कुरप्रफुल्लितहृदया समायाताहमत्र सद्यस्तु वराकी मन्दभागा जन्मान्तरदुष्कृतफलभागिनी निराशापिशाचेन ग्रस्तेदानीम्। इति विभावयन्ती तपस्विनी मुहुर्मुहुर्भगवन् त्रायस्व मां त्रायस्वेति कातरेण भज्यमानन कम्पमानेन च स्वरेण दृढतरबद्धाञ्जलिः कण्ठबाष्पकीलितवाक् कथं कथमप्यवादीत्। तदीयकरुणोद्गारप्रवाहेणेवाश्रुजलप्रवाहेण च पर्यपूर्यत गुहा। तदीयकर्णमर्मभेदिदीनप्रार्थनं पुण्यात्मनः श्रुतौ रक्षककरगृहीतस्य शिशोश्चाटुवचनमिव न्यपतन्न तु वामाया विमोहकानुनय इव।" अत्राख्यायकः क्षणमात्रं व्यरमत्। परमभक्त्या प्रतिमां विशालां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरीक्षमाणः स्मारं स्मारं पूर्वसंवृत्तं पुनर्मृदुस्वरेणाख्यातुमुपाक्रमत—"अथोन्मीलिताब्जनेत्रः शनैरासनादुत्थाय जोषं विततबाहुयुगल एधमानमहौदार्यो विलक्षविचक्षणः सत्यधर्मरक्षणसक्षणोऽभिरिरक्षिषयेव नतशरीरः कन्यकाया ललाटमध्यमुपाजिघ्रदतिकारुण्यनिर्झरझरेण च तां क्षालितवान्। ब्रह्मानन्दसुधापूरप्लावितान्तरङ्गायास्तस्याः समुदञ्चितरोमाञ्चायाः शङ्काकर्दमः सपदि विद्रावितस्तस्याश्च विततमस्तकाया निमीलितनयनायाः पुरतश्चादृष्टपूर्वप्रमोदालोको लुलुके। ततश्च किञ्चिद्दारुणरूपान्तराभिभूतेव क्षणं निश्चलाभूत्। स्वान्तःप्रेरितेव कथमपि व्यजानात्सा यत्स्वहृदयेश्वरस्य किमप्यवर्णनीयपरिवर्तनं समवर्ततेति। सकातर्यं सकम्पं च यावदुन्नमयति सा शिरस्तावदतिदीनतामयं क्रन्दनं तन्मुखान्निःसरति स्म। अकाण्डं संप्राप्तरूपान्तरा पावितान्तरात्मा निमीलितलोचनयुगला स्मितविकसितानना भगवद्ध्याननिमग्नेव समुपजातहर्षेव नतशीर्षा वाजिनां कण्टकझणत्कारमप्यश्रृण्वतीव समतिष्ठत। न चिराद्विविधाभरणप्रबलचाकचक्यः सुवर्णपटाम्बरधरो रोषघूर्णितलोचनो धराधिपः करणसिंहः सानुगः कन्दरं सवेगं प्रविश्य क्वास्ति निर्लज्जा कुलकलङ्किनीति सगात्रविक्षेपं चुक्रोश कोपहलाहलवक्रीभूतास्यः। ततः पुरः समुपसृत्य तारस्वरेण पुनः सञ्जगर्ज क्वास्ति दूषको दुरात्मेति। भारती यावच्छिलावन्मौनमालम्ब्य तिष्ठति तावद्भूपती रोषपावकातिरेकेण ज्वलन् बाहुमात्मनः स्फुरद्घातुकासिधरमुन्नमयन् क्व क्व भारतीत्युदीर्योच्चैस्तां प्रत्यधावत्सरभसम्। अश्रावि च तत्क्षणे कश्चिद् ध्वनिः सहसा। प्रतीक्षस्व, प्रतीक्षस्व। पश्य पश्य पुर इति। उदीरितमात्रे वचस्यस्मिन् कन्दरगर्भतः क्षणिकदीप्तिर्घनान्धकारेऽत्र यावद् देदीप्यते तावत्काचिन्मणिशिलामयप्रतिमा भूपतेर्दृष्टिगोचरो भवति, पुण्यात्मा दिव्यपुरुषस्तु तिरोऽभवत्। तत्स्थाने विशालेयमचतनापि परमसुख-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दायिनी कृत्रिमाकृतिर्ददृशे। योगसमाधिनिमग्नस्येव ध्यानपावितस्येव सत्याधिपत्यातिनिष्ठैधमानप्रभावस्येव सिद्धात्मनः केनापि सद्यः प्रतिकृतिरियं निपुणमालिखितासीत्। तमालोकमलौकिकमालोकमालोकं करणसिंहस्तत्रादृष्टपूर्वचमत्कारचकितचकितो विस्फारितलोचनः सरोमोद्गमः क्षणं भूलग्न इव समतिष्ठत। तदुज्ज्वलद्रोषाग्निज्वाला झटिति निर्वापिताभूत्तावत्कुतूहलाङ्गारशेषमन्दार्चिरेवावशिष्टाऽऽसीत। तदाननिर्घृणरूपलखा क्षणान्मृदुतामापेदे। प्रतिमायाः पुरः सम्पुटीकृतकरां जानुनतोपविष्टां बकुलपुष्पकोमलाङ्गयष्टिं स्वात्मजां साश्चर्यं निरीक्षमाणो महीपतिः क्षणं जोषं स्थितवान्। ततः पृष्ठतः परिवृत्य स्वानुजान् सम्बोध्योदगिरद् "धन्येयं किल मे नन्दिनी परमात्मनः प्रतिमायाः पुरो ध्यायतां भक्तानामग्रिमभूता पाविता च स्वनिष्ठया। जन्मान्तरे कृतावदातकर्मा दिव्यात्मनोऽनुग्रहभाजनभूतेह जन्मनि खलु। अहो सन्तरणसेतोः सिद्धमार्गस्य करुणरसस्य प्रवाहोऽयम्। अत्र प्रवयाः कथको मन्दीभूतस्वरः तत्स्मृतिनिष्प्रभोदरे सुचिरादवस्थितपुरातनधूलिधूसरपौर्वापर्यसंवृत्तजातसंस्कारोद्बोधपराधीन इव कथानकनिवेदनाद् व्यरमत्। ताम्रवर्णप्रदोषस्यैधमानान्धकारस्य पारं निरूपयन्निव क्षणं तूष्णीं स्थितवान्। ततश्च चिरान्मृतां स्वहृदयेश्वरीं सविषादं चिन्तयन्निव मन्दं मन्दं निःशब्दं च समुत्थाय प्रतिमां प्रति समुपेत्य तत्पुरः साष्टाङ्गनमस्कृतिः सप्रश्रयं न्यपतत्।"

* * * *

अथ जागरितोऽहम्। उन्मीलितनयनोऽभितो दृष्टिं क्षिपन् नग्नविजनपर्वतसमीपवर्तिनो गृहस्य कस्यचिच्छयनागारे शिबिरोचितखट्वामधिशयानमात्मानमपश्यम्। कश्चित्स्थविरभिषङ् मदीयनाड़ीं परीक्षमाणो मदन्तिकं नतशरीरस्तस्थौ। मासद्वयात्प्राक् परित्यक्तशयनः सैन्यदलं पुनः संगन्तुं नाशकम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुभाषितानि

स्वभावं न जहात्येव साधुरापद्गतोऽपि सन् ।
कर्पूरं पावकस्पृष्टः सौरभं लभतेतराम् ।।

दृष्टान्तशतकम् ।

लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम् ।
शेषे धराभराक्रान्ते शेते लक्ष्मीपतिः सुखम् ।।

सुभाषितार्णवः ।

धर्मस्य फलमिच्छन्ति धर्मं नेच्छन्ति मानवाः ।
फलं नेच्छन्ति पापस्य पापं कुर्वन्ति यत्नतः ।।

सुभाषितार्णवः ।

न मौनं वाग्मिनां शस्तं वाक्कलाकुशलात्मनाम् ।
अकूजन् कोकिलो लोके काकोऽयमिति मन्यते ।। (ज्ञायते)

सुभाषितार्णवः ।

द्रुमोद्भवं हन्ति विषं न हि द्रुमं
न वा भुजङ्गप्रभवं भुजङ्गमम् ।
अदः समुत्पत्तिपदं दहत्यतो
दाहोल्वणं क्रोधहलाहलं महत् ।।

सुभाषितार्णवः ।

आकरः कारणं जन्तोर्दौर्जन्यस्य न जायते ।
कालकूटः सुधासिन्धोः प्राणिनां प्राणहारकः ।।

दृष्टान्तशतकम् ।

उत्सवादुत्सवं यान्ति स्वर्गात् स्वर्गं सुखात् सुखम् ।
श्रद्दधानाश्च दान्ताश्च धनाढ्याः शुभकारिणः ।।

महाभारतम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बन्धमात्र एवैषा षष्ठ्युत्पन्ना तथापि तु।
विशिष्टनिष्ठता तस्या भाष्यकारेण वर्ण्यते ॥

Amalānanda in his *Vedāntakalpataru* (N. S. Press, pp. 44-45) says :

पाणिनिः किल "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" [२।१।३६] इति तादर्थ्यसमासं सस्मार। चतुर्थ्यन्तशब्दार्थस्तच्छब्देन परामृश्यते। तस्मै इदम् तदर्थम्। यथा कुण्डलाय हिरण्यमित्यत्र कुण्डलं चतुर्थ्यन्तशब्दार्थस्तच्छेषो हिरण्यम्। तत्र कुण्डलशब्दश्चतुर्थ्यन्तः कुण्डलशेषवाचिना हिरण्यशब्देन समस्यते—कुण्डलहिरण्यमिति। तथार्थशब्दादिनापि ब्राह्मणार्थं पय इत्यादि द्रष्टव्यम्। कात्यायनेन त्वयं समासो प्रकृतिविकृत्योर्नियमितः—"चतुर्थी तदर्थमात्रेणेति चेत्तर्हि सर्वत्र प्रसङ्गोऽविशेषात्। प्रकृतिविकृत्योरिति चेदश्वघासादीनामुपसंख्यानम्" [२।१।३६।१, ३] इति।

Compounds with final datives are found not only in all stages of Sanskrit, but also in Greek, Latin, Gothic, English and other Indo-European languages. In Sanskrit we have : आत्मनेपदम्, परस्मैपदम्, पादोदकम्, तपोवनम्, क्रीड़ापर्वतः, लीलालयः, लीलाकमलम्, शयनपर्यङ्कः, बलिपुष्पम्, विश्रामस्थली etc. In the Avesta *dānu-dāta* occurs in the sense of 'created for all creatures'. In Gothic we have *figgra-gulth* 'finger-ring', *lukarna-statha* 'candle-stick', *weina-gards* 'vineyard', *mo:ta-staths* 'toll-place', *fo:tu-baurd* 'foot-board' etc.

The distinction between तादर्थ्ये चतुर्थी and सम्बन्ध-सामान्ये षष्ठी is, no doubt, hard to discern in some cases*. We should, therefore, dissolve as चतुर्थी compounds all words in which the first member retains its own independent accent and as षष्ठी compounds those which accent the second member on the final

---

* Thus in Bengali we generally say घोँड़ार घास 'the horse's grass' and not घोँड़ार जन्य घास 'grass for the horse'.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

syllable. *Brahmaudana', as'vayūpa'* etc. are to be explained as षष्ठी compounds*.

* यथा लौकिकवैदिकेषु *

प्रियतद्धिता दाक्षिणात्याः, यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवदिकेष्विति प्रयुञ्जते। अथवा युक्त एवात्र तद्धितार्थः, यथा लौकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावद् अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्या ग्राम्यसूकर इत्युच्यते। भक्ष्यं च नाम क्षुत्प्रतीघातार्थमुपादीयते, शक्यं चानेन श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्। तत्र नियमः क्रियते—इदं भक्ष्यम् इदमभक्ष्यम् इति। तथा खदात् स्त्रीषु प्रवृत्तिभवति। समानश्च खेदविगमो गम्यायां चागम्यायां च। तत्र नियमः क्रियते—इयं गम्या, इयमगम्येति।

Just as we find in matters secular and Vedic.

The Southerners are fond of Taddhita suffixes, they use "yathā laukika-vaidikeṣu" instead of "yathā loke Vede ca". Or the sense of the Taddhita suffix is really appropriate here, "yathā laukika-vaidikeṣu" meaning "yathā laukikeṣu vaidikeṣu ca kṛtānteṣu" i. e. as in popular and Vedic statements. People say the domestic fowl is not fit for food, the domestic pig is not fit for food. Now food is taken for the removal of hunger and hunger can also be removed with the flesh of dogs and similar other animals. Restriction is, therefore, made in this matter—

---

* The view that final datives are compounded with समर्थ सुबन्त words, but in such cases the compounds become oxytone would appear to be in keeping with the best usage, but it is difficult to deduce this view from the rules of Pāṇini. Vāmana has recourse to an iṣṭi and says: प्रकृतिविकारभावे स्वरोऽयमिष्यते under चतुर्थी तदर्थे vi. 2. 43.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

this is fit food, this is not fit food. Similarly desire for women arises from sexual appetite, and the gratification of the appetite is the same with women fit for intercourse and those that are not so fit (i.e., with those women with whom intercourse is permitted by the S'āstras and with those with whom it is not so permitted). A restriction is made in this matter, this woman is fit for intercourse, this woman is not.

यथा लौकिकवैदिकेषु occurs several times in the Vārttikas and in each case the Bhāṣya is interesting. We shall deal with all these cases in the Appendix. लौकिकवैदिकेषु is used in the sense of लौकिकेषु वैदिकेषु च वाक्येषु and consequently does not point to any predilection for Taddhita suffixes on the part of Kātyāyana.

प्रियतद्धिताः इति। नायमपशब्दः, किन्तु ये लोकवेदयोर्भवा अवयवास्त लोकवेदशब्दाभ्यामभिधातुं शक्यन्ते। आधाराधेयभावकल्पनया तु तद्धितप्रयोगः प्रियतद्धितत्वनिमित्तः। यथा कश्चिद्वनस्पतय इति प्रयुङ्क्ते कश्चिद्वानस्पत्यमिति समूहप्रत्ययान्तम्। कैयटः।

प्रियतद्धिता दाक्षिणात्याः—In this connexion the following extract from Rājas'ekhara's *Kāvyamīmāṃsā* will be found interesting: तद्धि शास्त्रं प्रायोवादो यदुत तद्धितमूढाः पाणिनीयाः*। माञ्जिष्ठं रौचनिकं सौरं सैन्धवं वैयासमिति तद्धितान्ताः। प्रातिपदिक-

* It it hardly correct to say that the followers of Pāṇini are deficient in the knowledge of Taddhita suffixes. Pāṇini devotes two entire chapters out of eight to the treatment of Taddhita. The dictum, if it has come down correctly, would point to the fact that the predecessors of Pāṇini used to devote much greater space to the consideration of the secondary suffixes than Pāṇini ever did. We, however, generally regard the followers of the Kalāpa school as ignorant of Taddhita: कालापास्तद्धिते मूढाः.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषया चेयम्। कृद्वृत्तिश्च धातुविषया। कर्त्ता हर्ता कुम्भकारः नगरकार इति कृदन्ताः। तिङ्वृत्तिर्दशधा दशलकारीभेदेन।...तदिदमित्थङ्कारं पञ्चप्रकारमपि पदजातं मिथः समन्वीयमानमानन्त्याय कल्पते। तज्जन्मा चैष विदुषां वादो यत् किल दिव्यं समासहस्रं बृहस्पतिर्वक्ता शतक्रतुरध्येता तथापि नान्तः शब्दराशेरासीत्। तत्र दयितसुब्वृत्तयो विदर्भाः। वल्लभ-समासवृत्तयो गौड़ाः। प्रियतद्धिता दाक्षिणात्याः। कृत्प्रयोगरुचय उदीच्याः। अभीष्टतिङ्वृत्तयः सर्वेऽपि सन्तः।

अभक्ष्यो ग्राम्यकुक्कुटः—See p. 37. Cf. Bodhāyana Dharma Sūtra i. 5. 127, 129 अभक्ष्याः पशवो ग्राम्याः, तथा कुक्कुटसूकरम्। The quotation on p. 37 should read: भक्ष्याः श्वाविड्-गोधा-शश-शल्यक-कच्छप-खड्गाः खड्गवर्जाः पञ्च पञ्चनखाः।

शक्यं चानेन श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्—The gerundive शक्यम्, though connected with क्षुत् which is fem., is yet neut. This has caused a good deal of headache to grammarians. But the fact is in the vast majority of cases शक्य when used at the beginning of a sentence agrees with a neuter singular noun and consequently takes the form of शक्यम्. So people came to think that whenever शक्य is used at the beginning of a sentence it must be शक्यम्. Later writers like Kālidāsa use शक्य and शक्यम् acc. to the exigencies of metre. Vāmana says in his Kāvyālaṃkārasūtra: शक्यमिति रूपं विलिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमात् v. 2.22 and explains: शकेः शकिसहोश्च [३।१।९९] इति कर्मणि यति कृते शक्यमिति रूपं भवति। विलिङ्गवचनस्यापि विरुद्धलिङ्गवचनस्यापि कर्माभिधायां कर्मवचने सामान्योप-क्रमात् विशेषानपेक्षायामिति। यथा—

शक्यमोषधिपतेर्नवोदया कर्णपूररचनाकृते तव।
अप्रगल्भयवसूचिकोमलाश्छेत्तुमग्रनखसम्पुटैः कराः॥ [कुमार० ८।६२]

इति। अत्र च भाष्यकृद्वचनं लिङ्गम्। "शक्यं च श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्" इति। न चैकान्तिकः सामान्योपक्रमः, तेन "शक्या भङ्क्तुं झटिति बिसिनीकन्दवच्चन्द्रपादाः" इत्यपि भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

S'rīmatī Mālatī Devī explains this in her commentary on the Kāvyālamkārasūtravṛtti thus :

"द्रष्टुं शक्यमयोध्यायां नाविद्वान्न च नास्तिकः । [रा १।६।८]
द्रष्टुं शक्यमयोध्यायां नापि राजन्न भक्तिमान् । [१।६।१६]
शक्यमापतितः सोढुं प्रहारो रिपुहस्ततः । [२।६२।१६]
त्वं तु धर्मादतिक्रान्तः कथं शक्यमुपेक्षितुम् । [४।१८।२४]
शक्यमम्बरमारुह्य मेघसोपानपङ्क्तिभिः ।
कुटजार्जुनमालाभिरलङ्कर्तुं दिवाकरः ॥ [४।२८।४]
शक्यमञ्जलिभिः पातुं वाताः केतकगन्धिनः । [४।२८।८]
न शक्यं मामवज्ञाय प्रवेष्टुं नगरी त्वया । [५।३।२९]
न शक्यमद्य ते द्रष्टुं पुरीयं वानराधम । [५।३।३६]
न शक्यं ते बहुत्वात्तु संख्यातुं लघुविक्रमाः । [६।२७।४८]
शक्यं भुजाभ्यामुद्धर्तुं न संख्ये भरतानुजः । [६।५९।१११]

इत्यादिरामायणप्रयोगेषु,

स च दोषः प्रयत्नेन न शक्यमतिवर्तितुम् । [महाभा वन० २९३।१२]
अक्षांश्च दृष्ट्वा शकुनेर्यथावत् कामानुकूलानयुजो युजश्च ।
शक्यं नियन्तुमभविष्यदात्मा मन्युस्तु हन्यात् पुरुषस्य धैर्यम् ॥ [३४।५]
न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः [गी० १८।११]

इत्यादिभारतप्रयोगेषु—

न चासौ दुर्बलेनाप्तुं शक्यमित्यागतादरः । [बु० च० १२।९९]
शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम् ।
अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः ॥ [शकुन्तला० ३।४]
एवं हि प्रणयवती सा न शक्यमुपेक्षितुं कुपिता [मालविका ३।२३]

दृष्टौ हतं मन्मथवाणपातैः
शक्यं विधातुं न निमील्य चक्षुः ।
ऊरू विधात्रा नु कृतं कथं ता-
वित्यास तस्यां सुमतेर्वितर्कः ॥ [जानकीहरण १।२९]

इति लौकिकप्रयोगेषु च शक्यमिति पदं भिन्नलिङ्गवचनैरन्वितमुपलभ्यते । तत्र भिन्नलिङ्गवचनत्वात् सामानाधिकरण्यं कथं घटेतेत्याशङ्क्योपपत्तिः प्रदर्श्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शक्यं यत् किञ्चिदस्तीति सामान्येनोपक्रमे किं तच्छक्यमित्याकाङ्क्षायां विशेषरूपो वाक्यशेषः[1]। अत्र च "शक्यं चानेन श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्", "शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम्", "शक्यं चानेन यत्किञ्चिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्धुम्" ति पस्पशाप्रयोगा लिङ्गम्। अत्र कैयटः—शकेः कर्मसामान्ये लिङ्गसर्वनामनपुंसकयुक्ते कृत्यप्रत्ययः। ततः पदान्तरसम्बन्धादुपजायमानमपि स्त्रीत्वं बहिरङ्गत्वादन्तरङ्गसंस्कारं न बाधते इति शक्यं क्षुदित्युक्तम्। यदा तु पूर्वमेव विशेषविवक्षा तदा शक्या क्षुदिति भवत्येव। यदा तु प्रतिघातस्यैव क्षुत् कर्म, शकेस्तु प्रतिघातस्तदा क्षुधं प्रतिहन्तुं शक्यमिति भवति।" [ननु कर्मणि कृत्ये क्षुत्सामानाधिकरण्येन शक्येति स्यात्, न तु शक्यमिति, अत आह—शकेरिति। लिङ्गेति। विशेष्यलिङ्गसर्वशब्दानां सामान्यविवक्षायां नपुंसकलिङ्गत्वमिति न्यायार्थः। ननु सामान्यविवक्षायाँ नपुंसकत्वेऽपि क्षुत्सामानाधिकरण्ये स्त्रीत्वात् टाप् स्यादत आह—तत इति। अन्तरङ्गत्वं पदान्तरानपेक्षत्वात्। तर्हि शक्या क्षुत् प्रतिहन्तुमिति कदापि न भवतीत्याशङ्क्य, भवति प्रथममेव विशेषविवक्षायाम्, इत्याह—यदेति। एवं क्षुधः शकिकर्मत्वे प्रयोगद्वयमुक्त्वा तस्याः प्रतिघातकर्मत्वविवक्षायां प्रयोगान्तरमाह—यदा त्विति। अन्नंभट्टः। ननु प्रधानक्रियानिरूपितशक्तेरभिधाने गुणक्रियानिरूपितशक्तेरनभिहिताया अभिहितवत् प्रकाशस्य "स्वादुमि णमुल्" [३।४।२६] इत्यत्र वक्ष्यमाणत्वेन कथमेतदिति चेन्न। प्रधानतिङन्तार्थक्रियानिरूपितशक्तेरेवायं स्वभावो यत् स्वसमानाधिकरणगुणशक्तेरभिहितवत् प्रकाश इत्यभिमानात्। वस्तुत इदमयुक्तमेवेति स्वादुमीत्यत्र निरूपयिष्यामः। नागेशः।

प्रधानाप्रधानविषये हरिकारिके—

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते।
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्तापि प्रतीयते ॥ इति।]

अत एव "शक्यं दिवं चार्जयितुं वसुधामपि शासितुम्" [४।१८।५८ [इति रामायणप्रयोग उपपद्यते।

---

[1]Hence Bhartṛhari says : सामान्येनोपक्रमो विशेषेणाभिधानम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमाङ्ग्लभाषायामपि Who did you see there? I don't know who you mean इत्यादयः प्रयोगा उपपद्यन्ते।"*

श्वमांसादिभिरपि क्षुत् प्रतिहन्तुम्—"To eat dog's flesh was a last resort of despair and hunger. RV. iv.18.3. Later *S'vapaca* ('dog-cooking') denotes a degraded caste." *Vedic Index*.

3 is here a misprint for 13. The stanza runs thus:

अवर्त्या शुन आन्त्राणि पेचे न देवेषु विविदे मर्डितारम्।
अपश्यं जायाममहीयमानामधा मे श्येनो मध्वा जभार॥

"In deep distress, I cooked a dog's intestines. Among the Gods I found not one to comfort. My consort I beheld in degradation. The falcon then brought me the pleasant Soma." (Griffith).

Griffith says in his note: "This appears to be Vāmadeva's excuse for having in his utmost need cooked and eaten, or desired to eat, impure flesh. 'So Manu has, Vāmadeva who well knew right and wrong, was by no means rendered impure, though desirous, when oppressed with hunger, of eating the flesh of dogs for the preservation of his life. X, 106'—Wilson."

श्वमांसमिच्छन्नार्त्तोऽत्तुं धर्माधर्मविचक्षणः।
प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान्॥

Cf. also Rāmāyaṇa I. 62. 14:

अकार्यमिव पश्यामः श्वमांसमिव भोजने।

खेदात्—खेदो नामेन्द्रियस्य स्वविषये प्रवर्तमानस्य निग्रहं प्रत्यसामर्थ्यम्। अथवा खेदयतीति खेदः, राग एवोच्यते।...अथवा दैन्यं खेदः। भर्तृहरिः।

Khid means to tear, to be distressed, hence *kheda* means a feeling of tearing at the heart, lassitude, depression, ennui. Rājas'ekhara in his *Kāvyamīmāṁsā* uses the term *ārti*. *Kheda* occurs in the well-known stanza about *Vidyā*: कान्तेव चाभिरमयत्यपनीय खेदम्.

* *Calcutta Oriental Journal*, Vol. III, no. 4.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदे खल्वपि पयोव्रतो ब्राह्मणो यवागूव्रतो राजन्य आमिक्षाव्रतो वैश्य इत्युच्यते। व्रतं च नामाभ्यवहारार्थमुपादीयते। शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम्। तत्र नियमः क्रियते। तथा बैल्वः खादिरो वा यूपः स्यादित्युच्यते। यूपश्च नाम पश्वनुबन्धार्थमुपादीयते। शक्यं चानेन यत् किञ्चिदपि काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्धुम्। तत्र नियमः क्रियते। यथाग्नौ कपालान्यधिश्रित्याभिमन्त्रयते "भृगूणामङ्गिरसां[1] तपसा तप्यध्वम्" [वाजसनेयी संहिता १।१८]। अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि सन्तापयति। तत्र च नियमः क्रियते—एवं क्रियमाणमभ्युदयकारि भवतीति।

एवमिहापि समानायामर्थगतौ[2] शब्देन चापशब्देन च धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देनेति। एवं क्रियमाणमभ्युदयकारि भवतीति।

In the Veda also it is laid down—"payo-vratah Brāhmaṇah" (during rituals) a Brahmaṇa should live on milk-

---

[1] Printed editions generally add "gharmasya" after "aṅgirasām", but it is not found either in VS. or in S'B.

[2] This is undoubtedly the correct reading and has the support of the great commentator Bhartṛhari though most printed editions have **अर्थावगतौ**, because **गति** in the sense of **ज्ञान** became obsolete later on, in spite of the well-known dictum **सर्वे गत्यर्थाः प्राप्त्यर्था ज्ञानार्थाश्च.** But Bhāṣyakāra always uses **अर्थगति** in the sense of **अर्थावगति** as in the case of the Paribhāṣā **नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिः.** Nobody would dream of changing **अर्थगतिः** into **अर्थावगतिः** here. **अर्थगत्यर्थः शब्दप्रयोगः** is also fairly well-known, though when we wrote it in the Mañjūṣā, the proof-reader thought it was an error and corrected **अर्थगत्यर्थः** into **अर्थावगत्यर्थः.**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

diet, "Yavāgū-vrato rājanyah" a Kṣatriya on barley diet and "āmikṣā-vrato vais'yah" a Vais'ya on Āmikṣā diet (i e. a mixture of boiled and coagulated milk). Now "Vrata" is that which is taken as food and one can have rice and meat also for his "vrata", a restriction is made in the matter. Similarly it is enjoined : The Yūpa (sacrificial post) should be made of the wood of the Bilva or the Khadira tree. The sacrificial post is taken for the tying of the animal. And the animal can be tied by planting erect or not any piece of wood. A restriction is made therein. Similarly, (it is enjoined) that placing the potsherds on fire one utters the mantra : bhṛgūṇām aṅgirasiṃ tapasī tapyadhvam. Be you heated with the heat of the Bhṛgus and Aṅgirases. Even without the mantra the fire whose function is "to burn" heats the potsherds Here also a restriction is made—if it is done in this way, it becomes conducive to prosperity.

Exactly in the same way here also though the meaning is conveyed in the same way by the correct form, a restriction is made in the matter of religious merit—the sense is to be conveyed by correct words and not by corruptions. If it is so done it is conducive to prosperity.

पयोव्रतो ब्राह्मण:—Patañjali probably had in mind Taittirīya Āraṇyaka ii. 8.1 : **पयो ब्राह्मणस्य व्रतम्, यवागू राजन्यस्यामिक्षा वैश्यस्य ।** We find a more elaborate statement in the Taittirīya Saṃhitā :

यवागू राजन्यस्य व्रतम्, क्रूरेव वै यवागूः क्रूरो राजन्यो वज्रस्य रूपम् समृद्ध्यै । आमिक्षा वैश्यस्य पाकयज्ञस्य रूपं पुष्ट्यै । पयो ब्राह्मणस्य । तेजो वै ब्राह्मणस्तेजः पयः, तेजसैव तेजः पय आत्मन् धत्ते । (vi. 2. 5. 2-3)

पयोव्रतः—"one who undergoes a vow (to subsist) on (nothing but) milk." **व्रतशब्देनात्राभ्यवहार उच्यते । पय एव व्रतम् अभ्यवहारो यस्य स पयोव्रतः ।**

आमिक्षा—"आमिक्षा स शृतोष्णे या क्षीरे स्याद्दधियोगतः"—अमरः । शृते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वथिते तप्ते च पयसि दध्नो योजनात् या स्यात्। भानुजिः। A mess of clotted curds.

बैल्वः खादिरो वा यूपः स्यात्—This probably gives the substance of AB. vi. 1 :

खादिरं यूपं कुर्वीत स्वर्गकामः। खादिरेण वै यूपेन देवाः स्वर्गं लोकमजयन् तथैवैतद् यजमानः खादिरेण यूपेन स्वर्गं लोकं जयति। बैल्वं यूपं कुर्वीतान्नाद्यकामः पुष्टिकामः। समां समां वै बिल्वो गृभीतस्तदन्नाद्यस्य रूपम् आ मूलाच्छाखाभिरनुचितस्तत् पुष्टेः। पुष्यति प्रजां च पशूंश्च य एवं विद्वान्बैल्वं यूपं कुरुते।...पालाशं यूपं कुर्वीत तेजस्कामो ब्रह्मवर्चसकामः, तेजो वै ब्रह्मवर्चसं वनस्पतीनां पलाशः। तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान् पालाशं यूपं कुरुते।

"Of Khadira wood should he make the post who desires heaven, by means of a post of Khadira the gods won the world of heaven; thus verily also the sacrificer by a post of Khadira wins the world of heaven. Of Bilva should he make the post, who desires proper food and desires prosperity. Year by year is Bilva taken; this is the symbol of proper food. It should be covered with branches up to the root, this is (the symbol) of prosperity. He prospers in offspring and cattle who knowing thus makes the post of of Bilva....Of Palās'a should he make the post, who desires brilliance and desires splendour. The Palās'a is the brilliance and splendour of the trees; brilliant and resplendent he becomes who knowing thus makes the post of Palās'a." KEITH.

उच्छ्रित्यानुच्छ्रित्य—Cf. AB. vi. i: यज्ञेन वै देवा ऊर्ध्वाः स्वर्गं लोकमायन्, तेऽबिभयुः—इमं नो दृष्ट्वा मनुष्याश्च ऋषयश्चानु प्रज्ञास्यन्तीति। तं वै यूपेनायोपयन्। तं यद् यूपेनैवायोपयन् तद् यूपस्य यूपत्वम्। तमवाचीनाग्रं निमित्योर्ध्वा उदायन्, ततो वै मनुष्याश्च ऋषयश्च देवानां यज्ञवास्त्वभ्यायन्—यज्ञस्य किञ्चिदेषिष्यामः प्रज्ञात्या इति। ते वै यूपमेवाविन्दन्—अवाचीनाग्रं निमितम्। ते विदुरनेन वै देवा यज्ञमयूयुपन्निति। तमुत्खायोर्ध्वं न्यमिन्वन्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततो वै ते प्र यज्ञमजानन् प्र स्वर्गं लोकम् । तद् यद् यूप ऊर्ध्वो निमीयते यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्यै ।......वज्रो वै यूपः, स एष द्विषतो वध उद्यतस्तिष्ठति ।·

"By means of the sacrifice the gods went upwards to the world of heaven; they were afraid, 'Seeing this of us, men and seers will track us.' Them they obstructed by means of the sacrificial post, in that they obstructed them by means of the post, that is why the post has its name. Having fixed it point down, they went upwards. Then men and seers came to the place of sacrifice of the gods 'Let us seek something to track the sacrifice. They found the post only, established with point downwards. They perceived, 'By this the gods have blocked the sacrifice.' Having dug it out they fixed it upwaids; then did they discern the world cf heaven. In that the post is fixed upright, (it is) to track the sacrifice, to reveal the world of heaven. . .The post is a bolt; it stands erect as a weapon against the foe." KEITH.

भृगूणामङ्गिरसां तपसा तप्यध्वम्—भृगोरपत्यानि बहूनि भृगवः । तद्राजस्य बहुषु लुक् ।

अस्त्यप्रयुक्तः[1]

सन्ति वै शब्दा अप्रयुक्ताः । तद् यथा ऊष तेर चक्र पेच इति ।

किमतो यत् सन्त्यप्रयुक्ताः ?

प्रयोगाद्धि भवाञ्च्छब्दानां साधुत्वमध्यवस्यति । य इदानीमप्रयुक्ता नामी साधवः स्युः । इदं तावद्विप्रतिषिद्धम्—यदुच्यते सन्ति वै शब्दा अप्रयुक्ता इति । यदि सन्ति नाप्रयुक्ताः, अथाप्रयुक्ता न सन्ति । सन्ति

[1]This does not appear to be a separate Vārttika, but the first part of Vārttika 2 explained in advance.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चाप्रयुक्ताश्चेति विप्रतिषिद्धम्। प्रयुञ्जान एव खलु भवानाह—सन्ति शब्दा अप्रयुक्ता इति। कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात्।

Is but never used.

There exist words which are not used, e.g., *ūṣa, tera, cakra, peca.*

What if there exist words which are not used ?

You determine the correctness of words from usage. Now those which are not used cannot be correct.

To say that there are words which are not used is a contradiction in terms. If there are words, they cannot be not in use, and if they are not in use, they are not in existence. That there exist words and they are not used is a contradiction in terms. You use those words and in the same breath you assert that there are words which are not used. What other man of your type will now be an authority in the use of words ?

There are ideas to be expressed by words and so long as there is necessity in the world for the expression of these ideas, the words have to be used.

द्विधा सत्ता—प्रत्यक्षानुमानिकी चेति। तत्र प्रत्यक्षो दाधर्तिदर्धर्तीति। आनुमानिकी प्रकृतिप्रत्ययोपदेशेन। भर्तृहरिः। शास्त्रदृष्ट्या प्रकृतिप्रत्ययादि-सद्भावादनुमितसत्त्वाः, व्यवहारे तु न दृश्यन्ते। कैयटः।

एतेषु कश्चिदेव शब्दः कस्मिंश्चित् प्रयुज्यते, यथा पुरुषीशब्दः स्त्रीलिङ्गः क्वचिदप्रयुक्तो मैत्रावरुणीयानां कल्पे [cf. कात्यायनश्रौतसूत्र २४।६।८] प्रयुज्यते। भर्तृहरिः।

Cf. S'abara i. 1. 2: विप्रतिषिद्धमिदमुच्यते, ब्रवीति वितथञ्चेति। S'aṁkara on BAU. i. 2. 1: येन च कालेन घटस्य सम्बन्धो भविष्यतीत्युच्यते तस्मिन्नेव काले घटोऽसन्निति विप्रतिषिद्धमभिधीयते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैतद्विप्रतिषिद्धम् । सन्तीति तावद् ब्रूमः यदेताञ्छास्त्रविदः शास्त्रेणानुविदधते । अप्रयुक्ता इति ब्रूमो यल्लोकेऽप्रयुक्ता इति । यदप्युच्यते कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यादिति, न ब्रूमोऽस्माभिरप्रयुक्ता इति ।

किं तर्हि ?

लोकेऽप्रयुक्ता इति ।

ननु च भवानप्यभ्यन्तरो लोके ?

अभ्यन्तरोऽहं लोके न त्वहं लोकः ।

It is *not* a contradiction in terms. We say they exist because people well acquainted with the science make provisions for them with the science; and we say they are not used, because they are not used in the world (popular speech). As for your remark "what other man of your type will after this be an authority in the use of words" we do not say "not used by us."

What then ?

They are not in use in the world i.e., they are not current in popular speech.

Excuse me now, but you, too, are one among the people.

I am one among the people, but I am not the people.

कश्चेदानीम्...—यथैषा भवतो बुद्धिः किं ममोच्चारयतः, अनाप्तोऽहमितीदमाह प्रोत्साहनार्थम् । मावमंस्था आत्मानम् । आप्तो भवानिति । कश्चेदानीमन्यो भवज्जातीयकः । कोऽन्यो भवति विद्वत्तरः ? भर्तृहरिः । कश्चेदानीमित्युपहासपरम् । कैयटः । कश्चेदानीमित्यस्यानुपयोगं परिहरति—उपहासेति । परीक्षकप्रयोगो न प्रमाणम् , किन्तु पामरप्रयोग एवेति शङ्कोपहासेन निरस्यते । अन्नंभट्टः । ननु मया प्रयुक्तश्चेत् किम् ? तत्र सोपहासमाह—कश्चेदानीमिति । स्वयमेव प्रयोगं कृत्वा "सन्ति चाप्रयुक्ता" इत्यादीनां शब्दानां प्रयोगे साधुर्योग्यः स्यात् । त्वत्प्रयोगेणैव प्रयुक्तत्वावगमेऽप्रयुक्तत्वोक्तिर्विरुद्धेति भावः ।

न त्वहं लोक इति—यथा लोकोऽर्थावगमाय शब्दान् प्रयुङ्क्ते, नैवं मयैतेऽर्थे प्रयुक्ताः, अपि तु स्वरूपपदार्थकाः । कैयटः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्त्यप्रयुक्त इति चेन्नाथ शब्दप्रयोगात् ॥२॥

अस्त्यप्रयुक्त इति चेत् तन्न। किं कारणम्। अर्थे शब्दप्रयोगात्। अर्थे शब्दाः प्रयुज्यन्ते, सन्ति चैषां शब्दानामर्था येष्वर्थेषु प्रयुज्यन्ते।

"*Is but never used!*" *No, because of the use of words to convey meaning.*

To say "is, but never used" will not stand. Why? Because of the use of words to convey sense. Because words are used to convey sense, and to these words are attached the meanings in which they are used.

अप्रयोगः प्रयोगान्यत्वात् ॥३॥

अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः। कुतः? प्रयोगान्यत्वात्। यदेतेषां शब्दानामर्थेऽन्याञ्छब्दान् प्रयुञ्जते। तद् यथा ऊषेत्यस्य शब्दस्यार्थे क्व यूयमूषिताः, तेरेत्यस्यार्थे किं[1] यूयं तीर्णाः, चक्रेत्यस्यार्थे किं[1] यूयं कृतवन्तः, पेचेत्यस्यार्थे किं[1] यूयं पक्ववन्त इति।

Non-use, because of the use of other (words). It is also correct to speak of the non-use of these words. Why? Because of the use of other (words). Because people use other words in the senses conveyed by these words. Thus in the sense of the word "ūṣa" (you dwelt) they use "kva yūyam uṣitāḥ" (where did you dwell?), in the sense of "tera" "kiṃ yūyaṃ tīrṇāḥ" (what did you cross?), in the sense of "cakra" "kiṃ yūyaṃ kṛtavantah" (what did you do?) in the sense of "peca", "kiṃ yūyaṃ pakvavantah" (what did you cook?)

---

[1] The printed editions with the exception of Kielhorn read क्व for किम् in the last three sentences. As the reading किम् is decidedly better and as K. does not notice any variant, we have accepted the reading किम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अप्रयुक्ते दीर्घसत्त्रवत् ॥ ४ ॥

यद्यप्यप्रयुक्तास्तथाप्यवश्यं दीर्घसत्त्रवल्लक्षणेनानुविधेयाः । तद् यथा दीर्घसत्त्राणि वार्षशतिकानि वार्षसहस्रिकाणि च, न चाद्यत्वे कश्चिदप्याहरति[1], केवलम् ऋषिसम्प्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते ।

In the matter of non-used (words) it is like long sacrifices.

Though they are not used, they must necessarily be taught by the rules of the S'āstras like protracted sacrifices. Thus there are the protracted sacrifices extending over a hundred and a thousand years, but no one performs them at the present day, only the ritualists enjoin them in their S'āstras because the tradition handed down by seers is Dharma.

सर्वे देशान्तरे ॥५॥

सर्वे खल्वप्येते शब्दा देशान्तरे प्रयुज्यन्ते ।

न चैत उपलभ्यन्ते ।

उपलब्धौ यत्नः क्रियताम् । महान् हि शब्दस्य प्रयोगविषयः— सप्तद्वीपा वसुमती, त्रयो लोकाः, चत्वारो वेदाः साङ्गाः सरहस्या बहुधा विभिन्नाः, एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधाथर्वणो वेदः, वाकोवाक्यम्, इतिहासः, पुराणम्, वैद्यकमितेत्यावान्छब्दस्य प्रयोगविषयः । एतावन्तं शब्दस्य प्रयाग-विषयम् अननुनिशम्य सन्त्यप्रयुक्ता इति वचनं केवलं साहसमात्रम् ।

All in other countries.

---

[1] Most printed editions read **व्यवहरति**, but not only is **आहरति** the appropriate word here, it is also the reading of Kaiyaṭa, Annambhaṭṭa, Nāges'a and Kielhorn.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

All these words are used in other countries.

But they are never found.

Try to find them. Vast is the field for the use of words. Thus there is the earth with its seven islands, the three worlds, the four Vedas with their subsidiary studies and the Upaniṣads in all their varieties, the hundred and one branches of the Yajurveda, the Sāmaveda with its thousand paths, the Rigveda with its eleven branches, the Atharvaveda with its nine recensions, the book of catechism, history, Purāṇa and the science of medicine, this is the field for the use of words. To say that there are words which are not used without considering the vast field for the use of words is sheer rashness or foolhardiness.

"All rites with more than twelve pressing days are Sattras : the number of years they may be continued extends to thirty-six or more up to 1, 000." (Keith). The Sādhyānām Ayana Sattra extended over a hundred years and Vis'vasṛjām Ayana over a thousand. शतसंवत्सरं साध्यानाम्। सहस्रसंवत्सरं विश्वसृजाम् । कात्यायनश्रौतसूत्र २४।५।२३-२४. In such cases the Mīmāṃsakas take *years* to mean *days*. See Jaimini Sūtra vi. 7. 31-40.

सामवेदस्य किल सहस्रभेदा आसन्, अनध्यायेष्वधीयानास्ते शक्रेणाभिहताः प्रनष्टाः । चरणव्यूहपरिशिष्टम् ।

पैप्पलादास्तौदा मौदाः शौनकीया जाजला ब्रह्मवदा देवदर्शाश्चारणवैद्याश्च । अथर्ववेदभाष्यम् ।

स च वेदो बहुधा भिन्नः—सहस्रवर्त्मा सामवेदः सात्यमुग्रिराणायनादिभेदेन, एकशतमध्वर्यूणां काठकवाजसनेयकादिभेदेन, एकविंशतिर्बाह्वृच्या आश्वलायनैतरेयादिभेदेन, नवधाथर्वणः मोदकपैप्पलादकादिभेदेन । मेधातिथिभाष्यम् २।६

Vāko-vākya, 'dialogue', is the name given in the Brāhmaṇas to certain portions of the Vedic texts. In one place the *Brahmodya* is said to be a dialogue ; very probably in all the passages the Brahmodya is meant by this term.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Geldner's view is different: he sees in the Vākovākya an essential part of the Itihāsa-Purāṇa, the dialogue or dramatic element as opposed to the narrative portion. *Vedic Index*. "उच्यत इति वाकः पूर्वपक्षवचनम्। . . . उच्यते इति वाक्यम् उत्तरपक्षवचनम्। वाकश्च वाक्यं च, तयोः समाहारः वाकोवाक्यम्। सर्वो द्वन्द्वो विभाषैकवद् भवतीति समाहारः. In the S'āṃkara Bhāṣya on Chāndogya Upaniṣad vi. i. 2 the word is explained as तर्कशास्त्र.

एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते। तद् यथा शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एनमार्या भाषन्ते शव इति; हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते। दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु।

ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दा एतेषामपि प्रयोगो दृश्यते।

क्व ?

वेदे। सप्तास्ये रेवती रेवदूष [ऋ० सं० ५।५।१।४], यद्वो रेवती रेवत्यं तदूष*, यत्रा नरः श्रुत्यं ब्रह्म चक्र [ऋ० सं० १।१६५।११], यत्रा नश्चक्रा जरसं तनूनाम् [ऋ० सं० ९।८९।९]।

* In most MSS. and printed books the reading is यद्वो रेवती रेवत्यां तमूष which is manifestly incorrect. The correct reading is found in Kielhorn's edition where, however, सप्तास्ये रेवती रेवदूष is relegated to the variants. But since there are two examples of *cakra*, it is extremely likely that there were two examples of *ūṣa* also. Patañjali does not quote instances of the use of *tera* or *peca*. The latter, however, is mentioned again under iii. i. 91: पेच यूयं चक्र यूयमिति (Kielhorn, II, 73,5).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

And in this very vast-field for the use of words particular words are found used in particular senses in particular provinces. Thus the root *s'u* in the sense of motion is used in speech only in the country of the Kambojas. The Āryas use it in their speech in the sense of transformation, for instance, in the word "s'ava" (dead body). The root *hamma* is used in Surat and *raṅh* in Eastern and Central India. The Āryas, however, use the root *gam* alone. The root *dā* is used in the East in the sense of cutting, while the substantive "dātra" is used in the West*.

Again those words which, in your opinion, are never used are also found used.

Where ?

In the Veda. Thus *saptāsye revatī revad ūṣa* (On Saptāsya, ye have shone wealth, O wealthy ones), *yad vo revatī revatyaṃ tad ūṣa* (Shine on us that which is full of wealth, O wealthy ones), *yan me narah s'rutyaṃ brahma cakra* (the prayer worthy to be heard which, O heroes, you have made for me), *yatrā nas' cakrā jarasaṃ tanūnām* (wherein you have fixed the old age of our bodies.)

"The Kambojas were later settled to the north-west of the Indus and were known as Kambujiya in the old Persian Inscriptions. A teacher, Kāmboja Aupamanyava, pupil of Madragāra is mentioned in the Vaṃs'a Brāhmaṇa. This points to a possible connexion of the Madras, or more probably the Uttara Madras, with the Kambojas, who probably had Iranian as well as Indian affinities." *Vedic Index*. So *cyavati* probably became *s'avati* in Kambcja.

"*The Lancashire speaker, who, coming into the warm room, out of the winter cold, declares "I am starving" is not clamorous for food but for warmth ; the Londoner who made the same declaration would be asserting his intense hunger for food."

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Both ध्रवति and रंहति are read in the list of गतिकर्मक roots in in Nighaṇṭu. दाति is read in the list of दानकर्मक roots in the Nighaṇṭu.

This is based on *Nirukta* ii. 2 : शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते ।....विकारमस्यार्येषु भाषन्ते शव इति । दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु ।

The root *hamma* is read in the Dhātupāṭha as ह्रम हम्म मीमृ गतौ and रंह as रहि गतौ. Patañjali says : हम्मते हंसः (Kielhorn, Vol. III, p. 26, l. 15)

किं पुनः शब्दस्य ज्ञाने धर्म आहोस्वित् प्रयोगे ?

कश्चात्र विशेषः ?

ज्ञाने धर्म इति चेत् तथाधर्मः ॥ ६ ॥

ज्ञाने धर्म इति चेत्, तथाधर्मः* प्राप्नोति । यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति । यथैव शब्दज्ञाने धर्म एवमपशब्दज्ञानेऽप्यधर्मः । अथवा भूयानधर्मः प्राप्नोति । भूयांसो ह्यपशब्दा अल्पीयांसः शब्दाः । एकैकस्य शब्दस्य बहवोऽपभ्रंशाः । तद् यथा गौरित्यस्य गावी गोणी गोता गोपोतलिकेत्यादयोऽपभ्रंशाः ।

Now, does religious merit lie in (accrue from) the knowledge of words or their use ?

What is the differenee between the two ?

If religious merit [lies] in knowledge, so also does demerit.

Should it be held that religious merits accrue from knowledge, then it follows that demerit also accrues. He who knows the correct words also knows the corrupt forms. Just as knowledge of the correct words leads to religious merit, the knowledge of the corrupt forms gives rise to demerit. Nay, the demerits will be all the greater, for each correct

---

* तथाधर्मोऽपि—most printed books.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

word has many corrupt forms ; thus *gauh*, for instance, has *gāvī, goṇī, gotā, gopotalikā* etc. as its corruptions.

आचारे नियमः ॥ ७ ॥

आचारे पुनर्ऋषिर्नियमं वेदयते—तेऽसुरा हेऽलयो हेऽलय इति कुर्वन्तः पराबभूवुरिति ।

Restriction in use.

In the matter of *use*, however, restriction is conveyed by the sage (Veda) : those demons saying "he'layo helayah" underwent defeat.

See p. 10.

अस्तु तर्हि प्रयोगे ।

प्रयोगे सर्वलोकस्य ॥ ८ ॥

यदि प्रयोगे धर्मः सर्वो लोकोऽभ्युदयेन युज्येत ।

कश्चेदानीं भवतो मत्सरो यदि सर्वो लोकोऽभ्युदयेन युज्येत ?

न खलु कश्चिन्मत्सरः । प्रयत्नानर्थक्यं तु भवति । फलवता च नाम प्रयत्नेन भवितव्यम् । न च प्रयत्नः फलाद् व्यतिरेच्यः ।

ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान् प्रयोक्ष्यन्ते, त एव साधीयोऽभ्युदयेन योक्ष्यन्ते ।

व्यतिरेकोऽपि व लक्ष्यते--दृश्यन्ते हि कृतप्रयत्नाश्चाप्रवीणाः, अकृतप्रयत्नाश्च प्रवीणाः । तत्र फलव्यतिरेकोऽपि स्यात् ।

Let it be in the use then, i. e., let us accept the view that religious merit accrues not from the knowledge of words but from their use.

In the case of use, of the whole world.

If religious merit lies in the use of words, then the whole world will be endowed with well-being,

Now, why should you be filled with jealousy at the prospect of the whole world being endowed with well-being ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

No, no, no jealousy. It is merely that the effort will be fruitless. I hope you will agree with me (*nāma*) that effort should be attended with fruits. Effort should never be dissociated from its fruits.

Excuse me, but those who have made efforts will make use of words in a better way and will be be better endowed with well-being.

Exceptions are also met with. We do come across cases where those who have taken pains are found to be bunglers and those who have taken no pains experts. In these cases there is the reversal of the fruits also (those who have taken no pains reaping a rich harvest and those who have taken pains going without anything)*.

If so merit lies neither in knowledge alone nor in use alone.

न च प्रयत्नः फलाद्व्यतिरेच्यः—यदि प्रयत्नेन विना फलं स्यात् प्रयत्नस्य वैयर्थ्यमापद्येत । कैयटः । व्याकरणाध्ययनं विनापि साधुशब्दप्रयोगात् फलसिद्धौ तद्वैयर्थ्यं दुर्वारम् । अन्नंभट्टः ।

साधीयः, the comparative of **साधु**, is an adverb in the sense of **सम्यक्**.

एवं तर्हि नापि ज्ञान एव धर्मो नापि प्रयोग एव ।

किं तर्हि ?

शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ॥ ९ ॥

शास्त्रपूर्वकं यः शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते ; तत्तुल्यं

---

*"The race is not always to the swift, nor the battle to the strong."

"प्रयत्ने समके केचिदत्र सुराः फलभागिनः ।
क्षीरोदमथनाद्देवैरमृतं प्रापि नासुरैः ॥" दृष्टान्तशतकम् ॥ १०

"स्त्रियो हि नाम खल्वेता निसर्गादेव पण्डिताः ।
पुरुषाणां तु पाण्डित्यं शास्त्रेणैवोपदिश्यते ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदशब्देन। वेदशब्दा अप्येवमभिवदन्ति "योऽग्निष्टोमेन* यजते य उ चैनमेवं वेद", "योऽग्निं नाचिकेतं चिनुते च उ चैनमेवं वेद" [तै० ब्रा० ३।११।७।२] इति।

What then ?

Well-being in use preceded by science, that is like veda-s'abda.

He who uses words after having first gone through the science of grammar is endowed with well-being, this is like the veda-s'abda. The words of the Veda also declare in this way: "Yo' agniṣṭomena yajate ya u cainam evaṃ veda". (He who performs the Agniṣṭoma sacrifice and he who knows it in this way [gains such and such rewards]). "Yo' gnim nāciketaṃ cinute ya u cainam evaṃ veda" (he who arranges the sacrificial fire named Nāciketa and he who knows (how to do) it [gains such and such rewards].

वेदशब्द is here taken in the sense of 'the Vedas' or 'what is stated in the Vedas'. **"वेदोऽपि ज्ञानपूर्वकानुष्ठानात् फलमिति वदति।" "विदुषः कर्मण्यधिकारात्।" "यद्वा वेदशब्दा वेदार्था अप्येवमेव वदन्ति।"** In what follows the expression is taken to mean 'words in the shape of the Vedas' (**वेद एव शब्दः**).

अपर आह—तत्तुल्यं वेदशब्देनेति—यथा वेदशब्दा† नियमपूर्वमधीताः फलवन्तो भवन्ति, एवं यः शास्त्रपूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति।

Another says: "tat tulyaṃ veda-s'abdena" means—Just as the words of the Veda become attended with fruits when

---

* **[तरति ब्रह्महत्यां] योऽश्वमेधेन यजते य उ चैनमेवं वेद इति विकल्पश्रुतेः। बृहदारण्यकभाष्यम् १।१।१ तन्त्रवार्त्तिकम् १।३।८**

† Did Patañjali write **नियमपूर्वकम्** ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

they are studied observing the proper restrictions, even so he who uses words in conformity with the science of grammar is endowed with well-being.

अथवा पुनरस्तु ज्ञान एव धर्म इति।

ननु चोक्तं ज्ञाने धर्म इति चेत् तथाधर्म इति।

नैष दोषः। शब्दप्रमाणका वयम्, यच्छब्द आह—तदस्माकं प्रमाणम्। शब्दश्च शब्दज्ञाने धर्ममाह, नापशब्दज्ञानेऽधर्मम्। यच्च पुनरशिष्टाप्रतिषिद्धं नैव तद्दोषाय भवति, नाभ्युदयाय। तद् यथा हिक्कितहसितकण्डूयितानि नव दोषाय भवन्ति, नाभ्युदयाय *।

Or, let us go back to the view—religious merit lies in knowledge alone.

Excuse me, but it has been said, if religious merit lies in knowledge, religious demerit also lies therein.

---

*अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु यथा लौकिकवैदिकेषु। अनुकरणं हि शिष्टस्य साधु भवति। अशिष्टाप्रतिषिद्धस्य वा नैव तद्दोषाय भवति नाभ्युदयाय। यथा लौकिकवैदिकेषु। यथा लौकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावद्। य एवमसौ ददाति य एवमसौ यजते य एवमसावधीत इति तस्यानुकुर्वन् दद्याच्च यजेत चाधीयीत च सोऽप्यभ्युदयेन युज्यते। वेदेऽपि। य एवं विश्वसृजः सत्त्राण्यध्यासत इति तेषामनुकुर्वंस्तद्वत् सत्त्राण्यध्यासीत सोऽप्यभ्युदयेन युज्यते॥ अशिष्टाप्रतिषिद्धम्। य एवमसौ हिक्कति य एवमसौ हसति य एवमसौ कण्डूयतीति तस्यानुकुर्वन् हिक्केच्च हसेच्च कण्डूयेच्च नैव तद्दोषाय स्यान्नाभ्युदयाय। यस्तु खल्वेवमसौ ब्राह्मणं हन्त्येवमसौ सुरां पिबतीति तस्यानुकुर्वन् ब्राह्मणं हन्यात् सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात। विषम उपन्यासः। यश्चैवं हन्ति यश्चानुहन्ति उभौ तौ हतः। यश्च पिबति यश्चानुपिबति, उभौ तौ पिबतः। यस्तु खल्वेवमसौ ब्राह्मणं हन्ति, एवमसौ सुरां वा पिबतीति तस्यानुकुर्वन् स्नातानुलिप्तो माल्यगुणकण्ठः कदलीस्तम्भं छिन्द्यात्, पयो वा पिबेत् न स मन्ये पतितः स्यात्। एवमिहापि य एवमसावपशब्दं प्रयुङ्क्ते इति तस्यानुकुर्वन्नपशब्दं प्रयुञ्जीत सोऽप्यपशब्दभाक् स्यात्। अयं त्वन्योऽपशब्दपदार्थकः शब्दो यदर्थ उपदेशः कर्तव्यः। द्वितीयस्य शिवसूत्रस्य भाष्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

This difficulty does not arise. We hold the words of the Veda as our authority, what the words declare is our authority. And the words declare religious merit accrues from a knowledge of correct words; they do not declare that religious demerit accrues from a knowledge of corrupt words. Again that which is neither enjoined nor forbidden conduces neither to well-being nor to demerit, as, for instance, hiccoughing, laughing and scratching are neither conducive to demerit nor to well-being.

अथवाभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने। यो ह्यपशब्दाञ्जानाति शब्दानप्यसौ जानाति। तदेवं ज्ञाने धर्म इति ब्रुवतोऽर्थादापन्नं भवति--अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्म इति।

Or the knowledge of corrupt forms is the indispensable stepping stone to the knowledge of correct words, for he who knows the corrupt words knows also the correct words. This being the case, when it is said religious merit lies in the knowledge (of words) it is implied that religious merit lies in the knowledge of words preceded by a knowledge of corrupt forms.

अर्थादापन्नं भवति i. e., follows *a fortiori*, is obtained by **अर्थापत्ति**.

अथवा कूपखानकवदेतद् भविष्यति—तद् यथा कूपखानकः कूपं खनन् यद्यपि मृदा पांसुभिश्चावकीर्णो भवति, सोऽप्सु सञ्जातासु तत एव तं गुणमासादयति, येन स च* दोषो निर्हण्यते, भूयसा चाभ्युदयेन योगो भवति। एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धमस्तेन स च* दोषो निर्घानिष्यते[1], भूयसा चाभ्युदयेन योगो भविष्यति।

---

* Printed editions except K. read : **येन च स दोषः**.

[1] Cf. Bhaṭṭi I.22 : **घानिष्यते तेन महान् विपक्षः।**

निर्घानिष्यते—हन्तेरत्पूर्वस्य [८।४।२२] इति णत्वाभावः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Or it will be as in the case of the well-sinker. Thus though a well-sinker becomes covered with mud and dust while sinking the well, when the water spouts forth he derives such a virtue therefrom that the defect is demolished and he becomes endowed with immense well-being. Exactly in the same way in the present case also though religious demerit lies in the knowledge of corrupt forms still the religious merit which lies in the knowledge of correct words will remove the fault root and branch and endow the speaker with immense prosperity.

कूपखानक—All the MSS. read खानक with the long vowel, but Pāṇini distinctly prescribes ष्वुन् to denote the artisan (शिल्पिनि ष्वुन् iii. 1. 145) and Kātyāyana restricts the suffix to नृत्, खन् and रञ्ज् (नृतिखनिरञ्जिभ्यः). As Bhaṭṭoji points out the idea of an artisan is not sought to be conveyed here and so ण्वुल् is not used. The simple idea of digging is present in the mind of the speaker. Cf. Manu ii. 218:

यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥

This maxim of the Mahābhāṣya has been made use of in the following story related in the Kathā-sarit-sāgara :

आसीत् पृथ्वीपतिर्नाम नगरे दक्षिणापथे ।
तद्राष्ट्रे कोऽप्यभूद्धूर्तः परवञ्चनजीविकः ॥
स चैकदा महेच्छत्वादसन्तुष्टो व्यचिन्तयत् ।
धूर्तत्वेनेदृशा किं मे यदाहारादिमात्रकृत् ॥
प्राप्यते महती येन श्रीस्तादृङ् न करोमि किम् ।
इत्यालोच्य वणिग्वेषमत्युदारं विधाय सः ।
उपासर्पत् प्रतीहारं गत्वा द्वारं महीपतेः ॥
तन्मुखेन प्रविश्यान्तः प्राभृतं चोपनीय सः ।
एकान्ते मेऽस्ति विज्ञप्तिरिति व्यज्ञापयन्नृपम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्ञापि वेषभ्रान्तेन प्राभृतावर्जितेन च ।
तथेति रचितैकान्तस्तमेवं स व्यजिज्ञपत् ।।
दिने दिने मया साकमास्थाने सर्वसन्निधौ ।
भूत्वैकान्ते कथालापं क्षणमेकं कुरु प्रभो ।।
तावताहं प्रतिदिनं दीनारशतपञ्चकम् ।
ददाम्युपायनं देवस्यार्थये न तु किञ्चन ।।
तच्छ्रुत्वाचिन्तयद्राजा को दोषः किमयं मम ।
गृहीत्वा याति दीनारान् ददाति प्रत्युतान्वहम् ।।
महता वणिजा सार्धं कथालापेन का त्रपा ।
इति स प्रतिपद्यैतद्राजा तस्य तथाकरोत् ।।
सोऽपि तस्मै ददौ राज्ञे दीनारांस्तान्यथोदितान् ।
लोकस्तं च महामन्त्रिपदं प्राप्तममन्यत ।।
एकस्मिंश्च दिने धूर्तो मुहुः पश्यन्नियोगिनः ।
साकूतं मुखमेकस्य चक्रे राज्ञा समं कथाम् ।।
निर्गतश्च बहिस्तेन मुखालोकनकारणम् ।
एत्याधिकारिणा पृष्टः स स्वैरं तं मृषावदत् ।।
देशो मे लुण्ठितोऽनेनेत्येवं ते कुपितो नृपः ।
मयातस्ते मुखं दृष्टं शमयिष्याम्यहं च तम् ।।
इत्युक्तस्तेन सोऽलीकमन्त्रिणा सभयो गृहम् ।
आगत्याधिकृतः स्वर्णसहस्रं तस्य दत्तवान् ।।
अन्येद्युश्च समं राज्ञा कथां कृत्वा तथैव सः ।
निर्गत्य धूर्तोऽवादीत्तं नियोगिनमुपागतम् ।।
युक्तियुक्तैर्मया वाक्यैस्तव राजा प्रसादितः ।
धीरो भवाधुनाहं ते सर्वच्छिद्रेषु रक्षकः ।।
इति स्वीकृत्य तं युक्त्या विससर्ज च सोऽपि तम् ।
अधिकारी सदा तैस्तैरुपचारैरुपाचरत् ।।
एवं क्रमेण सर्वेभ्यो नियोगिभ्यः स बुद्धिमान् ।
राजभ्यो राजपुत्रेभ्यः सेवकेभ्यः स युक्तिभिः ।
बह्वीभिराददानोऽर्थानर्जयामास सर्वतः ।।
पञ्च कोटीः सुवर्णस्य कुर्वन् राज्ञा समं कथाः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततो रहसि राजानं धूर्तमन्त्री जगाद सः ।
देव दत्त्वापि नित्यं ते दीनारशतपञ्चकम् ।।
त्वत् प्रसादान्मया प्राप्ताः पञ्च काञ्चनकोट्यः ।
तत् प्रसीद गृहाणैतत् स्वं स्वर्णमहमत्र कः ।।
इत्युक्त्वा प्रकटं राज्ञे कनकं तन्न्यवेदयत् ।
राजापि कृच्छ्रात् तत् तस्य जग्राहार्धं ततो धनात् ।।
तुष्टश्च स्थापयामास महामन्त्रिपदे स तम् ।
सोऽपि प्राप्य श्रियं धूर्तो दानभोगैरमानयत् ।।
एवं प्राप्नोति महतः प्राज्ञोऽर्थान्नातिपापतः ।
कूपखानकवत् प्राप्ते फले दोषं निहन्ति च ।।

यदप्युच्यते—आचारे नियम इति, याज्ञे कर्मणि स नियमोऽन्यत्रानियमः* । एवं हि श्रूयते—यर्वाणस्तर्वाणो† नाम ऋषयो बभूवुः प्रत्यक्ष-

---

* अन्यत्रानियमः is not found in Kielhorn and is most probably a reader's note.

† In this connexion the following extract from an article by Mr. Robert Bernays in Pearson's Magazine will prove interesting: I remember one member who, in the course of a speech on hops, was endeavouring to make an eloquent plea that His Majesty's Government should take a more active interest in the production of poor beer. Unfortunately, he was afflicted with an exaggerated Oxford accent, which resulted in "poor beer" being emasculated into "puah beah". For some reason, this tickled the House, and every time "puah beah" was mentioned, which was at the end of almost every sentence, the laughter grew, until strong men rolled about on the seats in helpless merriment. For ever after, the member, who is a most respectable and hardworking representative of an agricultural constituency, has been known as "Puah Beah."

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्माणः परावरज्ञा* विदितवेदितव्या अधिगतयाथातथ्याः । ते तत्रभवन्तो यद्वानस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते, याज्ञे पुनः कर्मणि नापभाषन्ते । तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितम्, ततस्ते पराभूताः ।

As regards the statement 'restriction in the matter of utterance', that restriction applies to the case of sacrificial rites and there is no restriction in other cases. The story goes: There were sages named Yarvāṇastarvāṇaḥ who had an immediate perception of Dharma, who had fathomed the higher and the lower, who knew all that there was to be known and who had realised the truth. These reverend sages use "yarvāṇastarvāṇah" instead of "yad vā naḥ tad vā naḥ" in conversation; in sacrificial rites, however, they never use corrupt forms. The demons of whom we have spoken above used corrupt forms in religious rites and hence they suffered defeat.

Nāges'a's Mañjūṣa is very illuminating:

नन्वपभ्रंशानां शक्तत्वेऽर्थवत्त्वादर्थवत्सूत्रेण प्रातिपदिकसंज्ञापत्तिरिति चेत्, इष्टापत्तेः । अत एव पस्पशायाम्—एवं हि श्रूयते, यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः, ते तत्रभवन्तो यद्वानस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते, याज्ञे कर्मणि पुनर्नापभाषन्ते इति भाष्य उक्तम् । यर्वाणस्तर्वाण इति णान्ताज्जसि यर्वाणस्तर्वाणो नामेति प्रयुक्तम् । अत एव रुत्वोत्वादि, बभूवुरित्यनेन सामानाधिकरण्यञ्च । . . . परं तु साध्वनुशासनेऽस्मिन् शास्त्रे इति भाष्योक्तेरर्थवत्त्वेन साधूनामेव संज्ञाविधावुद्देश्यत्वमिति नासाधुषु प्रातिपदिकसंज्ञा । यर्वाणस्तर्वाण इत्यादौ सुबप्यसाधुरेव । [पस्पशायामित्यस्य भाष्य

---

* In most printed books the reading is **परापरज्ञाः**. But **परावरे ब्रह्मणी वेदितव्ये** is found in the Introduction to the RikPrātis'ākhya. **विदितवेदितव्यः** occurs in the well-known passage of the Kādambari: **तात चन्द्रापीड़, विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति ।** (Para 103)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्तमित्यत्रान्वयः। भाष्ये पस्पशासंज्ञक आह्निक उक्तमित्यर्थः। स्पश्यते स्पृश्यत उपोद्घाततया तावदुपगम्यत इति स्पशेः कर्मण्यङि बाहुलकाद् द्वित्वे रूपम्।... तत्रभवन्तः पूज्याः। प्रयुञ्जते प्रयुक्तवन्तः। यतस्त एतादृशाः, ततो लौकिकेष्वर्थेष्वतिवैराग्येणाग्रहाभावात्, 'यद्वास्तु नः किं प्रयोजनम्' 'तद्वास्तु वः किं प्रयोजनम्' इत्यर्थं तथा प्रयोक्तव्ये यथा तथा प्रयुक्तवन्त इत्याह—याज्ञे इति। पुनस्त्वर्थे उभयत्र "वर्तमानसामीप्ये" [३।३।१३१] इति भूते लट्।]

"कूपं खनन् यद्यपि कर्दमेन लिप्यते एव, तथापि ततो लब्धेन जलेन तं मलं दूरीकरोति फलान्तरं च लभते। तथेहापि परिनिष्ठितरूपज्ञानात् पूर्वोत्पन्नप्रत्यवायनिरासं फलान्तरं च लभत इति सोऽयं कूपखानकन्यायः। कूपं खनतीति विग्रहे कर्मण्यणि प्राप्ते वासरूपन्यायेन ण्वुल्। नित्यसमासत्वाभावात् कूपस्य खानक इति स्वपदविग्रहः। न च शिल्पिनि-ष्वुना सरूपेण ण्वुलो बाधः स्यादिति वाच्यम्, इह खननकर्तृत्वमात्रस्य विवक्षया शिल्पित्वस्याविवक्षितत्वात् तस्मात् सर्वथापि गाव्यादिप्रयोगे प्रत्यवाय इति स्थितम्। तत्रेदं भाष्ये सिद्धान्तितम् —याज्ञे कर्मण्येवायम्, न म्लेच्छितवा इत्यस्य क्रतुप्रकरणे पाठात। क्रतुप्रयोगाद् बहिस्त्वपशब्दं प्रयुञ्जानो न दुष्यति। एवं हि श्रूयते—यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परावरज्ञाः। प्रत्यक्षधर्माणः योगजधर्मबलेन साक्षात्कृतधर्माणः। अत्रायं श्रुतेराशयः—योगिन एते विरक्त्यतिशयाल्लौकिकेष्वर्थेष्वाग्रहविरहेण यथा तथास्माकं भवतीति विवक्षवो 'यद्वानस्तद्वानः' इति वक्तव्ये यर्वाणस्तर्वाण इत्यूचुः। याज्ञे कर्मणि पुनः साधूनेव प्रयुक्तवन्तः, तेन यर्वाणस्तर्वाण इत्येवंरूपामेव संज्ञां मुनयो लेभिरे इति। भट्टाश्चाहुः—

स्त्र्यपायमांसभक्षादिपुरुषार्थमपि श्रितः।
प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात्॥

इति। अपरे त्वाहुः—

क्रतोर्बहिःप्रयोगेऽपि पुरुषः प्रत्यवैति हि। इति।

तेषामयमाशयः—नानृतं वदेदित्यनारभ्याधीतः पुरुषार्थोऽपि निषेधस्तावदस्तीति निर्विवादम्। तत्र निषेध्यमनृतं द्विधा—शब्दानृतमर्थानृतं चेति। शब्दस्यार्थस्य वा विपरीतप्रतिपत्तिहेतुभूतमुच्चारणम् अनृतवदनम्। एवं च यथार्थानृतं वदतः प्रत्यवायस्तथा शब्दानृतमपीति तुल्यम्। क्रतुमध्ये पुनरपभाषणे पुरुषोऽपि प्रत्यवैति, क्रतुरपि विगुण इति वचनद्वयबलात् सिध्यतीति दिक्।" शब्दकौस्तुभः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यर्वाणस्तर्वाणः—There were evidently several sages and they were called individually and collectively **यर्वाणस्तर्वाणः**.

Nages'a says in his Laghus'abdendus'ekhara : **स्मृतिपुराणादिषु पतये सखिनेत्यादिव्याकरणानिष्पन्नत्वेनासाध्वेव, त्रिशङ्क्वाद्ययाज्ययाजनादाविव तपोमाहात्म्येनासाधुप्रयोगेऽपि ऋषीणां दोषाभावात् , याज्ञे कर्मण्येवासाधुप्रयोगे दोषाच्च। अस्माकमपि स्मृतिपुराणाध्ययनविधिबलात्, तेषां तपोबलाच्च यज्ञमध्येऽपि तदन्तर्गततत्पाठे दोषाभावः। स्वातन्त्र्येणेदृशं प्रयुञ्जाना अस्मदादयः प्रत्यवयन्त्येव। अत एव नदीसंज्ञासूत्रे भाष्ये—"छन्दोवत् कवयः कुर्वन्ति" इत्युक्त्वा "न ह्येषेष्टिरस्ति" इत्युक्तम्।**

Bloomfield and Edgerton give some instances of the interchange of d and r in the Vedic texts :

मयि रायो मयि रक्षः। वाजसनेयिसंहिता। मयि दक्षो मयि क्रतुः। मैत्रायणी संहिता।

यदा राघति वरदः। वैतानसूत्र। यदा राखाट्यौ वदतः। आपस्तम्बश्रौतसूत्र। यद्याराध्यं वदन्तः। मानवश्रौतसूत्र।

अहर्दिवाभिरूतिभिः। वाजसनेयि-संहिता। वहद्दिव्याभिरूतिभिः। मैत्रायणी संहिता। etc. etc.

अथ व्याकरणमित्यस्य शब्दस्य कः पदार्थः ?

सूत्रम्।

सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः ॥ १० ॥

सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते—व्याकरणस्य सूत्रमिति। किं हि तदन्यत् सूत्राद् व्याकरणं यस्यादः सूत्रं स्यात् ?

[*Signification of the word Vyākaraṇa.*]

Now what is the meaning of the word Vyākaraṇa ?

Rule.

If rule be Vyākaraṇa the use of the genitive is incongruous.

If rules be grammar then the sense of the genitive does not fit in the expression "vyākaraṇasya sūtram" (rule of

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

grammar, for what other thing than the rules is this grammar that the rules may relate to that object ?

Under iii. 1. 26 we find :

तत्करोतीत्युपसंख्यानं कर्तव्यम् ॥ किं प्रयोजनम् ? सूत्रयत्याद्यर्थम् ॥ सूत्रं करोति सूत्रयति ।

इह व्याकरणस्य सूत्रं करोति व्याकरणं सूत्रयतीति वाक्ये षष्ठी, उत्पन्ने च प्रत्यये द्वितीया ।

कैयटः । लक्ष्ये लक्षणसमुदाये वा व्याकरणशब्दो वर्तते इति भेदनिबन्धना षष्ठी । यदा तु लक्षण एव सूत्रे व्याकरणशब्दो वर्तते तदा व्यपदेशिवद्भाव-निमित्ता षष्ठी । यदा व्याकरणं सूत्रं करोतीति सामानाधिकरण्यं तदा यथा मुण्डयति माणवकमिति भवति तथा व्याकरणं सूत्रयतीत्यपि भवति ॥ उद्द्योतः । लक्ष्ये इति । व्याकरणशब्दः कर्मल्युडन्त इति भावः । लक्षणसमुदाये वेति । अष्टाध्यायीरूपेऽर्थे करणल्युडन्तः स इति भावः । यदा तु लक्षण एवेति । प्रतिसूत्रं व्याकरणशब्द इत्यर्थः । यदेति व्यपदेशिवद्भावाद्यनाश्रयण इत्यर्थः ।

भाष्यम् । योऽसौ सूत्रव्याकरणयोरभिसम्बन्धः स उत्पन्ने प्रत्यये निवर्तते ; अस्ति च करोतेर्व्याकरणेन सामर्थ्यमिति कृत्वा द्वितीया भविष्यति ॥

As a matter of fact व्याकरण is not सूत्र but सूत्रसन्तान.

शब्दाप्रतिपत्तिः ॥ ११ ॥

शब्दाप्रतिपत्तिः प्राप्नोति–व्याकरणाच्छब्दान् प्रतिपद्यामह इति । न हि सूत्रत एव शब्दान् प्रतिपद्यन्ते ।

किं तर्हि ?

व्याख्यानतश्च ।

ननु च तदेव सूत्रं विगृहीतं व्याख्यानं [1] भवति ।

न केवलानि* चर्चापदानि व्याख्यानम्—वृद्धिः आत् ऐच् इति ।

---

[1] सूत्रेष्वेव हि तत् सर्वं यद्वृत्तौ यच्च वार्त्तिके ।
सूत्रं योनिरिहार्थानां सूत्रे सर्वं प्रतिष्ठितम् ।

* Most editions read न केवलम्, but cf. न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययः under i.2.64.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं तर्हि ?

उदाहरणं प्रत्युदाहरणं वाक्याध्याहारः—एतत् समुदितं व्याख्यानं भवति[1]।

Non-comprehension of words.

There arises also the non-comprehension of words, (and statements) like 'we learn correct words from grammar' (become absurd), for people do not learn words from rules alone.

What then ?

From the exposition also.

Excuse me, but the self-same rule when analysed becomes the exposition.

Merely the words of the rules e. g., "vṛddhiḥ āt aic" do not constitute the exposition.

What then ?

Examples, counter-examples, supplying of what is wanting in the sentence—all these together constitute the exposition.

चर्चापदानि—चर्चा अभ्यासः । यथा वेदे अभ्यासार्थं विभक्तानि पदान्युच्यन्ते तद्वदुक्तानीत्यर्थः । वाक्याध्याहारः । आदैच् वृद्धिसंज्ञो भवतीति वाक्यशेषाध्याहार इत्यर्थः । अन्नंभट्टः ।

एवं तर्हि, शब्दः ।

शब्दे ल्युडर्थः ॥ १२ ॥

यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते*, व्याक्रियतेऽनेनेति व्याकरणम् । न हि शब्देन किञ्चिद् व्याक्रियते ।

---

1 उपोद्घातः पदञ्चैव पदार्थः पदविग्रहः ।
चालना प्रत्यवस्थाश्च व्याख्या तन्त्रस्य षड्विधा ॥

* Many MSS. and printed editions have **व्याक्रियन्ते शब्दा अनेन**, but **न हि शब्देन किञ्चिद् व्याक्रियते** shows that the reading adopted in the text is the correct one.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केन तर्हि ?

सूत्रेण ।

If so, Sa'bda (word) is Vyākaraṇa.

In the case of Sa'bda, the sense of lyuṭ is incongruous.

If S'abda be Vyākaraṇa, then the sense of lyuṭ, does not fit in, when we say "Vyākriyate anena iti vyākaraṇam" (that by means of which analysis is made is grammar), for nothing is analysed by means of words.

By what then ?

By rules.

भवे च तद्धितः* ॥ १३ ॥

भवे च तद्धितो नोपपद्यते—व्याकरणे भवो योगो वैयाकरण इति । न हि शब्दे भवो योगः ।

क्व तर्हि ?

सूत्रे ।

And the Taddhita in the sense of "bhava".

The taddhita in the sense of "bhava" (existing in) also in the statement—vyākaraṇe bhavo yogo vaiyākaraṇah (a rule found in grammar is vaiyākaraṇa or grammatical) does not fit in, for the rule never exists in the word.

Where then ?

In the rule.

प्रोक्तादयश्च तद्धिताः ॥ १४ ॥

प्रोक्तादयश्च तद्धिता नोपपद्यन्ते, पाणिनिना प्रोक्तम् पाणिनीयम् , आपिशलम् , काशकृत्स्नम् इति । न हि पाणिनिना शब्दाः प्रोक्ताः ।

किं तर्हि ?

सूत्रम् ।

---

* Kielhorn reads simply भवे .

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

And the Taddhitas in the sense of "prokta" (spoken by, etc.

And the taddhita suffixes added in the sense of 'spoken by' as in Pāṇinīyam 'spoken by Pāṇini', Āpis'alam (spoken by Āpis'ali), Kās'akṛtsnam (spoken by Kās'akṛtsna). It is not words that were spoken by Pāṇini.

What then ?

Rules.

किमर्थमिदमुच्यते भवे प्रोक्तादयश्च तद्धिता इति, न प्रोक्तादयश्च तद्धिता इत्येव भवेऽपि तद्धितश्चोदितः स्यात् ।

पुरस्तादिदमाचार्येण दृष्टम्—भवे च तद्धित इति, तत् पठितम् । तत उत्तरकालमिदं दृष्टं प्रोक्तादयश्च तद्धिता इति, तदपि पठितम् । न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति ।

Why have the two rules "bhave" and "proktādayas' ca taddhitāh" been both read and not the latter alone, for even in that case the taddhita in the sense of "bhava" would have been objected to (because of the word ādi in proktādi, all similar rules would have been included) ?

The renowned teacher [Kātyāyana] first thought of the taddhita in the sense of "bhava" and he said "bhave ca taddhitah", then he thought of the taddhitas in the sense of "prokta" etc., and he said "proktādayas' ca taddhitāh". Now Ācāryas do not cross out rules after once having framed them.

Patañjali evidently means : The word *ādi* in the Vārttika **प्रोक्तादयश्च तद्धिताः** not only includes : **उपज्ञाते । कृते ग्रन्थे ।** ४।३। ११५-१६ etc., but also **तत्र भवः** ४।३।५३, since *ādi* here does not mean 'beginning with' but 'of the type of'. So **भवे च तद्धितः** is covered by **प्रोक्तादयश्च तद्धिताः** and ought not to have found a place here. But the fact is the author of the Vārttikas first

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

thought of तत्र भवः and framed the Vārttika भवे च तद्धितः, then he thought of तेन प्रोक्तम् etc. and added the Vārttika प्रोक्तादयश्च तद्धिताः, but did not expunge what he had written previously, for Ācāryas do not strike out rules once they have been laid down. This is what Kaiyaṭa means by saying: लक्षणप्रपञ्चाभ्यां मूलसूत्रवद्वार्त्तिकानामुपपत्त्या दोषाभावः। On this Nāges'a says: यथा कर्मधारयप्रकरणे, अलुक्प्रकरणे च। विजिगीषुकथायां ह्यभिहिताभिधानमशक्तिसूचकत्वाद्दोषाय, इह तु व्युत्पादनार्थत्वान्न दोषकृदिति भावः। पूर्वं सामान्य उक्ते पश्चाद्विशेषकथनं प्रपञ्चार्थमिति युज्यते, अत्र तु विपरीतमिति न तत्साम्यमित्यन्ये। The Chāyā explains: लक्षणप्रपञ्चाभ्याम्। सामान्यसूत्रविशेषसूत्राभ्याम्। . . . . यथेति। "विशेषणं विशेष्येण बहुलम्" [२।१।५७] इत्यस्याग्रिमसूत्राणि प्रपञ्चभूतानि। तथा "अलुगुत्तरपदे" [६।३।१] इत्यस्याग्रिमाणि॥ आचार्या महर्षयो वेदसम्मिता आत्मोक्तं न निवर्तयन्ति हि यतो व्युत्पादनाय व्याख्येयेऽर्थे तेषां तात्पर्यम्। आत्यन्तिकदोषासम्भवान्नेदृशलाघवादरस्तेषामित्येवं भाष्यस्य युक्तत्वेऽपि कैयटोक्ता दृष्टान्तेनोपपत्तिरयुक्तेत्याशयेनाह——पूर्वमिति।

न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति—Cf. प्रातिपदिकस्य च प्रत्यापत्तिः। ६।३।३४।२ प्रातिपदिकस्य च प्रत्यापत्तिर्वक्तव्या। एनी भार्यास्य एतभार्यः। श्येतभार्यः॥ स्थानिवत्प्रसङ्गश्च। ६।३।६४।३ स्थानिवद्भावश्च प्राप्नोति। पट्वी भार्यास्य पटुभार्यः। मृदुभार्यः। ...किमर्थमिदमुभयमुच्यते, न प्रातिपदिकस्य च प्रत्यापत्तिरित्येव स्थानिवद्भावोऽपि चोदितः स्यात्? पुरस्तादिदमाचार्येण दृष्टं स्थानिवत्प्रसङ्गश्चेति तत् पठितम्। तत उत्तरकालमिदं दृष्टम्——प्रातिपदिकस्य च प्रत्यापत्तिरिति तदपि पठितम्। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति॥

अदस ईत्त्वोत्वे स्वरे बहिष्पदलक्षणे।८।२।६।९ अदस ईत्त्वोत्वे स्वरे बहिष्पदलक्षणे सिद्धे वक्तव्ये। अमी अत्र। अमी आसते। अमू अत्र। अमू आसाते॥ प्रगृह्यसंज्ञायां च। ८।२।६।१०। प्रगृह्यसंज्ञायां च सिद्धे वक्तव्ये। अमी अत्र। अमी आसते। अमू अत्र। अमू आसाते॥ ..किमर्थमिदमुभयमुच्यते न प्रगृह्यसंज्ञायामित्येव स्वरेऽपि बहिष्पदलक्षणे चोदितं स्यात्। पुरस्तादिदमाचार्येण दृष्टं स्वरे बहिष्पदलक्षण इति तत् पठितम्। तत उत्तरकालमिदं दृष्टम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रगृह्यसंज्ञायां चेति तदपि पठितम्। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति ।

अयं तावददोषो यदुच्यते शब्दे ल्युडर्थ इति। नावश्यं करणाधिकरणयोरेव ल्युड् विधीयते ।

किं तर्हि ?

अन्येष्वपि कारकेषु--कृत्यल्युटो बहुलम् [३।६।११३] इति, तद् यथा प्रस्कन्दनं प्रपतनमिति ।

अथवा शब्दैरपि शब्दा व्याक्रियन्ते--तद् यथा गौरित्युक्ते सर्वे सन्देहा निवर्तन्ते--नाश्वो न गर्दभ इति ।

The defect pointed out in the statement "S'abde lyudarthah" is no defect, for lyuṭ is not necessarily prescribed to denote the Instrumental or the Locative.

What then ?

To denote other case-relations also ; e.g., *praskandanam* that *upon* which something slips down, *prapatanam* that *from* which something falls down.

Or, (the statement 'nothing is analysed by means of words' is not correct, for) it is by means of words that words are analysed. Thus when we say "a cow" all doubts are set at rest—this is not a horse nor an ass.

प्रस्कन्दनम्—The Kās'ikā has **प्रस्कन्दनम् प्रपतनम्** as examples under **कृत्यल्युटो बहुलम्** vii. 3. 113 and **प्रपतनम्** under **भीमादयोऽपादाने** iii. 4. 74, but **भीमादयोऽपादाने** evidently refers to words formed with **उणादि** suffixes and so **प्रपतन** should be expunged from the bhīmādi-gaṇa. Kaiyaṭa, however, says :

प्रस्कन्दनमिति । यद्यप्ययं भीमादिः, तथापि "कृत्यल्युटो बहुलम्" [३।३ ११३] इत्यस्यैव "भीमादयोऽपादाने" [३।४।७४] इत्ययं प्रपञ्च इति भावः । कैयटः। यथा "कृत्यल्युटो बहुलम्" इत्यादेः "भीमादयोऽपादाने" इत्यादिः प्रपञ्चः तथा "प्रोक्तादयश्च तद्धिताः" इत्यस्य "भवे" इति प्रपञ्च इति न पौनरुक्त्यदोषः, वार्त्तिकस्यापि सूत्रतुल्यत्वादित्यर्थः । अन्नंभट्टः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Because of the magic word 'bahulam' the rule "*kṛtya-lyuṭo bahulam*" is very elastic and gerundive suffixes and lyuṭ may be added in other senses also.* "Bahulam" is thus explained :

क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥

अयं तर्हि दोषः—भवे प्रोक्तादयश्च तद्धिता इति ।

एवं तर्हि

लक्ष्यलक्षणे व्याकरणम् ।

लक्ष्यं च लक्षणं* चैतत् समुदितं व्याकरणं भवति ।

किं पुनर्लक्ष्यं लक्षणं च ?

शब्दो लक्ष्यः सूत्रं लक्षणम् ।

एवमप्ययं दोषः—समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते, सूत्राणि चाप्यधीयान इष्यते वैयाकरण इति ।

नैष दोषः । समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्त्तन्ते†, तद् यथा पूर्वे पञ्चालाः, उत्तरे पञ्चालाः, तैलं भुक्तम्, घृतं भुक्तम्, शुक्लो नीलः‡ कपिलः इति । एवमयं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेष्वपि वर्तते ।

But the defect mentioned in the Vārttikas,—(1) bhave ...and (2) proktādayas' ca taddhitāh stands.

If that be so, then our definition will be—

Words and rules (for their formation)—are grammar.

---

* उत्तमो लक्षणज्ञानी लक्ष्यज्ञानी तु मध्यमः ।
लक्ष्यलक्षणयोर्ज्ञानी तद्धि पात्रं प्रचक्षते ॥ अमोघानन्दिनी शिक्षा १२५

† दृश्यन्ते v.l.

‡ Many printed books read शुक्लो नीलः कपिलः कृष्णः.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Words and rules (for their formation)—these two jointly constitute grammar.

Now what is *lakṣya* and what *lakṣaṇa*?

Word is "lakṣya" and rule "lakṣana".

Even then there arises this defect. The word "Vyākaraṇa" denoting both (lakṣya and lakṣaṇa) should not be used to denote one of the two, as one reading the rules alone is also known as Vaiyākaraṇa.

This objection cannot stand, for words denoting the whole are found used in reference to the parts also; e g., the Eastern Pañcālas, the Northern Pañcālas, oil has been eaten, butter has been eaten, white, blue, tawny, etc. In the same way this word Vyākaraṇa denoting both (lakṣya and lakṣaṇa) is used with reference to one of the two.

अथवा पुनरस्तु सूत्रम् ।

ननु चोक्तम्—सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्न इति ।

नैष दोषः, व्यपदेशिवद्भावेन* भविष्यति ।

यदप्युच्यते—"शब्दाप्रतिपत्तिरिति। न हि सूत्रत एव शब्दान् प्रतिपद्यन्ते। किं तर्हि ? व्याख्यानतश्च" इति । परिहृतमेतत्—"तदेव सूत्रं विगृहीतं व्याख्यानं भवति" इति ।

ननु चोक्तम्—"न केवलानि चर्चापदानि व्याख्यानम्—वृद्धिः आत् ऐच् इति। किं तर्हि ? उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत् समुदितं व्याख्यानं भवति" इति ।

---

* Cf. S'aṁkara on BAU. i. .ı.: अथ घटस्य प्रागभाव इति घटस्य यत् स्वरूपं तदेवोच्यैत, घटस्य इति व्यप्रदेशानुपपत्तिः । अथ कल्पयित्वा व्यपदिश्येत शिलापुत्रकस्य शरीरमिति यद्वत् तथापि घटस्य प्रागभाव इति कल्पितस्यैवाभावस्य घटेन व्यपदेशो न घटस्वरूपस्यैव । [यत्र सम्बन्धं कल्पयित्वा व्यपदेशः, तत्र न वास्तवो भेदो यथा राहुशिरसोः, तथात्रापि कल्पिते सम्बन्धे भेदस्य तथात्वात्, वास्तवत्वं सम्बन्धिनोरन्यतरस्य स्यात् । आनन्दगिरिः ।]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अविजानत एतदेवं भवति । सूत्रत एव हि शब्दान् प्रतिपद्यन्ते। आतश्च सूत्रत एव, यो ह्युत्सूत्रं कथयेन्नादो गृह्येत।

Or let us go back to our earlier statemeut that grammar is rule.

But it was objected that if grammar be rule only then the sense of the genitive in such an expression as "vyākaraṇasya sūtram" 'rule of grammar' does not fit in.

This defect dces not arise, for the sense of the genitive will fit in acc. to the maxim of "vyapades'ivadbhāva".

The objection regarding non-comprehension of words that people do not learn words from rules alone but from the exposition also has already been answered by the assertion—the self-same rules when analysed become the exposition i.e., what is latent in the rule is patent in the exposition.

But it has been said "exposition does not merely mean the separate words of the rule"—e.g., vṛddhih, āt, aic, but example, counter-example, supplying of what is wanting in the sentence—all these together constitute exposition.

This is the case with the ignorant man. It is from the rules that people learn words. There is the additional reason in favour of our contention that people learn words from the rule alone: he who says something not warranted by the rules, what he says is not accepted.

व्यपदेशिवद्भाव is a well-known principle of grammar. Nāges'a, following Kaiyaṭa, explains it thus:

निमित्तसद्भावात् विशिष्टोऽपदेशो मुख्यो व्यवहारो यस्यास्ति स व्यपदेशी यस्तु व्यपदेशहेत्वभावाद् अविद्यमानव्यपदेशः असहायः स तेन तुल्यं वर्तते कार्यं प्रतीति एकस्मिन्नसहायेऽपि तत् कार्यं कर्तव्यमित्यर्थः।

That which has received a particular designation because of the presence of certain factors is *Vyapades'in*. When, however, something stands alone and consequently the conditions

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

not being present the particular designation does not attach to it, because of the absence of those factors, it may still be regarded for purposes of grammatical operations as the one to, which the special designation was attached, just as we find in everyday life that when a man has only one son, that son may be regarded as his eldest son or as his youngest son. Thus the suffix इञ् is prescribed in the case of stems ending in अ, words like *dakṣa, aplksa* etc. end in अ and so admit the suffix, but the word अ meaning Viṣṇu does not end in अ, it itself is अ, still the suffix *iñ* is added to it in the sense of 'apatya'.

लोकेऽपि बहुपुत्रत्वे नैकस्मिन्ञ् ज्येष्ठत्वकनिष्ठत्वव्यवहारः—अयं मे ज्येष्ठः कनिष्ठो मध्यम इति।

Similarly we speak of राहोः शिरः 'the head of Rāhu' though Rāhu is nothing but the head. In exactly the same way we can speak of the rules of Grammar, though grammar is nothing but rules, regarding grammar as a whole and the rules as part of it.

आतः—नन्वात इति निपातसमुदायस्य न कश्चिदर्थः। अत आह [कैयटः]—आत इति निपातः, अतश्च हेतोरित्यर्थः। अन्नंभट्टः।

यो ह्युत्सूत्रं कथयेन्नादो गृह्येत—Here नादः evidently is to be dissolved as न and अदः, the pronoun referring to his words. This leaves the sentence without a correlative of यः in the first clause. This is highly irregular, but we must remember that Patañjali is lecturing to his students and in the colloquial style we have any number of such anomalies. Thus we find under I. 2. 64. 29 : यो हि गामश्व इति ब्रूयात्, अश्वं वा गौरिति न जातुचित् सम्प्रत्ययः स्यात्।

Many commentators propose to take नादः as one word meaning 'sound'—the sound alone and not the sense will be recognised. नाद इति नैतदित्यर्थः। अथवा नादोऽर्थरहितत्वाद् घोषमात्रमेवेत्यर्थः। कैयटः। नाद इति पदद्वयमङ्गीकृत्याह—नैतदिति। ध्वनिपर्यायं नादशब्दमङ्गीकृत्याह—अथवेति। अन्नंभट्टः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Language is the vehicle of thought. Thought is expressed in sentences. Therefore a sentence is the unit of language. A sentence when anlaysed is found to consist of words which may be broken up into base and suffixes. So Vyākaraṇa or analysis concerns itself with base and suffix. It has apparently nothing to do with the letters of the alphabet. Why should then the fourteen sūtras which are concerned with the enunciation of the letters of the alphabet form a part of grammar ? This question is discussed in this section.

अर्थप्रयुक्ते शब्दप्रयोगे धर्मनियमः। नात्रैतेऽर्थवन्तः। तत्रैतेषामुपदेशोऽनर्थकः। भर्तृहरिः।

अथ किमर्थो वर्णानामुपदेशः ?

वृत्तिसमवायार्थ उपदेशः ॥१५॥

वृत्तिसमवायार्थो वर्णानामुपदेशः।

किमिदं वृत्तिसमवायार्थ* इति।

वृत्तये समवायो वृत्तिसमवायः, वृत्त्यर्थो वा समवायो वृत्तिसमवायः, वृत्तिप्रयोजनो वा समवायः वत्तिसमवायः।

का पुनर्वृत्तिः ?

शास्त्रप्रवृत्तिः।

अथ कः समवायः ?

वर्णानामानुपूर्व्येण सन्निवेशः।

अथ क उपदेशः ?

उच्चारणम्।

कुत एतत् ?

---

* Should we read : **किमिदं वृत्तिसमवाय इति ?**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिशिरुच्चारणक्रियः। उच्चार्य हि वर्णानाह—उपदिष्टा इमे वर्णा इति।

Now, what is the enunciation of the letters for ?

Vṛttisamavāyārthaḥ.

What is this Vṛttisamavāya ?

Vṛtti-samavāya is vṛttaye samavāyah i.e., 'grouping for the sake of vṛtti' or vṛttyarthah samavāyah 'grouping for the purpose of vṛtti or vṛttiprayojanah samavāyah 'grouping having vṛtti as its result'.

What, again, is "vṛtti" ?

The application of the science.

Now what is "upades'a" ?

Enunciation.

How is this ?

The root *dis'* means to enunciate (articulate), for have enunciated the letters, the author says these letters have been upadiṣṭa.

वृत्तिसमवायार्थो वर्णानामुपदेशः। न स्वेषां स्वरूपावधारणार्थ उपदेशः, किन्तु स्वानुपूर्व्यर्थः अनेनानुपूर्व्येण शास्त्रे किञ्चित् कार्यं यथा कुर्युरिति। शास्त्राङ्गोपसंग्रहार्थमेतदित्येवमर्थमाचष्टे। वृत्तेः समवायो वृत्तिसमवाय इति षष्ठीसमासोऽयम्। भेदस्तादर्थ्येन प्रदर्श्यते, अश्वघासवत्। वृत्त्यर्थो वा समवाय इति। समवायस्य वृत्तिं प्रति निमित्तभाव आख्यायते। यथासंख्यं हि सन्निवेशमात्रादेव प्रवर्तते। वृत्तिश्चासौ समवायश्चेति वृत्तिसमवाय इति, यथा शाकपार्थिव इति। वृत्तिप्रयोजनो वेति। पारम्पर्येण निमित्तभावो निर्दिश्यते। पारम्पर्येण शास्त्रप्रवृत्तिः समवायस्य प्रयोजिका। भर्तृहरिः।

का पुनर्वृत्तिः ? शास्त्रप्रवृत्तिः। कुत एवम् ? वृत्तिरिति क्रिया, क्रिया च साधनाकाङ्क्षिणी, तत्र प्राकरणिकं शब्दानुशासनशास्त्रं साधनत्वेन प्रतीयते शास्त्रप्रवृत्तौ यः समवायः तदर्थो वर्णानामुपदेशः। उपदिश्यतेऽनेनेत्युपदेशः।... इतरो भावसाधनमाचष्टे—उच्चारणम्।... यस्मिन् व्यापारे निर्वृत्ते, अनन्तरो यः शब्दः प्रयुज्यते तस्य तादर्थ्यं विज्ञायते। यथा भुक्तवत्सु प्रविष्टेषु ब्राह्मणेषु भुक्तं ब्राह्मणैः प्रविष्टा ब्राह्मणा इति। गम्यत एतत् नूनमयं भुजेः विशेश्चार्थः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति । एवमिहापि वर्णेषुच्चारितेष्वनन्तरं पृच्छति--किमर्थ उपदेश इति । ते प्रतिपद्यामहे—दिशिरुच्चोरणक्रिय इति । भर्तृहरिः ।

Nāges'a's remarks are very interesting :

वृत्तिसमवायार्थ इति । वृत्तिः शास्त्रप्रवृत्तिः, तदुपयोगी समवायः वर्णगतः क्रमविशेषः, स बोध्यत्वेन अर्थः प्रयोजनं यस्य सः तथोक्तः । सति ह्यक्षर-समाम्नायेऽजादिसंज्ञाभिर्लाघवेन शास्त्रप्रवृत्तिः "इग्यणः०" [१।१।२५] इत्यादौ यथासंख्यप्रवृत्तिश्चेति भावः । अनेनास्य शास्त्रबहिर्भूतत्वं सूचितम् । [अनेन उक्तार्थकोक्तवार्त्तिकेन । अस्य वर्णसमाम्नायस्येत्यर्थः । छाया ।] अत एव मङ्गलार्थं महतः शास्त्रौघस्यादितो वृद्धिशब्दं पठति [१।१।१ भाष्य] इति वक्ष्यति । अन्यकर्तृकत्वं च सूचितम् । पाणिनिशास्त्रप्रवृत्त्यर्थ उपदेश इत्युक्ते उपदेशे गुरुकर्तृकतायाः स्वरसतः प्रतीतेः, सिद्धोच्चारणेऽपि मन्त्रोपदेश इत्यादावुपदेशव्यव-हारात् । अनुबन्धकरणार्थ इत्यत्र करणपदेनेतरस्य सिद्धत्वसूचनात् । तत्करणं चोपदेशकर्तृकर्तृकमेव प्रत्यासत्तेरित्याहुः ।

अनुबन्धकरणार्थश्च ॥१६॥

अनुबन्धकरणार्थश्च वर्णानामुपदेशः—अनुबन्धानासङ्क्ष्यामीति । न ह्यनुपदिश्य वर्णाननुबन्धाः शक्या आसङ्क्तुम् ।

स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च, वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम्, प्रत्याहारो वृत्त्यर्थः ।

For the purpose of making the Anubandhas.

The enunciation of the letters is also for the making of the Anubandhas—so that I may tag on the indicatory letters, for the anubandhas (indicatory letters) cannot be tagged on without enunciating the letters.

This enunciation of letters is for the purpose of grouping for the sake of (brevity in) the application of the science and grouping for the making of the anubandhas, and the grouping for the sake of (brevity in) grammatical application and the making of the Anubandhas are for the purpose of Pratyāhāra.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इष्टबुद्ध्यर्थश्च।

इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः, इष्टान् वर्णान् भोत्स्य* इति। न ह्यनुपदिश्य वर्णानिष्टा वर्णाः शक्या विज्ञातुम्।

Also for the knowledge of the desired letters.

The enunciation of the letters is also for the knowledge of the desired letters—so that we may have the necessary letters. The desired letters cannot be learnt without the enunciation of the letters.

इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः ॥१७॥

इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्तव्यः। एवंगुणा अपि हि वर्णा इष्यन्ते।

आकृत्युपदेशात् सिद्धम्।

अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति, तथेवर्णाकृतिस्तथोवर्णाकृतिः।

If the enunciation of the letters be also for a knowledge of the desired letters, the enunciation of the acute accent, the grave accent, the circumflex accent, the nasalized vowels, the long vowels and the prolated vowels.

If the enunciation of the letters be for the knowledge of the desired letters, then the acute, grave and circumflex accents, the nasalized, long and prolated vowels should also be enunciated, for letters of these qualities are also postulated.

The purpose is served by the enunciation of the class.

The genus *a* being enunciated will include all varieties

---

* Most editions have **भोत्स्यामहे**, but **आसङ्क्ष्यामि** under the previous Vārttika shows that **भोत्स्ये** is the correct reading.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

of *a*, similarly the genus *i* and the genus *u* (will comprehend every shade of the vowel quality and every degree of stress or kind of tone).

आकृत्युपदेशात् सिद्धमिति चेत् संवृतादीनां प्रतिषेधः ॥१८॥

आकृत्युपदेशात् सिद्धमिति चेत् संवृतादीनां प्रतिषेधो वक्तव्यः ।

के पुनः संवृतादयः ?

संवृतः कलः ध्मातः एणीकृतः अम्बूकृतः अर्धकः ग्रस्तः निरस्तः प्रगीतः उपगीतः क्ष्विण्णः रोमश इति । अपर आह—

ग्रस्तं निरस्तमविलम्बितं हृत-
मम्बूकृतं ध्मातमथो विकम्पितम् ।
सन्दष्टमेणीकृतमर्धकं द्रुतं
विकीर्णमेताः स्वरदोषभावनाः ॥

इति । अतोऽन्ये व्यञ्जनदोषाः ।

If you say the purpose is served by the enunciation of the class, the exclusion of (the defects) Saṃvṛta etc. is necessary.

If you say the purpose is served by the enunciation of the class, the exclusion of the defects Saṃvṛta etc. should be stated.

Now what are the defects Saṃvṛta etc. ?

Saṃvṛta (close), kala (lisping), dhmāta (blown), eṇīkṛta (indistinct), ambūkṛta (pronounced with closed lips), ardhaka (shortened), grasta (held at the root of the tongue), nirasta (pushed forward, jerked), pragīta (sung), upagīta (sung indistinctly), kṣviṇṇa (trembling) and romas'a (grave).

---

*In the Chāndogyopaniṣad we find :

सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्याः, इन्द्रे बलं ददानीति। सर्वे उष्माणोऽग्रस्ता अनिरस्ता विवृता वक्तव्याः—प्रजापतेरात्मानं परिददानीति, स्पर्शा लेशेनानभिनिहिता वक्तव्याः—मृत्योरात्मानं परिहराणीति । २।२२।५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Another says :

Grasta (held at the root of the tongue), nirasta (jerked), avilambita (rapid), hata (killed i. e. slurred over), ambūkṛta (pronounced with closed lips), dhmāta (blown), vikampita (quivering), sandaṣṭa (pressed closely together), eṇīkṛta (indistinct), ardhaka (shortened), druta (hasty) and vikīrṇa (flowing over) these are the varieties of vowel-defects.

Besides these there are faults (in the pronunciation) of consonants.

भावना गात्राणि। गात्रवत् प्रधानभूतानि। यथा शरीरस्यानेकविधा अवयवाः, तद्वत् तेषामप्यनेकभेदाः सन्तीत्यर्थः। अन्नंभट्टः। गोत्राणीति। स्वरदोषजातय इत्यर्थः। नागेशः।

संवृतादीनामिति। एकारादीनां संवृतत्वे दोषः, न त्वकारस्य तस्य संवृतगुणत्वात्। तत्र सन्ध्यक्षरेषु विवृततमेषूच्चार्येषु संवृतत्वं दोषः। कलः स्थानान्तरनिष्पन्नः काकलीत्वेन प्रसिद्धः। ध्मातः श्वासभूयिष्ठतया ह्रस्वोऽपि दीर्घ इव लक्ष्यते। एणीकृतः अविशिष्टः—किमयमोकारः, अथौकार इति यत्र सन्देहः। अम्बूकृतो यो व्यक्तोऽप्यन्तर्मुख व श्रूयते। अर्धको दीर्घोऽपि ह्रस्व इव। ग्रस्तो जिह्वामूले निगृहीतः, अव्यक्त इत्यपरे। निरस्तो निष्ठुरः। प्रगीतः सामवदुच्चारितः। उपगीतः समीपवर्णान्तरगीत्यनुरक्तः। क्ष्विण्णः कम्पमान इव। रोमशः गम्भीरः। अविलम्बितः वर्णान्तरसंभिन्नः। हतः रूक्षः। सन्दष्टः वर्धित इव। विकीर्णः वर्णान्तरे प्रसृतः, एकोऽप्यनेकनिर्भासीत्यपरे। कैयटः।

Extracts from the Prātis'akhyas and the S'ikṣās will be found in the notes at the end of the book.

नैष दोषः।

गर्गादिबिदादिपाठात् सम्वृतादीनां निवृत्तिः ॥ १९ ॥

गर्गादिबिदादिपाठात् संवृतादीनां निवृत्तिर्भविष्यति* ।

---

* Pandit Guruprasad Sastri thinks that after this there was a Vârttika **समदायसाधुत्वार्थं तु गर्गादिबिदादिपाठः**, though none of the MSS. shows it.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्त्यन्यद् गर्गादिबिदादिपाठे प्रयोजनम् ।

किम् ?

समुदायानां साधुत्वं यथा स्यादिति ॥

[प्रत्यापत्तिवचनम् । *]

एवं तह्यष्टादशधा भिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि ।

सा तर्हि वक्तव्या ।

This defect does not arise.

The exclusion of Saṃvṛta and other faults by the enunciation of the Garga and Bida groups.

Saṃvṛta and other faults will be excluded by the enunciation of the Garga and Bida Groups.

There is another reason for the enunciation of the Garga and Bida Groups.

What is that reason ?

So that the correctness of the whole i. e., the stem with the suffix may be secured. (Had the words of the two groups not been stated, how could we have formed words by adding the desired suffixes to them ?)

[*Statement of restoration.*]

If so, I shall mention the restoration of *a* which is of

---

* Pandit Guruprasad Sastri surmises that there was a Vārttika **प्रत्यापत्तिवचनम्** here, though it is not found in any of the MSS. available to us. He says : **इदं वा वार्त्तिकम् 'प्रत्यापत्तिवचनात् सिद्धम्' इति वा वार्तिकमत्र लुप्तमिति विभाव्यास्माभिरत्रेदं वार्तिकं स्थापितम् । तत्त्वं तु भगवानेव वेत्ति ।** In view of the Uttara-pakṣa Vārttika **लिङ्गार्था तु प्रत्यापत्तिः** it is possible that there was such a Vārttika here.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

eighteen varieties and which is free from *kala* and other defects. (Just as in the case of अ which is Saṃvṛta, the author regards it for purposes of grammatical operations as Vivṛta, but in the very last rule restores it to its Sáṃvṛta character (अयम् अ अ इत्यकारस्य विवृतस्य संवृतताप्रत्यापत्तिं शास्ति), I shall frame a rule restoring the vowel in all its eighteen varieties to its pure character, free from the defects *kala* etc.).

That, then, must be stated (and the statement will involve *gaurava* or prolixity).

यद्यपि प्रत्ययविध्यर्थो गर्गादीनां पाठस्तथापि प्रसङ्गात् समुदायसाधुत्वार्थोऽपि भवति। कैयटः। साधुत्वं निवृत्तकलादिदोषवत्त्वम्।…समुदायानामेतत्-प्रकृतिकयञन्तसमुदायानां साधुत्वं यथा स्यादित्ययं पाठश्चरितार्थो न कलादिदोषं निवर्तयेदित्येव भाष्यार्थः, "पाठश्चैव विशेष्यते" इत्यग्रिमभाष्यस्वरसात्। नागेशः।

निवृत्तकलादिकामिति। अकारस्य संवृतत्वात् "निवृतसंवृतत्वादिकाम्" इति नोक्तम्। अकारस्य निदर्शनार्थत्वात् सर्ववर्णानां शास्त्रान्ते प्रत्यापत्ति-रित्यर्थः। कैयटः। निदर्शनार्थत्वात् उपलक्षणार्थत्वात्। अन्नंभट्टः। तत्रावर्णस्य "अ अः" [८।४।६८] इति कृतैव, तद्वत् तदनन्तरमन्येषामपि करिष्यामीति भावः। एतेनावर्णप्रत्यापत्तेः कृतत्वाद् वक्ष्यामीत्यनुपपन्नमिति परास्तम्। नागेशः।

The Gargādi-gaṇa (iv. 1.105) and Bidādi-gaṇa (iv. 1.104) contain a large number of words. The vowels in these words have to be pronounced correctly. So the student will learn the correct pronunciation of the vowels and there will be no chance of defects like Saṃvṛta etc. creeping in.

It is curious that the Gargādi-gaṇa here precedes the Bidādi-gaṇa, though in the Aṣṭādhyāyī the former immediately follows the latter. Another curious fact is that ऐ and औ do not occur in either of these gaṇas. I am therefore inclined to read "gaurādi" (iv. 1.41) for "gargādi" here.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लिङ्गार्था तु प्रत्यापत्तिः * ॥ २० ॥

लिङ्गार्था सा तर्हि भवति ।

तत्तर्हि वक्तव्यम् ।

यद्यप्येतदुच्यते । अथवैतर्ह्यनेकमनुबन्धशतं नोच्चार्यमित्संज्ञा च न वक्तव्या, लोपश्च न वक्तव्यः । यदनुबन्धैः क्रियते तत् कलादिभिः करिष्यते । सिध्यत्यवम्, अपाणिनीयं तु भवति ।

यथान्यासमेवास्तु ।

But the restoration is for the purpose of indicating something.

That will then be for the purpose of indicating something (and the *gaurava*, serving, as it does, some other purpose, will be more apparent than real).

Then that must be stated.

Even if it be said, "Or it will now be unnecessary to enunciate many hundred Anubandhas, to frame (and define) the technical term *it* and to prescribe for the elision of what is *it*), the purpose of the Anubandhas will be served by Kala and other defects," (thus instead of the rule **अनुदात्तङित आत्मनेपदम्** i. 3. 22 we shall have **कलादात्मनेपदम्**, instead of **स्वरितञितः कर्त्रभिप्राये क्रियाफले** i. 3. 72 we shall have **ध्मातात् कर्त्रभिप्राये क्रियाफले** and so on), our purpose will no doubt be served in this way, but this will not be by the method of Pāṇini. So let let it be as it is.

लिङ्गार्था कलादीनामात्मनेपदलिङ्गत्वसिद्ध्यर्थमित्यर्थः । अन्नंभट्टः । अनुबन्धस्थानीयतत्तद्धात्वादिगतकलादिलिङ्गनिवृत्त्यर्थेत्यर्थः । नाकृतिनिर्देशप्रयुक्तदोषपरिहारमात्रप्रयोजना प्रत्यापत्तिः, किन्तु सर्वानुबन्धेत्संज्ञाशास्त्राद्यकरणफलिकापीति न गौरवमिति भावः । तदेव विवृणोति—तत्तर्हीत्यादिना । धात्वादिगत-

---

* अकारोऽयमक्षरसमाम्नाये विवृत उपदिष्टस्तस्य संवृतताप्रत्यापत्तिः क्रियते । भाष्यम् ८।४।६८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कलादिलिङ्गमित्यर्थः। अपाणिनीयम्। वर्णसमाम्नायसमर्थनाय प्रवृत्तस्य [वृतादिग्रहणापत्तिलक्षणस्य] एकदोषस्य परिहाराय सकलशास्त्रस्य व्याख्यान-सापेक्षगुरुप्रकारेणान्यथाकरणे वृश्चिकभिया पलायमानस्याशीविषमुखे निपात इति न्याय आपतति। नागेशः।

ननु चोक्तम् "आकृत्युपदेशात् सिद्धमिति चेत् संवृतादीनां प्रतिषेधः" इति।

परिहृतमेतत्—गर्गादिबिदादिपाठात् संवृतादीनां निवृत्तिर्भविष्यति इति।

ननु चान्यद् गर्गादिबिदादिपाठ प्रयोजनमुक्तम्।

किम्?

समुदायानां साधुत्वं यथा स्यादिति।

But it has been objected: "If you say the purpose is served by the enunciation of the class, the exclusion of (the defects) Saṃvṛta etc. is necessary". This has been answered: The exclusion of Saṃvṛta and the like by the enunciation of the Garga-group and the Bida-group."

But another reason has been stated for the enunciation of the Garga and Bida groups.

What is that reason?

So that the correctness of the whole may be secured.

एवं तर्ह्युभयमनेन क्रियते—पाठश्चैव विशेष्यते कलादयश्च निवर्त्यन्ते।

कथं पुनरेकेन यत्नेनोभयं लभ्यम्?

लभ्यमित्याह।

कथम्?

द्विगता अपि हेतवो भवन्ति। तद्यथा—आम्राश्च सिक्ताः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितरश्च प्रीणिता इति। तथा वाक्यान्यपि द्विष्ठानि भवन्ति—श्वेतो धावति, अलम्बुसानां यातेति।

'If so, then both purposes are served by it—the words are specifically mentioned and *kala* and other defects are excluded.

How can two things be obtained by one single effort ?

They can be obtained, says the author.

How ?

There are also causes that serve two purposes. Thus it is said mango-trees are watered and the Manes are gratified. (A person goes to the mango-grove and performs the tarpaṇa-ceremony there with water. The ceremony is performed and at the same time the trees are watered. Thus two birds are killed with the same stone, two flies are killed with one flap.)

Similarly, there are sentences also which convey two meanings ; e. g., *s'veto dhāvati* (*s'veto dhāvati* 'the white one runs' and *s'vā ito dhāvati* 'the dog is running away from here) and *alambusānāṃ yātā* (*Alambusānāṃ yātā* 'will go to the country of Alambusa' and *alam busānām yātā* 'able to go to the waters'. बुसमित्युदकनाम—Nir. v. 21.).

एकस्यैव विपादिकादि [रोगजालं] दक्षो [भिषग् यथैकेनैव भेषजेन] निवर्तयत्येवं शब्देषु।...उपायद्वयञ्च लोके शब्दप्रयोगे [क्रमो वा] यौगपद्यं वा। कदाचित् क्रमवतः शब्दान् प्रयुङ्क्ते।...अक्षो भज्यताम्, अक्षो भुज्यताम्, अक्षो दीव्यतामिति। कदाचिदुपसंहृत्य क्रमं यौगपद्येनोच्चारयति—अक्षा भज्यन्तां भुज्यन्तां दीव्यन्तामिति। भर्तृहरिः।

पाठश्चैव विशेष्यते—तत्तत् प्रत्ययवैशिष्ट्येन बोध्यते। नागेशः। द्विगताः—द्वौ अर्थौ गताः प्रयोजनद्वयसम्पादकाः। कैयटः। द्विष्ठानि—द्वयोरर्थयोस्तिष्ठन्ति। नागेशः। आम्रा इति। आम्रमूले तर्पणे कृते प्रयोजनद्वयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्पद्यते। नन्वर्थधर्मोऽयं न शब्दधर्म इति नेष्टसिद्धिः, अत आह [कैयटः] शब्दस्याप्यर्थवद् द्विगतत्वमिति। अन्नंभट्टः।

को धावति ? कीदृशो धावति ? इति प्रश्नद्वयस्यैकमुत्तरम्—'श्वा इतः' इति पदच्छेदेनाद्यस्योत्तरम्, श्वेतो व्याधिविशेषयुक्तो निर्णजक इति द्वितीयस्य। कं जनपदं गन्ता ? को वा समर्थः ? इति प्रश्नद्वयस्य अलमित्युत्तरम्। आद्ये अलम्बुसानां जनपदविशेषाणां द्वितीये बुसानां पलालचूर्णानां गन्ता अलं समर्थ इत्यर्थः। अन्नंभट्टः। बुसानां पलालवर्णानां याता प्राप्तिमान् अलं समर्थः। नागेशः।

In the Padmapurāṇa (Sṛṣṭikhaṇḍa 11.95) we find:

एको मुनिस्ताम्रकराग्रहस्तो ह्याम्रेषु मूले सलिलं ददाति।
आम्राश्च सिक्ताः पितरश्च तृप्ता एका क्रिया द्व्यर्थकरी प्रसिद्धा॥

A similar instance occurs in the S'abarabhāṣya on Jaimini Sūtra ii. 2.25: अपि च दध्युभयमसमर्थं कर्तुं फलं साधयितुं होमञ्च। ननु कम्बलनिर्णेजनवदेतद् भविष्यति। निर्णेजनं ह्युभयं करोति—कम्बलशुद्धिं पादयोश्च निर्मलताम्।

When a coarse blanket is cleaned by being beaten on on the feet, it incidentally serves to cleanse them also.

श्वेतो धावति etc. is quoted by S'abara under iv. 3. 4.

The **आम्रसेचनपितृतर्पणन्याय** occurs again in the Mahābhāṣya under viii. 2. 1:

अथवा द्विगता अपि हेतवो भवन्ति। तद् यथा आम्राश्च सिक्ताः पितरश्च प्रीणिता भवन्ति। तथा वाक्यान्यपि द्विगतानि दृश्यन्ते। श्वेतो धावति। अलम्बुसानां यातेति॥ अथवा वृद्धकुमारीवाक्यवदिदं द्रष्टव्यम्। तद् यथा वृद्धकुमारीन्द्रेणोक्ता—वरं वृणीष्वेति। सा वरमवृणीत—पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुञ्जीरन्निति। न च तावदस्याः पतिर्भवति, कुतः पुत्राः, कुतो गावः, कुतो धान्यम्। तत्रानयैकेन वाक्येन सर्वं संगृहीतं भवति।

Cf. यथेक्षुहेतोः सलिलं प्रसेचितं तृणानि वल्लीरपि तन्निषिञ्चति।
तथा क्रिया धर्मनिमित्तमार्जिता सुखार्थलाभेऽपि न धर्महापिका॥

Another instance is found in the Nyāyamañjarī: **कालेन**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दन्तिनागाः (**काले नदन्ति नागाः** and **कालेन कृष्णेन दन्तिना करिणा अगाः गतवान्**). Even the same words sometimes yield different senses. Thus ("*Ibis redībis nunquam per bella perībis*")

'Go ! you will return again

Never by the foeman slain.'

will mean one thing if we put a comma after *again*, and exactly the opposite thing if we put a comma after *never*.

अथवा इदं तावदयं प्रष्टव्यः—क्वेमे संवृतादयः श्रूयेरन्निति ?

आगमेषु ।

आगमाः शुद्धाः पठ्यन्ते ।

विकारेषु तर्हि ।

विकारा अपि शुद्धाः पठ्यन्ते ।

प्रत्ययेषु तर्हि ।

प्रत्यया अपि शुद्धाः पठ्यन्ते ।

धातुषु तर्हि ।

धातवोऽपि शुद्धाः पठ्यन्ते ।

प्रातिपदिकेषु तर्हि ।

प्रातिपदिकान्यपि शुद्धानि पठ्यन्ते ।

यानि तर्ह्यग्रहणानि प्रातिपदिकानि ।

एतेषामपि स्वरवर्णानुपूर्वीज्ञानार्थं उपदेशः कर्तव्यः । शशः षष इति मा भूत् । पलाशः पलाष इति मा भूत् । मञ्चको मञ्जक इति मा भूत् ।

---

* Cf. "**यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।**
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत् ॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः।
उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः॥

इति श्रीमद्भगवत्पतञ्जलिविरचिते महाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकम्।

Or, he should be asked this: Where would these Saṃvṛta and other defects be heard?

In the insertions.

The insertions are read correctly.

In the substitutes, then.

The substitutes are also read correctly.

In the suffixes, then.

The suffixes are also read correctly.

In the roots, then.

The roots are also read correctly.

In the nominal stems, then.

The nominal stems are also read correctly.

Those nominal stems then which are not mentioned (in the Sūtras and Gaṇas)—for the knowledge of the vowels and consonants and their order in these nominal stems the letters should be enunciated, so that *s'as'ah* (hare) may not become *ṣaṣah*, *palās'ah* may not become *palāṣah*, *mañcakah* may not become *mañjakah*.

The insertions, the substitutes, the suffixes, along with the roots are enunciated (correctly), so these defects *kala* etc. cannot attach to them.

Here ends the first Āhnika of the first section of the first chapter of the Vyākaraṇa-mahābhāṣya composed by the venerable Patañjali.

येऽप्येते गर्गादयः पठिता एतेऽपि न पाणिनिनोत्पादिताः। किं तर्हि? एवंभूताः सन्तीति स्मर्यन्ते। यथैवैते एवंभूता एव स्मर्यन्ते, एवमन्येऽपि शब्दाः सामान्येन प्रतिपादिता उणादयो बहुलमित्यनेन प्रत्ययतः प्रकृतेश्च। तत्र शिष्टप्रयोगमभिसमीक्ष्य प्रकृतिरूहितव्यः प्रत्ययाश्च। भर्तृहरिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यानि तद्ग्रहणानि प्रातिपदकानि । डित्थादीनि । एतेषामपि शिष्ट-प्रयुक्तत्वेनोणादीनां पृषोदरादीनां च साधुत्वाभ्यनुज्ञानात् सर्वेषामत्र संग्रहः सिद्धः । कैयटः । अग्रहणानि कार्यविधावकृतानुवादानीत्यर्थः । एवं "संवृतादीनां प्रतिषेधः" इत्यस्मिन् प्रत्याख्याते इष्टबुद्ध्यर्थ इत्यपि प्रत्याख्यातप्रायमेव । नागेशः ।

Bhaṭṭojí explains the last section thus ;

नन्वेवं किं वर्णोपदेशेन ? न हि तद्बलेन कस्यचिच्छब्दस्य साधुत्वमवगम्यते । न च कलध्मातादिदोषरहितवर्णस्वरूपप्रतिपत्तिरेव तत्फलमिति वाच्यम्, लोकत एवाविप्लुतवर्णप्रतीतेरवश्यं वाच्यत्वात्, अन्यथा प्लुतादिपाठस्यापीह कर्तव्यतापत्तेः । तदुक्तम्—"इष्टबुद्ध्यर्थश्चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घ-प्लुतानामप्युपदेशः" इति । तत्रैकश्रुत्या सूत्रपाठादुदात्तादिस्वरत्रयस्यापि पाठः कर्तव्य इत्युक्तम् । त्रैस्वर्येण पाठे हि अन्यतमस्योच्चारणादेव सिद्धौ द्वयोरेव कर्तव्यतां ब्रूयात् । अत एव च लोके त्रैस्वर्यमेकश्रुत्या विकल्प्यत इति ज्ञाप्यते ।

ननु निर्देशस्य जातिपरत्वात् प्लुतादिसंग्रहः सेत्स्यतीति चेत्, न, संवृतकलप्रभृतीनामपि संग्रहापत्तेः । तदुक्तम्—आकृत्युपदेशात् सिद्धमिति चेत् संवृतादीनां प्रतिषेध इति । तत्र ह्रस्वस्यावर्णस्य संवृतगुणकत्वेऽपि तदित-रेषामचां संवृतत्वं दोषः । आदिशब्दात् कलः । स च स्वोचितस्थानभ्रष्टः । तथा श्वासभूयिष्ठतया ह्रस्वोऽपि दीर्घवल्लक्ष्यमाणो ध्मातः । एवं दीर्घोऽपि ह्रस्ववत् कालसङ्कोचेनोच्यमानोऽर्धकः । एवं करणादिभ्रंशादपि बहवो दोषाः शिक्षाप्रातिशाख्यादिषु प्रसिद्धाः । तत्तद्दोषविशिष्टानामप्यत्वादिजात्याक्रान्त-त्वाज् जातिपरनिर्देशपक्षे तेष्वतिव्याप्तिरिति स्थितम् । न च गर्गादिबिदादि-पाठस्य तन्त्रेणोभयार्थतया वर्णशुद्धिलाभः, अपठितेषु प्रातिपदिकेषु तथाप्यक्षतेः ।

स्यादेतत्, सर्वा अज् व्यक्तयो हल् व्यक्तयश्च शास्त्रान्ते शुद्धाः पठिष्यन्ते—अ अ इतिवत् । न चैवं गौरवम्, तद्बलेन सर्वेषामनुबन्धानां प्रत्याख्यानात्, इत् संज्ञालोपयोरपि त्यागात् । तथाहि शीङ् धातोर्ङकारं परित्यक्ष्यामः, ईकारं च कलं पठिष्यामः; "ङित आत्मनेपदम्" इत्यस्य स्थाने "कलादात्मनेपदम्" इति पठिष्यामः । कलश्च प्रक्रियादशायामेव, यथा ङकारः । प्रयोगे तु शुद्ध एव । प्रत्यापत्तेः शास्त्रान्ते करणमपि शास्त्रीयसकलकार्यं प्रत्यसिद्धतालाभाय । एवं च प्रक्रियायां दोषस्य कलादेराश्रयणेऽपि परिनिष्ठितरूपे न कश्चिद्दोषः । यथा यथान्यासपक्षेऽपि अकारस्य विवृतता प्रक्रियामात्रविषया, न तु प्रयोग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समवायिनी, तद्वदिह पक्षे कलादयोऽपीति न कश्चिद्विशेषः। "धर्मिकल्पनातो हि धर्मकल्पना लघीयसी"ति न्यायश्चेह बोध्यः। ङकारादयो हि धर्मिण एव त्वया पाठ्याः। मया तूभयपठनीयस्य ईकारस्य कलत्वमात्रं कल्प्यमिति।

नन्वस्मिन् पक्षे "स्वरितञितः०" इत्यत्र कथं कार्यमिति चेत् "ध्मातात् कर्त्रभिप्राये" इति। इडाद्यागमाश्च निरनुबन्धाः कलाः पाठ्याः, आनुगादयो ध्माताः, डुकृञ् इत्यस्य स्थाने कृ इति द्विदोषं पाठ्यम्, "आदिरन्त्येन०" इत्यत्रापि "आदिकलौ सह" इत्युक्त्वा अ उ इत्यादिकाः संज्ञाः करिष्यन्ते। कलेनेति तृतीयानिर्देशे सति त्वप्राधान्यात् सिद्धान्त इव चरमवर्णस्य संज्ञा न स्यात्। "ढ्लोपे०" इत्यादौ "अणः" इत्यपनीय "अओः" इति करिष्यते। स्वरसन्धिस्त्वसन्देहाय न करिष्यते। तस्मात् सर्वमनुबन्धकार्यादिकं कलादिभिरेव सिध्यतीति चेत्, सत्यम्।

सिध्यत्येवमपाणिनीयं तु भवति—इति चेत्, अत्रोच्यते—इष्टसिद्ध्यर्थो वर्णोपदेशः। एवं चाकृत्युपदेशादेव उदात्तादिसिद्धिमङ्गीकृत्य कलादिष्वतिप्रसङ्ग इत्थं परिहार्यः—

आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः।
उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः॥

इति। यत्तु अग्रहणेषु प्रातिपदिकेषु प्राप्ता एवेति, तन्न, त्वयापि प्रतिपदपाठस्यावश्याश्रयणीयत्वात्, अन्यथा शश इत्यत्र षष इत्यपि स्यात्, मञ्चके मञ्जक इति, पलाशे पलाष इति।

स्यादेतत्, स्वरवर्णानुपूर्वीनिर्णयाय यदि प्रतिपदपाठस्तर्हि कलादिनिवृ रपि तत एवास्तु, उणादिसूत्रात् पृषोदरादिसूत्राद्वा साधुत्वाभ्यनुज्ञानम्, विशेषावधारणं तु निघण्ट्वादिनेति चेत्, कलादिनिवृत्तिरपि शिक्षादिग्रन्थेनास्तु। सत्यम्। आनुषङ्गिकी कलादिनिवृत्तिः, वर्णोपदेशस्य मुख्यं फलं तु प्रत्याहारनिष्पत्तिः। प्रत्याहारशब्दस्तु अणादिसंज्ञापरः, प्रत्याह्रियन्ते वर्णा एष्विति व्युत्पत्तेः। न च ग्रहणकशास्त्रेण निष्पादितास्वकारादिसंज्ञास्वतिप्रसक्तिः, योगरूढ्यभ्युपगमात्। तस्मात् "आदिरन्त्येन०" इत्येतत्सूत्रप्रसिद्धाः संज्ञाः प्रत्याहारशब्दवाच्याः, तन्निष्पत्तये च वर्णोपदेश इति स्थितम्।

Annaṃbhaṭṭa says in his Uddyotana :

अत्र विषयप्रयोजनाभावाच्छास्त्रानारम्भशङ्का तत्कथनेन, प्रतिपदपाठेनान्यथासिद्ध्या तदनारम्भशङ्का तदशक्तिकथनेन, जातिव्यक्त्योरन्यतरस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Additional Notes.

St. 1. भद्रम् भदि कल्याणे सुखे च । इदित्त्वान्नुम् । भन्देर्नलोपश्च [उ० ३।१३०] इति रक्-प्रत्ययो नलोपश्च । S. on AV. i. 18. 1.

St. 2. p. 9, l. 4 cf. तां मा भगवाञ्छोकस्य पारं तारयतु । छान्दोग्योपनिषत् । ७।१

St. 3. पूर्वया निविदा—The Vedic seers sometimes speak of old hymns and sometims of new hymns. Thus in RV. 1. 143. 1 we find प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः सूनवे भरे। "A stronger, *newer* song I bring to Agni, lifting up heart and voice to that son of strength." P. Cf. Macdonell, *History of Sanskrit Literature* : "The poets of the older parts of the *Rigveda* themselves mention predecessors, in whose wise they sing, whose songs they desire to renew, and speak of ancestral hymns produced in days of yore."

St. 3, p. 14, l. 1 अर्यमेति तमाहुर्यो ददाति । तै० ब्रा० १।१।२।४

St. 4, p. 27. *Tyam ū etc.*—

"This very mighty one whom Gods commision, the Conqueror of cars, ever triumphant,

Swift, fleet to battle, with uninjured fellies, even Tārkṣya for our weal will we call hither." Griffith.

Svasti no mimītām etc.—

"May Bhaga and the As'vins grant us wealth and health, and Goddess Aditi and he whom none resist.

The Asura Pūṣan grant us all prosperity, and Heaven and Earth, most wise, vouchsafe us happiness.

Let us solicit Vāyu for prosperity, and Soma who is Lord of all the world for weal ;

For weal Bṛhaspati with all his company. May the Ādityas bring us health and happiness.

May all the Gods, may Agni the beneficent God of all men, this day be with us for our weal.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Help us, the Rihhus, the Divine Ones, for our good. May Rudra bless us and keep us from calamity.

Prosper us, Mitra, Varuna. O wealthy Pathyā prosper us.

Indra and Agni, prosper us ; prosper us, thou, O Aditi.

Like Sun and Moon may we pursue in full prosperity our path,

And meet with one who gives again, who knows us well and slays us not."

St. 4. द्यौष्पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृलता नः ।
विश्व आदित्या अदिते सजोषा अस्मभ्यं शर्म बहुलं वि यन्त ॥
[ऋ० सं० ६।५१।५]

"O Heaven, our Father, Earth our guileless mother, O Brother Agni, and Ye Vasus, bless us.

Grant us, O Aditi and Ye Adityas, all of one mind, your manifold protection." Griffith.

St. 6. Guṇaviṣṇu's commentary on this stanza :

नः अस्मभ्यम् इन्द्रः स्वस्ति शान्तिं दधातु । किम्भूतः ? वृद्धश्रवाः वृद्धवाक्यकारी* । तथा पूषा विश्ववेदाः सर्वज्ञः, तथा तार्क्ष्यः अरिष्टनेमिः अव्याहतगतिप्रसरः, तथा बृहस्पतिः, स्वस्ति नः दधातु ।

St. 8 भद्रं पश्येमाक्षभिर्यजत्राः—Cf. RV. X. 37. 7-8 :

विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावन्तो अनमीवा अनागसः ।
उद्यन्तं त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्रति पश्येम सूर्य ॥
महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वन्तं चक्षुषेचक्षुषे मयः ।
आरोहन्तं बृहतः पाजसस्परि वयं जीवाः प्रति पश्येम सूर्य ॥

"Cheerful in spirit, evermore, and keen of sight, with store of children, free from sickness and from sin,

---

* Guṇaviṣṇu was evidently thinking of वृद्धस्य वचनं ग्राह्यम्. Later on while explaining सुश्रवः he says : शोभनं श्रवः यशः यस्य सः सुश्रवाः । शृणोतेः कर्मणि "सर्वधातुभ्योऽसुन्" [उ० ४।८८] । छान्दसः सकारलोपः । हे सुश्रवः शोभनकीर्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Long-living, may we look, O Sūrya, upon thee uprising day by day, thou great as Mitra is!

Sūrya, may we live long and look upon thee still, thee, O far-seeing One, bringing the glorious light,

The radiant God, the spring of joy to every eye, as thou art mounting up o'er the high shining flood."

St. 8. Such prayers are frequent in the Vedas; e. g., **मा शूने भूम सूर्यस्य सन्दृशि भद्रं जीवन्तो जरणामशीमहि** RV. X. 37. 6 "Ne'er may we suffer want in presence of the Sun, and, living happy lives, may we attain old age."

St. 8. **स्थिरैः अङ्गैः**—Here **अङ्गैः** is to be taken as standing for 'unimpaired mental powers' also. **अङ्गैरित्युपलक्षणम्। तेन प्रज्ञादीनामपि संग्रहः।**) Cf. RV. vii. 61. 2. : **यस्य ब्रह्माणि सुक्रतू अवाथ आ यत् क्रत्वा न शरदः पृणैथे** "that ye may favour his prayers, ye wise ones, that ye may fill his autumns, as it were, with wisdom". (MACDONELL)

St. 9. This stanza is explained thus in the Vārarucaniruktasamuccaya :

गोतमो विश्वान् देवान् आयुः प्रार्थयते। शतम्। इत् नु इत्येतौ शब्दौ निपातितौ* पदपूरणौ। शरदः शरच्छब्दः संवत्सरपर्यायः। संवत्सरान्। शतसंवत्सरमायुरित्यर्थः। कुतः? उत्तरत्रायुर्ग्रहणात्। अन्ति अत सातत्यगमने इत्यस्यैतद्रूपम्। सातत्येन नित्यत्वं लक्ष्यते। नित्यम्। जरामरणनिर्मुक्तान् कुरुध्वमिति वाक्यशेषः। कीदृशं तदायुः? उच्यते। यत्रा नः। "ऋचि तुनुघमक्षु०" [६।३।१३६] इति दीर्घत्वम्। यत्र यस्मिन्नायुषि। नः अस्माकं चक्रा। लिण्मध्यमपुरुषस्य बहुवचनमेतद्रूपं भविष्यदर्थे द्रष्टव्यम्। करिष्यथ यूयमित्यर्थः। जरसं जराम्। तनूनाम्। तनुशब्दः शरीरवचनः। एतदुक्तं भवति—जीवन् भद्राणि

---

* Should we read **निपातौ** ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पश्यति* इति लोकसंवादात् सर्वसम्पत्साधनमूतमायुः शतसंवत्सर-लक्षणमाशास्यते। उत्तरोऽर्धोऽस्यैव प्रपञ्चः। अस्मासु जीवत्स्वस्मत्पुत्रा अपि पुत्रवन्तो भविष्यन्तीत्यर्थः। प्रार्थनीयं हि तत्। यत आह [मनु० ९।१३७]—

पुत्रण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते ।
अत्र पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥

इति। तादृशमायुः। पुत्रासश्छान्दसस्त्वसुगागमः†। पुत्राश्च यत्र यस्मिन्नायुषि पितरो भवन्ति। भविष्यदर्थे लट्। भविष्यन्ति। मेति प्रतिषेधार्थो निपातो रीरिषतेत्याख्यातेन सम्बध्यते। नः अस्माकम्। मध्यशब्दात् सप्तम्येकवचनस्य "सुपां सुलुक्०" [७।१।३९] इत्याकारः। मध्ये। अपर्याप्त एव पुरुषार्थ इत्यर्थः। रिरिषत‡ रिषतिर्हिंसाकर्मा। मा रिरिषत‡ मा वधिष्ट। तत् आयुः उक्तलक्षणम् गन्तोः दृष्टादृष्टोपकारार्थभूतार्थान् प्राप्तुमित्यर्थः॥

---

* The full stanza runs thus :

न मृतो जयते शत्रूञ्जीवन् भद्राणि पश्यति ।
मृतस्य भद्राणि कुतः कौरवाय कुतो जयः ॥

Cf. कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ।
एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ [रामायण ६।१२८।२]
विनाशे बहवो दोषा जीवन् प्राप्नोति भद्रकम् ।
तस्मात् प्राणान् धरिष्यामि ध्रुवो जीवति सङ्गमः ॥
[रा० ५।१३।४५]

Cf. Hope springs eternal in the human breast ;
Man never is, but always to be blest. POPE

† The correct reading would appear to be छान्दसोऽसुगागमः or छान्दसोऽत्रासुगागमः.

‡ Should we read रीरिषत ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

St. 9. The Rigveda uses शरद् 'autumn', समा 'summer' and हिमा 'winter' in the sense of 'year', just as in English they speak of 'a girl of seven summers' and 'an old maid of seventy winters'. वर्ष (the rainy season) in the sense of 'year' makes its first appearance in the Atharva Veda.

धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः ।। १।६४।१४

"May we foster well, during a hundred winters, son and progeny, enjoying wealth, praiseworthy and active in all matters."

शतं नो रास्व शरदो विचक्षेऽश्यामायूंषि सुधितानि पूर्वा ।। २।२७।१०

"Grant unto us to see a hundred autumns. Ours be the blest long lives of our forefathers."

त्वादत्तेभी रुद्र शन्तमेभिः शतं हिमा अशीय भेषजेभिः । २।३३।२

"By the most salutary medicines, given by thee, O Rudra, I would attain a hundred winters."

अस्मे प्र यन्धि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः ।
अस्मे शतं शरदो जीवसे धा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन् ।। ३।३६।१०

"O Indra, Maghavan, impetuous mover, grant us abundant wealth that brings all blessings.

Give us a hundred autumns for our life-time. Give us, O fair-cheeked Indra, store of heroes."

इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः ।।५।५४।१५

"Accept, O Maruts, graciously this hymn of mine that we may live a hundred winters through its power."

शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन १०।१८।४

"May they survive a hundred lengthened autumns and bury Death beneath this mountain."

दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् १०।८५।३९

'Long-lived be he who is her lord; a hundred autumns let him live."

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम् ।
शतं यथेमं शरदो नयातीन्द्रो विश्वस्य दुरितस्य पारम् ॥

शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान् ।
शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥१०।१६१।३-४

"With hundred-eyed oblation, hundred autumned, bringing a hundred lives have I restored him.

That Indra for a hundred years may lead him safe to the farther shore of all misfortune.

Live, waxing in thy strength, a hundred autumns, live through a hundred springs, a hundred winters.

Through hundred-lived oblation, Indra, Agni, Bṛhaspati, Savitar, yield him for a hundred."

Stanza 10 is thus explained in the Niruktasamuccaya :

अनेन गोतमोऽदितेर्देवमातुर्भूमानमाह—आदितिर्द्यौः । कार्यकारणयोरभेदोपचारेण कार्यस्य कारणव्यपदेशः । अदितिप्रभवत्वाद् द्यौरदितिरित्युच्यते । तथा अदितिरेवान्तरिक्षम् । अदितिर्माता निर्माता, निर्मात्री वृष्टिप्रदानेन सर्वस्य जगतः । स पिता सैव पिता पालयित्री तेनैव कर्मणा सर्वस्य भूतजातस्य । स पुत्रः सैव सर्वथा पुरु बहु त्रायत इति पुत्र इत्युच्यते । किञ्च विश्वे देवा अदितिः । देवमातृत्वात् सर्वे देवा अदितिरित्युच्यन्ते । पञ्च जनाः चत्वारो वर्णाः निषादः पञ्चम इति पञ्च जनाः गन्धर्वादयो वा । ते चादितिप्रभवत्वादेवमुच्यन्ते । किं बहुना अदितिः जातम् । अदितिकारणमेव यत् किञ्चिज्जगति जातम् । अदितिः जनित्वम् । अदितिकारणमेव जनिष्यमाणमुत्पत्स्यमानमपि । सा नः पातु सदादितिरिति वाक्यशेषः । नित्यपक्षेऽक्षीणा प्रकृतिरुच्यते । तद्विकारः सर्वमिति योज्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Abbreviations etc.

AB—ऐ० ब्रा० –Aitareya Brāhmaṇa. AV—अ० सं० – Atharva Veda. AGS—Ās'valāyana Gṛhya Sūtra. AS'S —आ० श्रौ० सू० Ā'svalāyana S'rauta Sūtra. उ०—उणादि सूत्र. ऋ० सं०—RV—Rigveda. GB—Gopatha Brāhmaṇa. Gk.—Greek. तै० ब्रा० – TB—Taittirīya Brāhmaṇa. तै० सं०—TS—Taittirīya Saṁhitā. नि० – Nirukta. निघ० – Nighaṇṭu. शा० श्रौ० सू०—S'S'S—S'āṅkhāyana S'rauta Sūtra. S'GS—Sāṅkhāyana Gṛhya Sūtra. LS'S—Lāṭyāyana S'rauta Sūtra. KS—Kāṭhaka Saṃhitā. MS.—Maitrāyaṇī Saṁhitā. VS—Vājasaneyi-Saṁhitā. रघु०—रघुवंश. श० ब्रा०--S'B—S'atapatha Brāhmaṇa. S.—Sāyaṇa. ह०—हरदत्तः।

आनोभद्रीयं सूक्तम्

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवो नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ।।१।।
देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो नि वर्तताम् ।
देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे ।।२।।
तान् पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ।।३।।
तन्नो वातो मतोभु वातु भेषजं तन्माता पृथिवी तत् पिता द्यौः ।
तद् ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ।।४।।
तमीशानं जगस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ।।५।।
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।।६।।
पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ।।७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥८॥
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥९॥
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥१०॥

पादसूची

अग्निजिह्वा मनवः सूरचक्षसः	7c	पुत्रासो यत्र पितरो भवन्ति	9c
अदब्धासो अपरीतास उद्भिदः	1b	पूषा नो यथा वेदसासमद्वृधे	5c
अदितिर्जातमदितिर्जनित्वम्	10d	पृषदश्वा मरुतः पृश्निमातरः	7a
अदितिर्द्यौरदितिरन्तरिक्षम्	10a	भगं मित्रमदितिं दक्षमस्त्रिधम्	3b
अदितिर्माता स पिता स पुत्रः	10d	भद्रं कर्णेभिः शृणुयाम देवाः	8a
अप्रायुवो रक्षितारो दिवेदिवे	1d	भद्रं पश्येमाक्षभिर्यजत्राः	8b
अर्यमणं वरुणं सोममश्विना	3c	मा नो मध्या रीरिषतायुर्गन्तोः	9d
आ नो भद्राः क्रतवो यन्तु विश्वतः	1a	यत्रा नश्चक्रा जरसं तनूनाम्	9b
तदश्विना शृणुतं धिष्ण्या युवम्	4d	रक्षिता पायुरदब्धः स्वस्तये	5d
तद् ग्रावाणः सोमसुतो मयोभुवः	4c	विश्वे देवा अदितिः पञ्च जनाः	10c
तन्नो वातो मयोभु वातु भेषजम्	4a	विश्वे नो देवा अवसा गमन्निह	7d
तन्माता पृथिवी तत् पिता द्यौः	4b	व्यशेम देवहितं यदायुः	8d
तमीशानं जगतस्तस्थुषस्पतिम्	5a	शतमिन्नु शरदो अन्ति देवाः	9a
तान् पूर्वया निविदा हूमहे वयम्	3a	शुभंयावानो विदथेषु जग्मयः	7b
देवा न आयुः प्र तिरन्तु जीवसे	2d	सरस्वती नः सुभगा मयस्करत्	3d
देवा नो यथा सदमिद्वृधे असन्	1c	स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः	8c
देवानां भद्रा सुमतिर्ऋजूयताम्	2a	स्वस्ति न इन्द्रो वृद्धश्रवाः	6a
देवानां रातिरभि नो नि वर्तताम्	2b	स्वस्ति नो बृहस्पतिर्दधातु	6d
देवानां सख्यमुपसेदिमा वयम्	2c	स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः	6c
धियंजिन्वमवसे हूमहे वयम्	5b	स्वस्ति नः पूषा विश्ववेदाः	6b

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Dr. Suniti Kumar Chatterji, M.A., D.LITT. (London)
Professor, Calcutta University, writes :

The *Manjusha* is run by Dr. Kshitish Chandra Chatterjee of the University of Calcutta, who is one of our most erudite authorities on the technical and other niceties of Sanskrit grammar. He is a student of languages and, in addition, he handles Sanskrit with ease. It has been his love of Sanskrit that has made him carry on the work of editing and bringing out this paper since its inception by himself. Financially it has been a thankless task. It has brought other disadvantages also—the editing and financing of a journal without much wide appeal because of its language has been a source of worry which has had its repercussions on his health. But he has not given in, because he is an incorrigible optimist when he is convinced his cause is noble. Prof. Chatterjee is quite an institution in himself. Then, he has been able to enlist a number of disinterested colleagues who help him with contributions and who are enthusiasts for Sanskrit like imself. And he himself writes. It is a remarkable thing hat although he finds joy in unravelling the intricacies of anskrit grammar, he is not in his mental make-up a dry-as ust grammarian. He has a wonderful sense of humour pported by an inexhaustible fund of anecdotes and stories hich he brings out in racy Sanskrit. So the pages of the *anjusha* at times sparkle with laughter. Comparative guistic he brings in frequently in his articles, and this is emarkable "special feature" of this little paper. Further, oes not confine itself to Sanskrit alone. Proverbs, *Bon-s*, wise sayings, *Mahavakyas*, etc. from different lan-ges, English, French, German, Latin, etc., are rendered ropriately into Sanskrit, demonstrating the capacity of anguage of the Gods to keep pace with turns of ex-sion peculiar to various languages. One can say also here is an "English Section" to this magazine, devoted s entirely to the culture of Sanskrit. Thus, the editor lf is bringing out through this magazine, in instalments, glish translation and commentary on the *Mahabhashya* añjali which, when completed, will be a valuable con-n to the study of Sanskrit grammar through English. ournal like this deserves a much wider appreciation s its due. I think our high school students reading t will find much of interest, pleasure and profit in it.

d and published by Sri Jyotish Chandra Chatterjee, B.A.
Shyambazar Street, Calcutta—4. Printed at the Elm Press
Street, Calcutta—6

e
es-
pers
con-
n their
eir sub-
añjūṣā to
om

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

TECHNICAL TERMS AND TECHNIQUE OF
SANSKRIT GRAMMAR
A Critical, Comparative and Historical Study
BY
KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.
Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) says :
"Honour to whom honour is due. Dr. Chatterji has broke[n] entirely new ground in his **Technical Terms** an[d] **Technique of Sanskrit Grammar** and demonstra[ted] clearly that Bengal, though fallen on evil days, can even n[ow] produce works on Indology that invite and bear compar[ison] with the best work produced in any part of the world. [Who] ever thought that all the technical terms admitted of s[atis]factory explanation and who ever imagined that a wor[k on] grammatical terminology could be made as delightful [as a] novel ? In this volume of nearly 350 pages the tec[hnical] terms of Sanskrit grammar from the Brahmanas, N[...] Pratishakhyas, Panini, Katyayana, Patanjali, do[wn to] Prayogaratnamala and Harinamamrita have been cons[idered] critically and historically in all their bearings and app[...] arbitrary technical terms like *gha*, *bha*, *lat*, *lit*, etc [have] been traced to their sources We have nothin[g but a]dmiration for this masterpiece of schol[arship an]d warmly recommend it to our readers

Price Rupees Ten only. *Foreign Rs. 12*
Postage Extra.

VISVANATH CHATTERJI
81, Shyambazar Street,
CALCUTTA
Phone : B. B. 4049

तन्
तमीश
तान् पूर्व
देवा न आ
देवा नो यथा
देवानां भद्रा सुमति
देवानां रातिरभि नो
देवानां सख्यमुपसेदिमा व
धियंजिन्वमवसे हूमहे वयम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Approved by the Directors of Public Instruction, Madras, Bihar and Mysore.

षष्ठ-वर्षं] [अन्तिमं संख्यात्रयम्

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

Purusottamadeva's Bhāṣāvṛtti on Paṇini's grammar is a fairly well-known work, but far more important and interesting than the Bhāṣāvṛtti is the commentary of Sṛṣṭidhara who quotes profusely from Sanskrit Literature, gives rational explanations of many rules and technical terms. We propose to publish 16 pages of this work in every number of the Mānjūsa besides short stories long stories, humorous skits, discussion on the Vedas, discussions on grammar, proverbs and proverbial sayings form English, Latin, Greek, etc., philological explanations of Pāṇini's rules etc. etc.

Subscribers are earnestly requested to send in their subscription for Vol. VII of the Mañjusā immediately on the receipt of this number. The September no. will be despatched on the 24th of September to those subscribers who had paid their subscription by that time. We are confident our esteemed subscribers will do everything in their power to help along the Mañjūṣa by sending in their subscription in time and by recommending the Mañjūṣā to their friends. We assure our subscribers that from the new year Mañjūṣā will appear regularly as before.

Office : 81, Shyambazar Street, Calcutta—4

Annual Subscription : Rupees Six only.

Foreign—Rupees Nine.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Vol. IV of the Mañjūṣā (396 pages) contains articles on सेविका vs. सेवका, विश्रम vs. विश्राम, पुत्र vs. पुत्त्र, भवतीप्रसादात् vs. भवत्प्रसादात् etc., discussions of various readings, articles on the Mahābhāṣya and Contamination in language, S'aṅkarācārya's Saccidānandānubhava-pradīpikā, short stories, long stories, humorous skits etc. etc. Rs. 6-8 only.

Vol. V of the Mañjūṣā contains 300+32+32 pages including "The S'iva sūtras and the Sanskrit alphabet" "Mahābhāṣya" "Critical studies on the text of Sāyaṇa's commentary on the Rigveda" etc. etc. Rs. 6/8/-

Vol. VI contains the Paspas'ā—Āhnika of the Mahābhāṣya (pp. 33-120), the sublime आनोभद्रीय hymn of Rigveda with six commentries, discussions on Grammar, articles on Kālidāsa, Bhavabhūti, Bhāravi, and other writers, long stories, short stories, humorous skits etc. etc. Rs. 6/8/-

मञ्जूषाया नियमावली

१। मञ्जूषाया वार्षिकं मूल्यं रूपकषट्कम्। ग्राहकवर्षस्य प्रथमसंख्यात एव ग्रहीतव्यम्।

२। प्रतिसौरमासं दशमदिने (आङ्लमासस्य चतुर्विंशे दिवसे) 81, Shyambazar Street, Calcutta 4 इत्यतो मञ्जूषा प्रकाश्यते।

३। मञ्जूषायास्तावद् भागत्रितयं वर्तते। तत्र प्रथमे भागे देवभाषां प्रविविक्षूणां कृते सरलाः श्लोकाः, आभाणकाः, कथाः, आख्यानानि च सन्निवेश्यन्ते, द्वितीये भागे दार्शनिकाः प्रबन्धाः, व्याकरणालङ्कारादीनां विमर्शाः, पाठविचारः, जिज्ञासा मीमांसा च, पुस्तकपरिचयादयश्च प्रकाश्यन्ते ; तृतीये भागे सानुवादाः पारसीकानां गाथाः, ससंस्कृतानुवादं धम्मपदम् महाभाष्यम्, समूला भाषावृत्त्यर्थविवृतिर्मुद्रयन्ते।

श्रीविश्वनाथ-चट्टोपाध्यायः।

८१ श्यामबाजार ष्ट्रीट्, कलिकाता ४।

81, Shyambazar Street, Calcutta 4.

Phone : B. B. 4949.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ॥

मञ्जूषा

June—August 1952. | आषाढ-श्रावण-भाद्राणाम् षष्ठवर्षस्य दशम्यादिसंख्यात्रयम् | Vol. VI Nos. 10-12.

आभाणकादि

१। मौनं सर्वार्थसाधनम् ।

(Gk) Poll' ekhei sige: kala.

मौनमावहति श्रेयांसि बहूनि ।

Speech is silvern, silence golden.

(Germ.) Sprechen ist silbern, Schweigen ist golden.

राजतं भाषणं प्रोक्तं सौवर्णं मौनमुच्यते ।

२। आत्मप्रशंसां परगर्हामिव वर्जयेत् ।

Self-praise is no recommendation.

(Lat.) Laus in proprio ore sordescit.

Praise in one's own mouth is offensive.

उद्वेजयति भूतानि स्वमुखेन प्रशंसनम् ।

3. One potter envies another.

(Gk.) Kai kerameus keramei: koteei.

(Lat.) Figulus figulo invidet, faber fabro.

The potter envies the potter, the smith the smith.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईर्ष्यति कुम्भकाराय कुम्भकारः, कर्माराय च कर्मारः ।
प्रायः समानविद्याः परस्परयशःपुरोभागाः ।

4. Old men are twice children.

(Gk.) Ego: de g' anteipoim' an, ho:s dis pai:des hoi gerontes.

अहन्तु प्रतिब्रूयाम्—जरन्तस्तावद् द्विर्बाला इति ।

(Lat.) Bis pueri senes.

(Lat.) Senex bis puer.

They say an old man is twice a child. *Hamlet.*

Now by my life, Old fools are babes again. *King Lear.*

Two boys, an old man twice a boy. *Cymbeline.*

५। अन्धानां काणो राजा ।

In the kingdom of blind men, the one-eyed is king.

(Germ.) Unter den Blinden ist der einaügige König.

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥

श्रीः

On the Interpretation of a Stanza of the Madhusukta.

[KSHITISH CHANDRA CHATTERJI]

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥
मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः ।
मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥

'The winds waft honey for the man who observes the law, the rivers distil honey (for him). May the herbs be honeyed for us.'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'May we have honey at dawn and dusk (i.e., may night and morn be honeyed), honeyed be the terrestrial region, honeyed be our Father Heaven to us.'

'May the lord of the forest be full of honey for us, may the sun be full of honey, may our milch cow be full of honey for us.'

There is hardly an Indian who has not heard the above stanzas, there is hardly a Brahman who has not uttered this prayer at one time or another, there is hardly a religious man who has not been all the better for meditating on these sublime stanzas. But there is a good deal of difference of opinion regarding the exact meaning of the first stanza and an attempt is made in this paper to ascertain the meaning intended by the author of the hymn.

मधु वाता ऋतायते   मधु । वाताः । ऋतऽयते ।

मधु क्षरन्ति सिन्धवः ।   मधु । क्षरन्ति । सिन्धवः ।

माध्वीर्नः सन्त्वोषधीः ॥ ६ ॥   माध्वीः । नः । सन्तु । ओषधीः ॥६॥

mā'dhu vā'tā ṛtāyate,
ma'dhu kṣaranti si'ndhavaḥ ;
mā'dhvīr naḥ santvo'ṣadhīḥ.

The winds waft honey for the man who observes the law, the rivers distil honey (for him) ; may the herbs be honeyed for us !

वेङ्कटव्याख्यानम् ।

वाता मधु क्षरन्त्यस्मै सत्यमिच्छति यो नरः ।
तद्धि सूर्यसमं ज्योतिस्तदिच्छन्निह सिध्यति ॥
यत् सम्भरन्ति सरघाः पुष्पेभ्यस्तन्मधु स्मृतम् ।
अस्मै सत्यविदे सर्वे तत्क्षरन्तीति कीर्त्यते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[माध्वीः] मधुमत्यः [ओषधीः] ओषधयश्च [नः] अस्माकं [सन्तु] भवन्तु ॥ ६ ॥

स्कन्दस्वामिभाष्यम् । मधुशब्दो रसविशेषवचनोऽन्तर्णीतमत्वर्थश्च, सामर्थ्याच्चेहोदके वर्तते। उदकनाम वा मधुशब्दः। साकाङ्क्षत्वाच्च क्षरन्तीत्याख्यातं पूर्वत्राप्यनुषक्तव्यम्, मधुमत् मधुरसं वृष्टिलक्षणमुदकं क्षरन्ति। लोडर्थे लट्। क्षरन्तु वर्षन्त्वित्यर्थः। के? वाताः। कस्मै? ऋतायते यज्ञं कामयमानस्य ममार्थाय। मधु क्षरन्ति सिन्धवः नद्यः। माध्वीः मध्वेव माध्वम्। स्वार्थिकस्तद्धितश्छान्दसत्वात्। तद्वत्यो माध्व्यः। ईकारप्रत्ययो मत्वर्थे ईवनिपौ छन्दसि* इति। मधुरसा इत्यर्थः। नः अस्माकं सन्तु ओषधीः ॥ ६ ॥

हरदत्तव्याख्या। मधुशब्दो रसविशेषवचनः सन्निह विनियोगसामर्थ्यान्मधुपर्कद्रव्ये वर्तते। वाता वायवः ऋतायते। ऋतशब्दः कर्मवचनः श्रौतस्मार्तलक्षणं कर्म कामयमानाय मह्यमित्यर्थः। क्षरन्तीत्युत्तरत्र श्रूयमाणमाख्यातमनुषक्तव्यम्। लट् च लोडर्थे। क्षरन्तु। सिन्धवः नद्यश्च मधु क्षरन्तु। माध्वीः मध्वेव माध्वम्, तद्वत्यो माध्व्यः। ईवनिपौ छन्दसि† इतीकारप्रत्ययः। मधुमत्य इत्यर्थः। प्रथमार्थे द्वितीयैषा। ओषधयः सन्तु भवन्तु नः अस्माकमोषधयोऽपि मधुप्रदा भवन्त्वित्यर्थः।

उवटभाष्यम्। मधु वाताः। गायत्रस्तृचो वैश्वदेव्यः। मधुमन्तो वा रसवन्तो वा वाताः। वान्त्विति शेषः। कस्मै? ऋतायते यज्ञमिच्छते। मधु क्षरन्ति सिन्धवः। मधु उदकं क्षरन्तु सिन्धवः

* Under **केशाद्वोऽन्यतरस्याम्** v. 2.109 occurs the Vārttika **छदसीवनिपौ च.** The Kāśikā has **छन्दसीवनिपौ च वक्तव्यौ** from the Mahābhāṣya.

† This would appear to be the correct reading. The printed com. has **ईद्वनिपोश्छन्दसि.**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्यन्दमाना नद्यः। माध्वीः नः मधुमत्योऽस्माकं सन्तु भवन्तु [ओषधीः] ओषधयः।

महीधरभाष्यम्। ऋतं यज्ञमिच्छतीति ऋतयन् तस्म ऋतयते यजमानाय वाताः वायवो मधु मधुमन्तो रसवन्तो वान्त्विति शेषः। ऋतयतीत्यत्र "क्यचि च" [७।४।३३] इति प्राप्तस्येत्वस्य "नच्छन्दस्य-पुत्रस्य" [७।४।३५] इत्यभावः। "अश्वाघस्यात्" [७।४।३७] इत्य-श्वाघयोरेव क्यच्यात्त्वविधानात् "अकृत्सार्वधातुकयोः०" [७।४।२५] इत्यात्वमपि न। संहितायां तुच्छान्दसो दीर्घः। मधु। मधुमानित्यग्रे मतुप्-प्रत्ययदर्शनात् सर्वत्र मधुशब्दस्याग्रे मतुब् ज्ञेयः। सिन्धवः स्यन्द-मानाः—नद्यः समुद्रा वा मधु मधुमत् रसवत् उदकं क्षरन्ति। स्रवन्त्वि-त्यर्थः। "तिङां तिङः" [७।१।३९] इति लोटो लडादेशः। ओषधीः ओषधयः नः अस्माकम् माध्वीः मधुररसोपेताः सन्तु॥

सायणभाष्यम्। ऋत्विगाद्यर्थमाहृतं मधुपर्कं "मधु वाताः" इति तृचेन ऋत्विगादिः प्रतिग्रहीतावेक्षेत। तथा च श्रूयते—"मधु वाता ऋतायत इति तृचेनावेक्ष्य" [आ० गृ० सू० १।२४।१४] इति। ऋता-यते ऋतं यज्ञमात्मन इच्छते यजमानाय वाताः वायवः मधु माधुर्यो-पेतं कर्मफलं क्षरन्ति वर्षन्ति प्रयच्छन्तीत्यर्थः। तथा सिन्धवः स्यन्दन-शीला नद्यः समुद्रा वा मधु माधुर्योपेतं स्वकीयं रसं क्षरन्ति। एवं नः अस्मभ्यम् ओषधीः। फलपाकान्ता ओषधयः। ताश्च माध्वीः माधुर्योपेताः सन्तु भवन्तु। मधु। अस्मादुत्तरस्य मत्वर्थीयस्य "लुगकारेकाररेफाश्च वक्तव्याः" [काशिका ४।४।१२८]* इति लुक्। ऋतायते ऋतमात्मन इच्छति। "सुप आत्मनः क्यच्" [३।१।८]। "नच्छन्दस्यपुत्रस्य" [७।४।३५] इतीत्वदीर्घयोर्निषेधः। "अन्येषामपि

* Vārttika iv.4.128.2 runs thus : **लुगकारेकाररेफाश्च** and the Bhāṣya explains : **लुगकारेकाररेफाश्च प्रत्यया वक्तव्याः.**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृश्यते" [६।३।१३७] इति सांहितिकं दीर्घत्वम् ।* क्यजन्ताल्लटः शतृ । "शतुरनुमः०" [६।१।१७३] इति विभक्तेरुदात्तत्वम् । माध्वीः । मधो-रञ् च" [४।५।१२९] इति मत्वर्थीयोऽञ् प्रत्ययः । "ऋत्व्यवास्त्व्य०" [७।४।१७५] इत्यादावञि यणादेशो निपात्यते । "वा छन्दसि" [६।१।१०६] इति पूर्वसवर्णदीर्घत्वम् । ओषधीः । ओषः पाकः आसु धीयत इत्योषधयः । "कर्मण्यधिकरणे च" [३।३।९३] इति कि-प्रत्ययः । "कृदिकारादक्तिनः" [४।१।४५ गणसूत्रम्] इति ङीष्† । जसि पूर्ववत्पूर्वसवर्णदीर्घः । दासीभारादिषु [६।२।४२] पठितत्वात्पूर्वपदप्रकृतिस्वरत्वम् । तच्च‡ घञन्तमाद्युदात्तम् ।

तैत्तिरीयसंहिताभाष्यं सायणीयम् [४।३।९।३] । मधु वाता ऋतायत इति तिसृभिर्दध्ना मधुमिश्रेण कूर्ममभ्यज्य इति । ऋतं

---

* Printed books read : **अन्येषामपि संहितायां दीर्घत्वम्** which is mainfestly incorrect.

† There is not the slightest doubt that this gaṇasūtra, though found in all printed books and MSS. is an interpolation, for with **ङीष्** the word **ओषधी** will be accented on the final syllable, but it is found accented here, as elsewhere, on the first syllable. So Subodhinī says under **ओषधेश्च विभक्तावप्रथमायाम्** vi. 3.132 : **न च कृदिकारादक्तिन इति ङीषा गतार्थता, अन्तोदात्ततापत्तेः, इष्यते त्वाद्युदात्तः "लघावन्ते०" इति फिट् सूत्रात्** [२।११] । It is **ओषधि** that is read in the gaṇa and not **ओषधी**. The word **ओषधि** should normally have been accented on the last syllable according to **गतिकारकोपपदात् कृत्** vi. 2. 139, but because of its inclusion in the **दासीभार** list it is accented on the first syllable. We really fail to understand why inspite of the words **जसि पूर्ववत् पूर्वसवर्णदीर्घः** editor after editor has thought it fit and proper to retain **कृदिकारादक्तिन इति ङीष्** in the body of the commentary.

‡ **तद्** here refers to **पूर्वपद** which is part of a compound.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्ञमात्मन इच्छतीति ऋतायन्, तस्मै यजमानाय वाताः वायवो मधु क्षरन्ति मधुरं रसं स्रावयन्ति। सिन्धवः समुद्राश्च मधुरं रसं स्रावयन्ति। ओषधीः ओषधयोऽपि नः अस्मदर्थं माध्वीः मधुररसोपेताः सन्तु।

सायणभाष्यम् (तैत्तिरीयारण्यकगतम्)। ऋतायते ऋतं परं ब्रह्म तदिच्छते मह्यं वाताः वायवो मधु माधुर्योपलक्षितं सुखं यथा भवति तथा वान्त्विति शेषः। प्रबले तु वायौ रोगोत्पत्त्या तत्त्वज्ञानविघ्नः सम्पद्यते। अतः स मा भूदिति वायोरानुकूल्यं प्रार्थ्यते। एवमुत्तरत्रापि तदानुकूल्यं द्रष्टव्यम्। सिन्धवः नद्यः मधु क्षरन्ति। मधुरमारोग्यकरमुदकं सम्पादयन्त्वित्यर्थः। ओषधीः व्रीहियवादयोऽपि नः अस्माकं माध्वीः मधुराः पथ्यरूपाः सन्तु।

[Since the stanza occurs here in the Āraṇyaka, Sāyaṇa with nice discrimination takes *ṛta* in the sense of Brahman.]

आनन्दगिरिव्याख्यानम्। वाताः वायुभेदाः मधु सुखम् ऋतायते वहन्ति। सिन्धवः नद्यः मधु क्षरन्ति मधुरसान् स्रवन्ति। ओषधीश्च* अस्मान् प्रति माध्वीः मधुररसाः सन्तु।

गुणविष्णुकृतं भाष्यम्। वाताः वायवः मधु ऋतायते वहन्तीत्यर्थः। सिन्धवः नद्यः मधु क्षरन्ति। ओषधीः धान्यादयः माध्वीः मधुयुक्ताः सन्तु। नः इति स्थानत्रयेऽपि योज्यम्।···ऋतायते इति वचनव्यत्ययः।

It will be noticed that both Ānandagiri in his commentary on the Bṛhadāraṇyakabhāṣya of S'aṅkarācārya and Guṇaviṣṇu in his Chāndogyamantrabhāṣya regard ṛ*tāyate* as a finite verb in the sense of *vahanti*, but this is open to grave objections. In the first place, 'ṛ*tāyate*' is accented and that on the final syllable. A finite verb in the principal clause is, as a rule, unaccented, but even supposing that 'ṛ*tāyate*' is

* Read **ओषधीः ओषधयश्च।**

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

accented here acc. to *cādilope vibhāṣā* viii. i. 63, the accent is wrong. Whether 'ṛtāyate' be formed with *-kyac* or with *-kyaṅ*, the ending ते will be unaccented acc. to तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङो: vi. i. 186. In the *second place* the nom. pl. वाता: can hardly be expected to agree with the singular verb ऋतायते. Of course, if वाता had been a neuter plural we could have construed it with a singular verb as in the well-known example धृष्णवे धीयते धना RV. i. 81. 3 or as in Greek, but वाता can by no stretch of the imagination be regarded as a neuter plural. In the third place 'ṛ*tāyate*' does not usually mean *vahati*. The word occurs again in the immediately following hymn :

त्वं सोम महे भगं त्वं यून ऋतायते ।
दक्षं दधासि जीवसे ॥

where the sense *vahati* would not be suitable. But the most fatal objection is that if ṛ*tāyate* be taken to mean *vahanti* by having recourse to several *vyatyayas* and the dictum अनेकार्था हि धातव: taking धातव: in a very wide sense including नामधातु's, then the atmosphere would be honeyed for both the righteous and the unrighteous, but the seer asserts that the atmosphere is honeyed for the righteous alone. This is why he uses the indicative with *kṣaranti* and the imperative with *santu* though he might have easily used *kṣarantu* without detriment to the metre. The idea is : To the man who is holy the winds waft honey, the rivers distil honey ; we are holy, so naturally the wind will waft honey to us, the rivers will distil honey for us ; let the herbs be honeyed for us and so on. The sage prays in this way because he knows that he is a holy man. This reminds one of the well-known hemistich of Kālidāsa :

सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्त:करणप्रवृत्तय: ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in which **सताम्** is the most important word, even as **ऋतायते** is the most important word in our mantra. But for the word *satām* the most inveterate sinner would be able to justify his most heinous deeds on the ground that his mind inclined in that direction, as many people actually do, by saying :

त्वया हृषीकेश हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ॥

The word *satām*, however, makes it clear that the principle holds good only in the case of men who are good by birth and education (**निसर्गसंस्कारविनीत**). As Kumārila Bhaṭṭa says in his Tantravārttika :

यथा रुमायां लवणाकरेषु मेरौ यथा वोज्ज्वलरत्नभूमौ ।
यज्जायते तन्मयमेव तत्स्यात्तथा भवेद्वेदविदात्मतुष्टिः ॥
एवं च विद्वद्वदनाद्विनिर्गतं प्रसिद्धरूपं कविभिर्निरूपितम् ।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥

From the above it will be clear that just as it is not possible to take **ऋजूयताम्** as a finite verb in

देवानां भद्रा सुमतिर्ऋजूयतां
देवानां रातिरभि नो नि वर्तताम् ।
देवानां सख्यमुप सेदिमा वयं
देवा न आयुः प्र तिरन्तु जीवसे ॥

the second stanza of the preceding hymn (i. 89), so it is not possible to take *ṛtāyate* in the Madhu-sūkta as a finite verb and we should take *kṣaranti* in its usual sense of 'distil' and not in the unusual sense of 'let them distil'.

। श्रीसदाशिवसमर्पणमस्तु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारविः सारविद्यः

[श्रीमहालिङ्गशास्त्री]

पद्धतिप्रवर्तकस्य भारवेः कविकुञ्जरत्वम् ।

भारवेरर्वाङ् महाकविर्माघः सर्वथा भारविक्षुण्णमेवाध्वानमनुसरन् स्वप्रज्ञाप्रभावं सफलयामास। यादवाभ्युदयावधीनि च महाकाव्यान्यनेकानि भारविप्रस्थानानुपातीन्येव। अस्ति किल सुगमान्तरा द्वयी महाकाव्यपद्धतिः ; तत्रैका कालिदासोपज्ञं प्रवृत्ता, इतरा च भारव्युपज्ञम्। द्वावप्येतौ महाकाव्यघण्टापथकविकुञ्जरौ। उक्तं श्रीनीलकण्ठदीक्षितैः—

अन्धास्ते कवयो येषां पन्थाः क्षुण्णः परैर्भवेत् ।
परेषां च यदाक्रान्तः पन्थास्ते कविकुञ्जराः ।। इति ।
उभौ विभिन्नदिक्कावपि तुल्यं यशः प्रत्यपद्येताम् ।
स्वस्वयूथसमस्कन्धमुन्नताविति समीचीनम् ।।

भारवि-काव्यगुण-विवेकः

कालिदासभारव्योः प्रत्येकविलक्षणां काव्यसमुत्कर्षरेखामुट्टङ्कयितुकामेन केनचिद् गूढार्थः प्रहेलिकाप्रायोऽयं श्लोकः उपक्षिप्तः—

अन्तरं कियदाख्यान्ति सन्तो रघुकिरातयोः ।
अन्तरं यावदाख्यान्ति सन्तो रघुकिरातयोः ।। इति ।

अस्यार्थः। काव्यनायकयोर्यदन्तरं तदेव काव्ययोरन्तरमिति फलति। तेन ह्येवं भावो ज्ञेयः—

रघुरिव रघुवंशं काव्यमेकान्तहृद्यं
मधुरमतिगभीरं मञ्जुलोदारवृत्तम् ।
अथ स इव किरातो भारवेः काव्यमेतद्
बहिरसरलमन्तर्भूरिमाहात्म्ययुक्तम् ।।

रघुर्मानुषोऽप्यमानुषप्रभावो वर्णितः कालिदासकाव्ये। किरातो दिव्योऽपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानुषविडम्बनामाचरन् वर्णितो भारविकाव्य। लोकातीतवृत्तान्त-मनोहारि रघुचरितं लौकिकनायकसम्बद्धमपि। अलौकिकनायक-सम्बद्धमपि किरातचरितं लोकधर्मानुवर्ति विहितं भारविणा। रघोरिन्द्रेण कृतं युद्धम्, दिग्विजयः, सर्वस्वदक्षिणो यज्ञः, कुबेराभियुयुक्षा, कोशागारे स्वर्णवर्षप्राप्तिः, कौत्सप्रीणनम्, पुत्रविवाहानन्तरं राज्यान्निवृत्य तुरीयपुरुषार्थसाधनमित्यादि चरितम् अतिमनोहरमपि, उदात्त-सन्मार्गनिदर्शनप्रवणमपि, प्रमितातिशायि कथाच्छायानुवृत्ति च सत् अर्थवाद इव भावप्राधान्यमश्नुते, लोकधर्मं तलस्पर्शितया नावगाहते। भारवीयं तु काव्यं क्वचित् कविसमयानुरोधेन अप्सरोगणमवतारय-दपि, प्रतिपादयदपि दिव्यास्त्रप्रभावाश्चर्यचर्यं युद्धम्, प्राधान्यतः लोकधर्ममेव प्रमाणीकृत्य सुजनदुर्जनसंघट्टे दुर्जनोदयम्, सुजनदौजन्यम्, प्राप्तोदयस्यापि दुर्जनस्य शङ्कान्तकशिथिलताम्, प्राप्तावग्रहस्यापि सुजनस्य अप्रकम्प्यां धृतिम्, साधुसमागमेन सुजनस्योत्थानम्, अविगीतमार्गोपहितं तस्य प्रयतनम्, तस्यैव सम्यगध्यात्मगुणस्थैर्यम्. अन्ततः ईश्वरानुग्रहेण महार्घफलावाप्तिं, प्रतिष्ठां च महतीं यथावत् प्रतिपादयति।

शशिप्रभेव प्रह्लादं कालिदाससरस्वती।
तनोति भारवेर्वाणी प्रबोधं भा रवेरिव॥

तथा चोक्तं राजशेखरेण—

"कृत्स्नप्रबोधकृद्वाणी भा रवेरिव भारवेः।" इति।

तेन हीत्थं विवेचयितुं शक्यम्। कालिदासो भावकविः भारविः प्रज्ञा-कविरिति॥

रसभाववती वाणी कालिदासस्य कोमला।
शोभते सोपमोत्प्रेक्षा दृष्टान्तादिपरिष्कृता॥
स्वभावोक्तिपरा वाचो भारवेरपि गौरवम्।
यान्ति गम्भीरनिर्ह्लादा विन्यस्तार्थान्तरप्रियाः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनयोरन्तरं चैतत् समासादुपवर्ण्यते ।
सौन्दर्यं दृष्टवानाद्यः मर्त्यसंविदगोचरम् ।।
तत्त्वमाकलयत्यन्यो विवेकोर्जितया धिया ।।
चिदानन्दात्मकं ब्रह्म तद्धि योगिभिरिष्यते ।
प्रकाशाह्लादविप्रुड्भ्यां विकासिप्रतिभास्वरे ।।
प्रसृताभ्यां ततश्चोभौ तौ कवी पारदर्शिनौ ।।
काचार्तं वलिरं काणमल्पाक्षं चाप्यचक्षुषम् ।
चरितार्थतया युङ्क्तः संसारं किञ्चिदन्तरा ।।

ईदृशमाशयं गर्भीकुर्वन्नेव प्राक्तनसहृदयानामाभाणको भारविमन्तरा प्रावर्तत—"**भारवेरर्थगौरवम्**" इति ।। इदमेव च भारवेः सारवित्त्वमस्मदभिमतम् ।।

यद्व्याचष्टे नयविवरणैरान्तरं लोकतत्त्वं
नारं नारायणमिव परं यन्निबध्नाति वीरम् ।
यश्चाशास्ते पशुपतिपदालम्बनं सर्वयत्नै-
स्तद्धि प्रौढिप्रचुरवचसो भारवेः सारवित्त्वम् ।।

पञ्चेन्द्रियाणि हृदयं वचसा गुरूणां
शम्भौ निधाय महिमानमवाप्नुवन्तु ।
अद्येति सूचितमिव प्रहितेन पान्थैः
शम्भोः पदं नरवरेण किरातकाव्ये ।।

इति शम्

अनुबन्धः (१)

प्राक्तनानि भारविप्रशस्तिपद्यानि ।

१ । उपमा कालिदासस्य भारवेरर्थगौरवम् । इति कस्यापि ।।

२ । नारिकेलफलसंमितं वचो भारवेः सपदि तद्विभज्यते ।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम् ।।

इति मल्लिनाथः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३। अन्तरं कियदाख्यान्ति सन्तो रघुकिरातयोः।
अन्तरं यावदाख्यान्ति सन्तो रघुकिरातयोः॥
इति सूक्तिमुक्तावल्यां कस्यापि॥

४। कृत्स्नप्रबोधकृद्वाणी भारवेः। इति राजशेखरस्य॥

५। विमर्दव्यक्तसौरभ्या भारती भारवेः कवेः।
धत्ते बकुलमालेव विदग्धानां चमत्क्रियाम्॥
इति गङ्गादेवी॥

६। प्रकृतिमधुरा भारविगिरः॥ इति सदुक्तिकर्णामृते॥

७। प्रदेशवृत्त्याऽपि महान्तमर्थं
प्रदर्शयन्ती रसमादधाना।
सा भारवेः सत्पथदीपिकेव
रम्याकृतिः कैरिव नोपजीव्या॥ इति कस्यापि॥

८। तादात्म्यं भावरसयोः भारविः स्पष्टमूचिवान्॥
इति कस्यापि॥

९। भारविः सारविद्योऽसौ प्रतिभारविरेव नः॥ इति वयम्॥

अनुबन्धः (२)

"भारवेर्वाक्सारवित्त्वम्"

१। विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः।
स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः॥ २।३

२। परिणामसुखे गरीयसि व्यथकेऽस्मिन् वचसि क्षतौजसाम्।
अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः॥ २।४

३। अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे।
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते॥३।२६

४। स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्॥
२।२७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५। उपपत्तिरुदाहृता बलादनुमानेन न चागमः क्षतः।
इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः ॥ २।२८
६। मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम्।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् ॥२।३३
७। प्रसादरम्यमोजस्वि गरीयो लाघवान्वितम्।
साकाङ्क्षमनुपस्कारं विष्वग्गति निराकुलम् ॥ ११।३८
८। न्यायनिर्णीतसारत्वान्निरपेक्षमिवागमे।
अप्रकम्प्यतयाऽन्येषामाम्नायवचनोपमम् ॥ ११।३९
९। अलङ्घ्यत्वाज्जनैरन्यैः क्षुभितोदन्वदूर्जितम्।
औदार्यादर्थसम्पत्तेः शान्तं चित्तमृषेरिव ॥ ११।४०
१०। इदमीदृग्गुणोपेतं लब्धावसरसाधनम्।
व्याकुर्यात्कः प्रियं वाक्यं यो वक्ता नेदृगाशयः ॥११।४१
११। अविज्ञातप्रबन्धस्य वचो वाचस्पतेरपि।
व्रजत्यफलतामेव नयद्रुह इवेहितम् ॥ ११।४३
१२। सलेशमुल्लिङ्गितशात्रवेङ्गितः कृती गिरां विस्तरतत्त्वसंग्रहे।
अयं प्रमाणीकृतकालसाधनः प्रशान्तसंरम्भ इवाददे वचः ॥
१४।२
१३। विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम्।
प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती ॥१४।३
१४। भवन्ति ते सभ्यतमा विपश्चितां मनोगतं वाचि निवेशयन्ति ये।
नयन्ति तेष्वप्युपपन्ननैपुणा गभीरमर्थं कतिचित्
प्रकाशताम् ॥ १४।४
१५। स्तुवन्ति गुर्वीमभिधेयसम्पदं विशुद्धिमुक्तेरपरे विपश्चितः।
इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्वमनोरमा गिरः ॥
१४।५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरणस्य बीजम्

[श्रीकुमुदरञ्जन-रायः]

भारतीयसाहित्ये सर्वशास्त्राणां सर्वग्रन्थानाञ्च मूलसूत्रं बीजभूतं पदं वाक्यं वा विद्यते। एवं वेदानाम् "एकं वा इदं वि बभूव सर्वम्" (ऋ० सं० ८।५८।२) "एकं सद् विप्रा बहुधा वदन्ति" (ऋ सं० १।१६४। ४६) इत्यादि, उपनिषदाम् "आत्मा वा इदमेक एवाग्र आसीत्," "एको देवः सर्वभूतेषु गूढः" इत्यादि, धर्मादिशास्त्राणाम् "एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः," "धर्मेण हि सहायेन तमस्तरति दुस्तरम्" इत्यादि (मनुसंहितायाम्), दर्शनशास्त्राणाम् "एवं तत्त्वाभ्यासात् परिशुद्ध-मुत्पद्यते ज्ञानम्" इति, रामायणस्य "मा निषाद प्रतिष्ठां त्मगमः शाश्वतीः समाः" इति, महाभारतस्य "यतो धर्मस्ततो जयः" इति, पुराणानां "पुरापरम्परां वक्ति पुराणं तेन वै स्मृतम्" इति पद्मपुराणे च दृश्यते। एवमष्टाध्याय्यां व्याकरणानां मूलभूतं पदमस्ति। तच्च "कर्मधारय" इति मे मतमुत्तमम्।

एष शब्दः बहुधा व्याख्यानसहः सन् एकतः व्याकरणस्य सर्वं प्रकरणं सुष्ठु गमयति, अन्यतः संसारतत्त्वं प्रकृतितत्त्वं मोक्षतत्त्वं च प्रख्यापयति। कर्मधारय इति समासविशेषस्य सुप्रसिद्धा संज्ञा। स च तत्पुरुषविशेषः। एव पाणिनिना सूत्रितम् "तत्पुरुषः समानाधि-करणः कर्मधारयः" (१।२।४२) इति। भाष्य-वृत्ति-कौस्तुभमनोरमादि-ग्रन्थे कर्मधारयशब्दस्य विशेषविश्लेषणं न लभ्यते, परन्तु सूक्ष्मेक्षिकया विश्लेषितश्चेत् एष सर्वसमासान् क्रोडीकरोति तिङ्कृत्तद्धितादींश्च वक्षसि वहति, अन्तरे च जगत्तत्त्वं प्रज्वलयति। तद् यथा—

धारयति इति धारि+श (कर्तरि)=धारयः,धारक इत्यर्थः। "अनुप-सर्गाल्लिम्पविन्दधारि—" (३।१।१३८) इति सूत्रेण। कर्मणो धारयः (धारकः) इति षष्ठीसमासेन कर्मधारयशब्दः तत्पुरुषं बोधयति। ततश्च संज्ञाविशेषे पर्यवस्यति। कर्मणा धारयः, कर्मणो धारयः, कर्मणि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारयः इत्यादिरपि तत्पुरुषः सहसुपेति वा समासः सम्भवति। अर्थश्च "यः कर्मणां धारकस्तत्र दक्षो वा" इति। यद्वा कर्मरूपो धारयः (धारकः) इति उत्तरपदलोपिसमासः। कर्म च जगतो धारकम्, अतश्च कर्म एव संसारधारकम्। एवमर्थे कर्म एव धारय इत्यपि मयूरव्यंसकादिवत् समासो भवति। कर्म धारयः (धारको जगद्धारकः)इव इति कर्मधारयः,"उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (२।१।५६) इति समासः। यतः कर्म विष्णुरिव प्रभविष्णु ग्रसिष्णु च। कर्म इव धारयः (धारकः), कर्म यथा सर्वं धारयति एवं पुरुषोऽपि स्यात्, "उपमानानि सामान्यवचनैः" इति समासः। पुनश्च, कर्म धारयं (धारकं) यस्मिन् संसारे, स कर्मधारयः (संसारप्रवाहः) इति बहुव्रीहिसमासोऽपि सम्भवति। कर्म विना संसारप्रवाहस्य असम्भवात्, ब्रह्मादिकीटपर्यन्तानां कर्माधीनत्वाच्च। यद्वा धारयति इति धारयः धारकः पालकः, श्रीविष्णुरित्यर्थः। कर्म च धारयश्च इति द्वन्द्वे सति कर्मधारयौ इत्यस्य स्थले कर्मधारय इति आर्षः सौत्रो वा संज्ञात्वात्। कर्म तथा संसारपालको विष्णुश्च इति द्वयमपि जगति प्राधान्येन अभिनिविष्टम्। श्रीभगवान् पालकोऽस्ति, कर्म च संसारचक्रं चालयति। तथा च श्रीगीतायामुक्तम् "भूतभावोद्भवकरो विसर्गः कर्मसंज्ञकः" इति। पुनश्च—धृ+णिच्+लोट् हि इति धारय धारणं कुरु इत्यर्थः। ततः कर्म धारय (कुरु) इति यस्मिन् काले संसारे च वर्तते तत् कर्मधारयम्। तिष्ठद्ग्वादिन्यायेन निपातनान् अव्ययीभावेन सिद्धम्। "तिष्ठद्गुप्रभृतीनि च" इत्यत्र च-कारस्य अनुक्तसमुच्चयार्थत्वमाश्रित्य च कथमपि समाधेयम्। अत एव श्रीगातायाम् उक्तम्—तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च" इति। जीवस्य कर्मवशात् जन्मपरिग्रहान्निर्दिष्टकाले निर्दिष्टक्रियाकरणाच्च एवं व्याख्यातुमुत्सहे। अस्यां प्रतिक्रियायां कर्मधारयम् इत्यर्थे कर्मधारय इति व्यवहार आर्षः सौत्रः संज्ञानिबन्धनश्च। एवं बहुधा व्याख्यातस्य अस्येदं हृदयम्—कर्मवशात् नियतं जीवस्य जन्म स्यात्, ततः स कर्म करिष्यति धारयिष्यति ; संसारचक्रानुवर्तनमनु·

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गच्छति च ; एवं यथाकालं कर्मधारणात् ("न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्" इति भगवद्वाक्यात्) स बहुव्रीहीन् अर्जयति, पश्चाद् दारपरिग्रहं कृत्वा द्वन्द्वो जायते, काले व्यतीते तत्त्वज्ञानाभ्यासात् स एव जीवस्तत्पुरुषो जायते, ब्रह्मस्वरूपं लब्ध्वा तत्पुरुषो भवति इत्यर्थः। पश्चाच्च साधनसमाधियोगेन, अव्ययात्मना एकीभूतत्वात् अव्ययीभावश्च जीवः स्यात्। अतः सार्थकनामासौ शब्दः मुख्य-लक्ष्य-व्यङ्ग्यार्थाश्रयणेन व्याकरणस्य समासजालं तिङन्त-कृदन्तप्रक्रियां तथा भङ्ग्यन्तरेण तत्त्वज्ञानं बोधयित्वा शब्दशास्त्रस्य प्रक्रियासमूहं समीहते, निःश्रेयसमाश्रयति च। सुष्ठु खल्वाह भगवान् पतञ्जलिः—"एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तश्च स्वर्गे लोके कामधुग् भवति" इति। तथा चोक्तं "गौर्गाः कामदुघा" इति।

तद्धितप्रक्रिया नानेन शब्देन लेशतोपि बोधिता इति चेत्, इत्थं योजनीयम्—ध्रियते प्राणान् धारयति इति धरः (धृ तुदादि+पचाद्यच्)। जीव इत्यर्थ। ततः धर एव धारः इति प्रज्ञाद्यण्। धारं (जीवं) याति गच्छति इति धार+या+क (कर्तरि)=धारयम्। यत् (कर्म) जीवम् अवश्यम् गच्छति प्राप्नोति वा। ततः—कर्म एव धारयम् (जीवानुगमकम्) इति समासे कर्मधारयम्, तत्स्थले कर्मधारय इति पुंस्त्वं पूर्ववत् आर्षत्वेन संज्ञात्वेन च समाधेयम्, संज्ञाशब्दस्य स्वतःप्रमाणत्वात्। यद्वा—कर्मणो धारयः (धारकः)। सः अस्ति अस्मिन् संसारे इति अर्श आद्यचि कर्मधारयः (संसारः)। एवं शब्देनानेन तद्धितमपि गम्यते। ततः समस्तव्याकरणप्रक्रियां व्यनक्ति समाजराष्ट्र-संसारतत्त्वं च प्रख्यापयति एकोऽसौ कर्मधारयशब्दः। यथा ब्रह्मणि तथा अस्मिन्नपि सर्वमेव प्रकारान्तरेण प्रतिष्ठितम्। अत एतदेव व्याकरणस्य व्यक्तेः जातेश्च बीजभूतं पदम्, ब्रह्मसमुद्भवं क्षात्रं तेज इव दुरासदम्। इत्यास्तां विस्तरः।

शास्त्रसागरनिष्णातं ध्यानाकाशमहाग्रहम्।
द्रष्टारं शब्दशास्त्रस्य वन्दे मुनिं महामतिम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदनुक्तं दुरुक्तं वा मतिमोहसमुद्भवम् ।
सन्तः सन्ततकारुण्यास्तत् सर्वं मर्षयन्तु मे ।।

सुभाषितानि

उत्सवादुत्सवं यान्ति स्वर्गात् स्वर्गं सुखात् सुखम् ।
श्रद्दधानाश्च दान्ताश्च धनाढ्याः शुभकारिणः ।।
दुर्भिक्षादेव दुर्भिक्षं क्लेशात् क्लेशं भयाद्भयम् ।
मृतेभ्यः प्रमृतं यान्ति दरिद्राः पापकारिणः ।।
महाभारतम् ।

उचितं नाम नारङ्ग्यां केतक्यामपि कण्टकाः ।
रसगन्धोज्झिते किं ते कण्टकाः कण्टकारिके ।।
शार्ङ्गधरपद्धतिः ।।

चन्दने विषधरान् सहामहे वस्तु सुन्दरमगुप्तिमत् कुतः ।
रक्षितुं वद किमात्मसौष्ठवं कण्टकाः खदिर सञ्चितास्त्वया ।।

श्लाघ्यं महत्त्वमेकस्य नभसो भुवनत्रये ।
परस्य वृद्धौ यन्नैव गणयत्यात्मनः क्षयम् ।।
महत्त्वं धिग्धिगेतस्य गगनस्यात्मवृद्धये ।
उद्वीक्षमाणमेवास्ते यत् परस्य परिक्षयम् ।।

तीव्रं रविस्तपति नीच इवाचिराढ्यः
पिच्छं शिखी त्यजति मित्रमिवाकृतज्ञः ।
तोयं प्रसीदति मुनेरिव चित्तवृत्तिः
कामी दरिद्र इव शोषमुपैति पङ्कः ।।

उदस्योच्चैः पुच्छं शिरसि निहितं जीर्णजटिले
यदृच्छाव्यापन्नद्विपपिशितलेशाः कवलिताः ।
गुहागर्भे शून्ये सुचिरमुषितं जम्बुक सखे
तदेतत् किं कुर्मो यदसि न गतः सिंहसमताम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामैकदेशग्रहणेन नाममात्रग्रहणम्

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

ऐतरेयब्राह्मणे श्रूयते—पथ्यां यजति [१ अ० १ ख०] इति। तत्र षड्गुरुशिष्येणोक्तम्—

पथ्येति त्वेकदेशेन पथ्यास्वस्तिर्हि कथ्यते।
भीमसेनो यथा भीमः सत्यभामा च भामिनी॥
भामेति चोच्यते देवी त्रैलोक्ये गुरुवल्लभा।
पुरस्तात्तु यजेदत्र पथ्यास्वस्तिं हि देवताम्॥ इति।

पुनरपि श्रूयते—'पथ्यां यजति' [२ अ० २ ख०] इति। तत्र च षड्गुरु-शिष्येणोक्तम्—"पथ्यास्वस्तिदेवतात्र पथ्येत्युक्तैकदेशतः' इति।

विचित्रो विवेकः

[श्रीउपेन्द्रनाथ-गङ्गोपाध्यायः]

(२)

प्रभूतान्वेषणेनापि पुनः प्रियमित्रसब्रह्मचारी कोऽपि नोपलब्धः। अगतिकतया च गौरीकान्तेन भृशनिन्दितो व्यवहाराजीव एव शरणीकृतः।

व्यवहाराजीवः करुणावसुः स्वीयं पारिश्रमिकं समादाय व्यवहाराजीवपत्रं धर्माधिकरणे प्रदत्तवान्। ततश्च पत्रादिकं परीक्ष्योक्तवान् 'वर्तते पन्थाः' इति।

गौरीकान्तः सकौतूहलमपृच्छत्, वर्तते ? को वा पन्था वर्तते ? इति।

ऋणादानावसरे सूर्यकान्तेन यत् तावत् पत्रं विलिख्य प्रदत्तम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य कालपूर्तेः पूर्वमेव प्रियमित्रः सूर्यकान्तेन प्रथमपत्रानुसारेण द्वितीयमपि पत्रं लेखितवान्। यथारीत्युभयमपि पत्रं न्यायाधीशस्य पुरस्तादुपस्थापितम् इति तु न पृथग् वक्तुमावश्यकम्।

करुणामयोऽवदत्, प्रथमपत्रे भवतः पितुर्यो नामसन्निवेशो वर्तते स द्वितीयपत्रगतैर्नामाक्षरैः सर्वथा न संवदति। अत एवोत्तरेणास्माभिर्वक्तव्यम्—द्वितीयपत्रस्य नामाक्षराणि कूटकानि। स्वाम्यनिवर्तनं मा भूदिति भवदीयपितुर्मरणादूर्ध्वं वादिपक्षेण द्वितीयं कूटपत्रं प्रणीतमिति।

पथो विवरणमाकर्ण्य गौरीकान्तस्य वदनकमलं विच्छायतामभजत्। स च मृदुनानुद्दीप्तेन च कण्ठेनावदत्, परं करुणामहोदय, पत्रस्य नवीकरणावसरे पितुः शरीरावस्था नितरामेव शोचनीयासीदिति द्वितीयपत्रस्य नामाक्षराणां कदाचित् कथञ्चिद्विसंवादः स्यादिति।

मतस्यास्य कमपि प्रतिवादमकृत्वैव करुणामयोऽवदत्, तत्तु स्यादेव, परं नामाक्षरवर्जं द्वितीयपत्रस्य किमपि वर्णं भवतः पितुर्हस्तान्न निर्गतम् इति तु सत्यम्? इति।

गौरीकान्तोऽवदत्, बाढं सत्यम्। परमवसरे तस्मिन् नामाक्षरसन्निवेशमन्तरेणापरस्य कस्यापि लेखने शक्तिर्नासीन्मे पितुरिति।

करुणामयोऽवदत्, तदपि सम्भवति, परमेतत् सर्वं प्रतिपक्षेणैव प्रमापयितव्यम्, न भवता। किञ्च, द्वितीयपत्रस्य विवृत्यंशः सूर्यकान्तमहोदयस्य नेदिष्ठ-स्वजनस्य भवत इति यावत् लेखो न भवति। उच्यतां तावदेतदपि सत्यं न वेति।

गौरीकान्तोऽवदत्, अथ किम्। सत्यमेव। परं पत्रस्य नवीकरणावसरे न खलु मयात्रावस्थितम्, कलिकातायामेवाहमासम्।

करुणामयोऽवदत्, तत्रापि कदाचिदासीथाः, परं तदपि प्रमापयितव्यं प्रतिपक्षेणेति।

यत्किमपि स वक्तुमिच्छति तत् सर्वमेव वादिपक्षेण प्रमापयितव्यमिति श्रुत्वा गौरीकान्तोऽपरं किमपि वक्तुं नोदसहत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करुणावसुरवदत्, किञ्च, द्वितीयपत्रस्य दिननिर्देशत ऊर्ध्वं मूलस्य वा वृद्धेर्वा लेशतोऽपि प्रत्यर्पणस्य समुल्लेखो नास्ति। द्वितीयपत्रस्य कूटत्वप्रमापण एतदपि बाहुल्येन साहायकं करिष्यति।

कदाचित् कुर्यात्, परं मूलनीतिरेव कथमपि सूर्यकान्तस्य मनःपूता नाभवत्। पञ्चभ्यो वत्सरेभ्यः पूर्वं प्रथमपत्रोक्तदिवसे प्रियमित्रेण गणनापुरःसरं पितुः पाणौ रूप्यकाणां सहस्रद्वितयं प्रदत्तम्। तत्र तस्य प्रत्यक्षतो विज्ञानं वर्तते। द्वितीयस्मिन्नपि पत्रे, सूर्यकान्तेन स्वयमेव नामाक्षराणि सन्निवेशितानीत्यपि सूर्यकान्तेन स्वयमेव तस्मै कथितम्। एवं गते कथं वा वक्तव्यं लेख्यं कूटमिति, अत एव व्यवहारस्याप्रसर इति। एवंविधेन विप्रलम्भेन स्वीयमृणं कथमपि निर्यात्येत, परं पितुर्ऋणं निर्यातयितुं शक्येत वा? ईदृशेन व्यतिकरेण धर्मो रक्षितो भवति वा? इति।

दरस्खलितकण्ठेन गौरीकान्तेनोक्तम्, परं करुणामहोदय, परमार्थतस्तु द्वितीयं पत्रं नैव कूटपत्रमिति।

गौरीकान्तस्य वचनमुपश्रुत्य करुणामयः कठोरकण्ठेनावदत्, अहो! प्रथममेवेदमाकर्ण्यते मयेति। ततश्च क्षणं तूष्णीमवस्थायावोचत्, तर्हि किमिति मत्समीपमागतो भवानिति सम्यग् नैव विभावयामि। अपि नाम वादिनो व्यवहाराजीवेन साकमेकतानं मन्मुखेनापि तदेवोच्चारयितुमिति?

किञ्चिदिव प्रतिपत्तिमूढो गौरीकान्तोऽवदत्, नहि, नह्यार्य। यदि भवान् वादिना यत् प्रार्थ्यते तस्य परिमाणं कथञ्चिद्ध्रासयितुं प्रभवेदिति अथवा प्रतिमासं यथासौकर्यं किञ्चिद्देयमिति व्यवस्थां कारयेदित्येतदर्थं भवत्समीपमागतोऽस्मि।

करुणामयोऽवदत्, मया चेद्वादिनः सविधेऽञ्जलिबन्धनं कारयसि तर्हि तथाविधा साशंसा दुराशंसा एव। यदि किञ्चित् सौकर्यं साधयितुं प्रभवेयं तर्हि चक्षुषी रक्तवर्णे विधायैव। वादिनो व्यवहारस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूले बृहदाकारमाघातं निपातयितुं शक्नुयां चेत् तर्हि स्वल्पाकारं सौकर्यमाच्छेत्तुं सुकरं स्यात् इति ।

मुहूर्तं मनसा किमपि विमृश्य गौरीकान्तोऽवदत्, तर्हि प्रत्युत्तरमस्माकं कीदृशं स्यात्? उच्यताम् । इति ।

करुणामयोऽवदत्, सामान्यतोऽस्माकमुत्तरं स्यात्, यस्य पत्रस्य बलेनाभियोगोऽयं प्रारब्धस्तदेव द्वितीयं पत्रं कूटपत्रमिति वादिनो व्यवहारः कालातिक्रमदोषेण प्रत्याख्यातो भवतु । परं यदि धर्माधिकरणस्य मतेन वादिनः प्रार्थनं यथाकथञ्चित् सप्रमाणमिति निर्णीयते तर्हीतः पूर्वमपरिमितं कुसीदं प्रदत्तमिति वादिनः प्रार्थितस्यार्थस्य परिमाणं ह्रासयित्वा प्रतिमासं स्वल्पमेव प्रदेयमिति निर्धारणीयम् इति ।

करुणामयस्य वचनमाकर्ण्य गौरीकान्तो विस्मितकण्ठमवदत्, अपि नामैकस्मिन्नेव प्रत्युत्तरे व्यवहारोच्छेदस्य स्वल्पशः प्रदानस्य च प्रार्थनं दोषाय न स्यात् । इति ।

भ्रूकुञ्चनपूर्वकं करुणामयोऽवदत्, किमिति ! अपि नामेदं विप्रतिषिद्धमिव प्रतिभाति इति ।

कुण्ठितकण्ठेन गौरीकान्तेनोक्तम्, आर्य, अथ किम् । तथैव प्रतिभाति । इति ।

करुणामयोऽवदत्, रामचन्द्रः ! लेशतोऽपि न तथा । एतत्तु नितरां साधारणमेव वचनं यत् खल्वस्माभिः सायम्प्रातरुच्यते । काले कालेऽस्माभिः कीदृशं प्रत्युत्तरं प्रदीयते तच्छ्रोष्यति भवान्? तथाहि स्थालीविक्रयव्यवहारेऽस्माभिः प्रत्युच्यते प्रथमतस्तावद्विवादिना वादिनः सकाशाल्लेशतोऽपि स्थाली न क्रीता । द्वितीयतः यदि कदाचिद्वादिना स्थाली क्रीता स्यात्, तर्हि सच्छिद्रैव स्थाली क्रीता, अतश्च वादी स्थाल्या मूल्यं कथमपि नाधिगन्तुमर्हतीति ।

विस्मयातिरेकेण गौरीकान्तस्य नेत्रयुगलं विस्फारितं सञ्जातम्, तेन च चकितकण्ठमुक्तम्—'अहो आश्चर्यम् ! एतादृशमपि वचनं भवद्भिरुच्यते वा !' इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करुणामयोऽवदत्, अथ किम्, अथ किम् ! बाढमस्माभिरेतादृशं वचनमुच्यते। व्यवहाराजीवानामाधिक्येनापत्रपा वर्तते—एवंविधमपवादं सहसा कोऽपि प्रदातुं न प्रभवेत् इत्युक्त्वा विहितस्तेनोच्चैर्हासः। क्षणादूर्ध्वं चासाववदत्, आपाततस्तावद् गुरुजातीयकं किमति प्रत्युत्तरं प्रदीयताम्, व्यवहारोऽयमवरतो वर्षस्यैकस्य कृते प्रलम्बमानं तिष्ठतु, अवकाशे चास्मिन् विविधानामवस्थानामुद्भवः सम्भवति। किमधिकं पक्षादमुष्मादपि कदाचिद् विनैव व्यवहारप्रयोगं समीकरणस्य प्रस्तावः समागच्छेत् इति।

पत्ना गिरिजायापि गौराकान्तस्य मुखात् सर्वमुपश्रुत्य व्यवहाराजीवस्यैवोपदेशं समीचीनसमन्यतावदच्च, धर्मस्तावत्त्वदायत्त एव। व्यवहारस्यासाफल्येऽपि त्वञ्चेद् यथासौकर्यमृणं निर्यातयसि तर्हि लेशतोऽपि धर्महानिर्न स्यात्। अथचापाततः कतिचिद् दिनान्युच्छ्वसितुं प्रभविष्यसि इति।

अलम्बभूव वचनमिदं कथञ्चित् समाश्वासयितुं कुण्ठितं विवेकम्, गौरीकान्तश्च सम्मतोऽभवत्। यथाकालं प्रत्युत्तरं धर्माधिकरणे समुपन्यस्तम्।

प्रत्युत्तरसन्दर्शनेन प्रतिपक्षशिबिरे गभीरं चाञ्चल्यं प्रादुर्भूतम्। वादी प्रियमित्रः स्वव्यवहाराजीवं रामप्रसादचट्टोपाध्यायं साक्षात्कृत्य प्रोवाच, चट्टोपाध्यायमहोदय, धर्मस्य वार्तापि जगतोऽस्तमिता। सूर्यकान्तस्य तनयेनाप्युच्यते, द्वितीय ऋणपत्रे तस्य पितुर्हस्ताक्षरं मयैव कूटलेखनेन न्यस्तमिति।

रामप्रसादोऽवदत्, केवलमेतावदेवोक्तम् ! प्रथममृणपत्रं यद्बलेन रूप्यकाणां सहस्रद्वितयं भवता ऋणरूपेण दत्तम् तदपि भवता कूटलेखेन लिखितमिति तु तेन नोक्तम्। एतदर्थं स धन्यवादानर्हति। व्यवहारस्य मार्गे विचरति भवान् प्रियमहोदय, व्यवहारस्य कण्टकेन पादयोर्वेधे विप्रतिपत्तिर्न कर्तव्या इति।

इदानीं को वोपायः कण्टकस्यास्य समुद्धरणे ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अलमत्र चिन्तया। यथावसरं तस्य विधानं करिष्यते। हस्तलिपिविशारदस्य साक्ष्यं प्रदेयं स्यात्।

व्यवहारगतानि द्वित्राणि विषयान्तराण्यालोच्य प्रियमित्रो व्यवहाराजीवभवनान्निष्क्रान्तः।

(३)

परं प्रायेण वर्षादूर्ध्वं समुपक्रान्ते व्यवहारे प्रतीतं न खलु हस्तलिपिविशारदस्य साक्ष्येण व्यवहार-कण्टकः सर्वथा समुद्धृतः, तस्य कियांश्चन भागोऽन्तरवस्थाय खच्खचायते स्मेति। प्रतिपक्षीयव्यवहाराजीवस्य प्रश्नानामुत्तरमुखेण साक्षिणा तथाविधान्येकद्वानि वचनान्युक्तानि यानि खलु न प्रबभूवुः सूर्यकान्तस्य स्वहस्ताक्षरं प्रति विवादिनारोपितं कृत्रिमतापवादं सर्वथा समुन्मूलयितुम्।

साक्षिणः प्रश्नमुखेन परीक्षणं समाप्यासनं परिगृह्य करुणामयव्यवहारजीवेन सोल्लासं गौरीकान्तस्य कर्णे कथितम्, न खलु हस्तलिपिविशारदस्योक्तिः सर्वत्र निरपायमस्त्रम्, अन्तरान्तरानया स्वकण्ठो निकृत्यते, अत्रापि कथञ्चितत् तथैव निकृत्तम्। साम्प्रतं यदि भवान् स्ववचने सर्वथाविचलित एवावस्थातुमलं स्यात्, तर्हि प्रतिपक्षस्य पण्यपूर्णाया नावो निमज्जनं सम्भाव्यते इति।

गौरीकान्तेन साग्रहं मृदुकण्ठन पृष्टं—किं तावन्मे स्ववचनम्? इति।

भवदीयं वचनं—मम पितुः स्वाक्षरं कूटमिति।

वर्षमेकं व्यवहाराजीवस्य गृहे गमनागमने विधाय प्रति-निर्दिष्टदिवसं च धर्माधिकरण समुपस्थानेन व्यवहारमधिकृत्य गौरीकान्तस्य मानसे मत्ततया कृतं पदम्। तेन करुणामयस्य कर्णे नीचैरुक्तम्, अलमत्र चिन्तया, अविचलित एव तिष्ठेयमहमस्मिन् वचन इति। करुणामयेन साकं प्रथमदिवसीयसंवादं संस्मृत्य तेनोक्तम्—पुरा कदाचिदहिंसनीतेरुपासक एवाहमासम्, परमधुना यदा गुलिकास्त्रमुत्तोलितं तदा मृगस्य शरीरं गुलिकयाविद्ध्वा नैव विरमामि। इत्युक्त्वा स्मितमकरोत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपरेषां केषाञ्चन साक्षिणामुक्तेरनन्तरं वादिपक्षस्य साक्ष्यं समाप्तिगमत् ।

तदा करुणामय आसनादुदतिष्ठत् । ततश्च प्रथमत एव तेन गौरीकान्तस्य परीक्षणं प्रारब्धम् । केभ्यश्चिद् भूमिकाप्रश्नेभ्योऽनन्तरं द्वितीयमृणपत्रं गौरीकान्तस्य पुरतः संस्थाप्य तेनोक्तम्, पश्यतु भवान्, किं तावदिदं पत्रम् ? इति ।

ऋणपत्रमान्तं पठित्वा गौरीकान्तेनोक्तम्—ऋणपत्रमिव प्रतिभातीति ।

अपि प्रभवति भवान् वक्तुम्—कस्येदं हस्ताक्षरमिति ?

न खलु प्रभवाम्यार्य ।

अपि पारयसि वक्तुं नामाक्षराणि केन लिखितानीति ।

तदपि न पारयामि ।

सावधानं निरीक्षतां भवान्, नामाक्षराणि भवतः पितुर्हस्ताक्षराणि वा न वेति ।

न हि न हि, नैवेमानि मम पितुर्हस्ताक्षराणि ।

भवतः पितुर्हस्ताक्षराणि भवतः परिचितानि ननु ?

सविशेषं परिचितानि ।

अपि कदापि प्रत्यक्षीकृतस्तत्रभवान् नामाक्षराणि सन्निवेशयन् ?

बहुशः प्रत्यक्षीकृतः ।

यदि कोऽपि ब्रूयात् इमानि परमार्थत एव भवतः पितुर्हस्ताक्षराणि तर्हि किं तावद्भवान् प्रतिपद्येत ?

मया वक्ष्यते— कूटमिति ।

प्रथममृणपत्रं पत्रनिचयान्निष्कास्य गौरीकान्ताय दर्शयित्वा करुणामयेन पृष्टम्—दृश्यतां तावत् कस्येदं हस्ताक्षरमिति ।

गौरीकान्तेनोक्तम्—इदं मम पित्रा लिखितमिति ।

आमूलान्तम् ?

आमूलान्तम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामाक्षरांशः ?

नामाक्षरांशोऽपि ।

द्वित्रानपरानावश्यकप्रश्नान् संपृच्छ्य करुणामयः ससन्तोषमासनं पर्यगृह्णात् ।

तदानीं वादिनो व्यवहाराजीवो रमाप्रसादचट्टोपाध्यायो गौराकान्तं प्रतिप्रष्टुमुद्यतोऽभूत् ।

(क्रमशः)

निर्वचनम्

[श्रीक्षिताशचन्द्र-चट्टोपाध्यायः]

किं तावदश्वतरशब्दस्य निर्वचनम् ? अश्वशब्दात् ष्टरच्प्रत्यय इति वैयाकरणाः ।

पाणिनिः । वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे । ५।३।९१ (ष्टरच्)

चन्द्रः । वत्सोक्षाश्वर्षभानां तनुत्वे । ४।३।७४

वत्सादीनां स्वभावस्य तनुत्वे गम्यमाने ष्टरज् भवति । शैशवस्य तनुत्वे वत्सतरः, यौवनस्य तनुत्व उक्षतरः । अश्वभावस्य तनुत्वेऽश्वतरः । सामर्थ्यस्य तनुत्व ऋषभतरः । वृत्तिः ।

जैनेन्द्रः । वत्सोक्षाश्वर्षभाद् ध्रासे ४।१।१९८ (तरट्)

शाकटायनः । वत्सोक्षर्षभाश्वाद्ध्रासे ३।४।१०४

सरस्वतीकण्ठाभरणम् । वत्सोक्षर्षभाश्वेभ्यः स्वार्थतनुत्वे । ५।३।११४

हेमचन्द्रः । वत्सोक्षाश्वर्षभाद्ध्रासे पित् ७।३।५१

वत्स उक्षन् अश्व ऋषभ इत्येतेभ्यः शब्दप्रवृत्तिनिमित्तस्य स्वार्थस्य ह्रासे गम्यमाने तरट्प्रत्ययो भवति ; स च पित् । ह्रसितो वत्सः वत्सतरः । वत्सः प्रथमवयस्को गौः, तस्य ह्रासः द्वितीयवयःप्राप्तिः । ह्रसित उक्षा उक्षतरः । उक्षा द्वितीयवयास्तरुणः, तस्य ह्रासस्तृतीयवयःप्राप्तिः । ह्रसितोऽश्वोऽश्वतरः । अश्वेनाश्वायां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातोऽश्वः, तस्य ह्रासो गर्दभपितृकता। आशुगमनाद्वाश्वः, तस्य ह्रासो गमन मन्दता। सर्वथाश्वतरशब्दो जातिशब्दः। हसित ऋषभ ऋषभतरः। ऋषभोऽनड्वान् बलीयान्, तस्य ह्रासो भारवहने मन्दशक्तिता। प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तस्य ह्रासे भवति। इह मा भूत्। कृशो वत्सो वत्सतर इति।*

संक्षिप्तसारः। वत्साद् बाल्यमुक्ते। उक्षणस्तारुण्यमुक्ते। अश्वाद् गर्दभजाते। ऋषभाद्भारवहनाशक्ते। तद्धितपरिशिष्ट ११७३-७६।

गोयीचन्द्रटीका। बाल्येन मुक्ते वाच्ये वत्सादुत्तरे तरट् भवति। वत्सतरो मुक्तबाल्यः प्राप्तयौवनो वत्स उच्यते। तारुण्येन मुक्ते वाच्ये उक्षणस्तरट् स्यात्। उक्षतरस्त्यक्तयौवनः प्राप्ततृतीयवया उक्षोच्यते।

मुग्धबोधम्। शुण्डोक्षाभ्योऽपकर्षे रष्टरौ। ४९२

रामतर्कवागीशटीका। उक्षतरीति त्यक्तयौवनेत्यर्थः। यद्यपि अपकर्षसामान्ये त्यः [प्रत्ययः], तथापि विशेषपरतया तारुण्यापकर्षोऽवगम्यत इति। एवं वत्सतरी। अत्र बाल्यापकर्षः। ऋषभतरीत्यत्र भारवहनापकर्षः। अश्वतरीत्यत्र अश्वगर्दभजातत्वात् अश्वगर्दभत्वक्रियापकर्षः।

सुपद्मम्। वत्सतरोऽतिबाल्ये। उक्षतरोऽतियौवने। अश्वतरः खरजे स्यात्। ऋषभतरो मन्दे। ५।४।१७८-१८१।

In *vatsatara'* (f. -rī') 'weanling' *as'vatarā'* 'mule', and *dhenuṣṭarī* 'cow losing her milk', the application of the suffix is peculiar and obscure. Whitney, *A Sanskrit Grammar*, § 1242 b.

The suffix *-tara* ..forms··· a few substantives in which the meaning of the suffix is somewhat obscure : *as'vatara'*, (AV.) mule (f. -ī'). Perhaps 'more (like a) horse' (than an ass). Macdonell, *Vedic Grammar*, 213 and f. n.

---

* The Cintāmaṇi-laghuvṛtti of Yakṣavarman on the corresponding rule of S'ākaṭayana is practically identical with this.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Après substantifs, la formation est relativement libre, soit qu'elle donne des diminutifs (en *tara-*)···*as'vatara-* P. "mulet"...Louis Renou, *Grammaire Sanscrite* §190.

प्रथमतस्तावदश्वतरशब्दस्य वैशिष्ट्यद्वितयं नयनपदवीमवतरति। यद्यपि तरप्रत्ययः प्रायेणानुदात्तस्तथाप्यश्वतरादिशब्दा अन्तोदात्ताः। किञ्च, तरप्प्रत्ययान्तशब्दानां स्त्रियां टाब् भवति, अश्वतरादिशब्दानां पुनः स्त्रियां ङीष् भवति। अत एव पाणिनिना महर्षिणान्तोदात्तार्थं चकारस्य ङीषर्थं षकारस्य चानुबन्धस्यासञ्जनेन ष्टरच्प्रत्ययः कल्पितः।

वेदे तावद् वन्ध्या गौरित्यर्थे स्तरीशब्द उपलभ्यते—

शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम् [ऋ० सं० १।११६।२२] इति। अस्य च स्तरीशब्दस्य सकारलोपेन तरीशब्दस्योद्भवः। तथाच श्रूयते—अथैतेषां व्रीहीणामर्धानवघ्नन्ति, अथेतरान् गार्हपत्य एककपालानधिश्रित्य भर्जन्ति, अथ य उ न फलन्ति तास्तर्यः ..अथैनान् भृग्णान् बध्नन्ति। तेषां यानि च क्षुद्राणि याश्च तर्यस्ता उत्सेके संप्रकिरन्ति [मैत्रायणी संहिता] इति।

सन्ति च बहवः शब्दा येषामाद्यस्य सकारस्य पाक्षिको वा नित्यो वा लोप उपलभ्यते। ऋग्वेदे तावच्चौरार्थकः तायु-शब्दः सन्दृश्यते, वाजसनेयिसंहितायामयमेव स्तायूरूपं परिगृह्णाति। स्तेन-स्तेयादिष्वपि शब्देषु सकारो जागर्त्येव। आङ्लभाषायां steal-शब्देऽपि सकारो विलसति, परं शब्दस्यास्य निर्वचनमद्यापि तमश्छन्नं वर्तते। आवेस्तायां चौरार्थकः "तायुः" चौर्यार्थकश्च "तायः" उपलभ्येते। ग्रीक्-भाषायां निःसकारकः tētaomai ससकारकश्च stereō विराजतः। सर्वस्यास्य पर्यालोचनेन 'स्तायु'शब्द एव सकारस्य मोषेण 'तायु'रूपेण पर्यवसित इति प्रतीयते। एवमेव तारा-तारकाशब्दौ निःसकारकौ परं स्तृशब्दः ससकारकः, अस्य च प्रथमाबहुवचने 'तारः' इति पदं भवति। आवेस्तायां स्तर्, ग्रीक्भाषायां aster, लाटिन-stella (*ster-la), जार्मान-stern, आङ्ग्ल-star, सर्वत्रैव सकारो दृश्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा ग्रीक्भाषायां अप्रजाता कुमार्यपि steira-शब्देन बोध्यते विगतप्रजननशक्तिर्वृद्धापि steira-शब्देन बोध्यते एवं स्तरशब्दोऽपि अप्राप्तप्रजननशक्तौ बालेऽपि वर्तते अविद्यमानप्रजननशक्तौ वन्ध्येऽपि वर्तते। अत एव वत्सतरशब्दस्यार्थोऽल्पवया वत्स इति। तथाच कालिदासप्रयोगः—

महोक्षतां वत्सतरः स्पृशन्निव
द्विपेन्द्रभावं कलभः श्रयन्निव।
रघुः क्रमाद् यौवनभिन्नशैशवः
पुपोष गाम्भीर्यमनोहरं वपुः॥ रघु ३।३२

इति। अत एव महर्षिणा पाणिनिना तदनुसारिभिश्च सूत्रे "तनुत्वे" इत्युक्तम्। अत एव च वार्त्तिककृतोक्तम्—वत्सादिभ्यस्तनुत्वे कार्श्ये प्रतिषेधः [५।३।९१।१] इति। व्याख्यातञ्च भाष्यकृता—वत्सादिभ्यस्तनुत्वे कार्श्ये प्रतिषेधो वक्तव्यः। कृशो वत्सो वत्सतर इति मा भूदिति। स तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः। यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने तस्मिन् गुणे वक्तव्ये प्रत्ययेन भवितव्यम्, न च कार्श्यस्य भावाद् द्रव्ये वत्सशब्द इति।

यच्च "अतिशायने तमबिष्ठनौ" [५।३।५५] इति सूत्रस्य भाष्ये दृश्यते—गौरयं यः शकटं वहति, गोतरोऽयं यः शकटं वहति सीरं च। गौरियं या समां समां विजायते। गोतरेयं या समां समां विजायते, स्त्रीवत्सा च। अश्वोऽयं यश्चत्वारि योजनानि गच्छति, अश्वतरोऽयं योऽष्टौ योजनानि गच्छतीति, तत्र अश्वतरशब्दस्तरप्प्रत्ययान्तो न पुनः ष्टरच्प्रत्ययान्तः।

सर्वस्मादेतस्मात् प्रतीयते—अश्वतरादिषु शब्देषूत्तरपदं स्तर इति, यस्य स्त्रियां स्तरीति रूपम्। उष्मद्वयस्य निरतिशयसन्निकर्षादेकस्य लोपः सञ्जातः। स्तरः अश्वः अश्वस्तरः। पोटा-युवति-स्तोक-कतिपय-गृष्टि-धेनु-वशा-वेहद्-बष्कयणी-प्रवक्तृ-श्रोत्रियाध्यापकधूर्तैर्जातिः [२।१।६५] इति सूत्रे स्तरस्य वा तरस्य वान्तर्भाव आवश्यकः। अत एव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'स्तरेण च वक्तव्यम्' इति वार्त्तिकं विरचनीयम्। "प्रथमानिर्दिष्टं समास उपसर्जनम्" [१।२।४३] इत्युपसर्जनत्वात् "उपसर्जनं पूर्वम्" इति सूत्रणोपसर्जनस्य स्तरशब्दस्य पूर्वनिपातः। "समासस्य" [६।२।२२५] इति समस्तपदस्यान्तोदात्तत्वम्।

स्तरशब्दस्य चार्थो वन्ध्यः निष्फलः, प्रजननसामर्थ्यशून्यः इति। अस्यैव ज्ञाति ग्रीसीय stei:ra, तस्य चार्थः—यया गर्भो न गृहीत इति। ओडीसीकाव्ये stei:ran bou:n (x. 522) [="स्तरीं गाम्"] उपलभ्यते। यस्याः स्त्रिया गर्भग्रहणवयोऽतिक्रान्तं सापि stei,ra उच्यते, कुमार्यपि steira उच्यते। ग्रीक्भाषायां steriphos-(संस्कृत *स्तरिभ) शब्दस्यार्थो वन्ध्यो निष्फल इति। लाटिन-sterilis गथिक-stairo चास्यैव स्तरीशब्दस्य सनाभी। आङ्लभाषायां sterile-शब्देऽपि स्तरस्य स्वजनः सन्दृश्यते।

अश्वतरस्य च प्रजननशक्तिविकलत्वं वेदे सुप्रसिद्धम्। तथाच तैत्तिरीयसंहितायां [७।१।१।१-२] श्रूयते—

अग्निष्टोमेन वै प्रजापतिः प्रजा असृजत, ता अग्निष्टोमेनैव पर्यगृह्णात्। तासां परिगृहीतानामश्वतरोऽत्यप्रवत। तस्यानुहाय रेत आदत्त, तद् गर्दभे न्यमार्ट्। तस्माद् गर्दभो द्विरेताः। अथो आहुः—वडवायां न्यमार्डिति। तस्माद् वडवा द्विरेताः।..तस्मादश्वतरो न प्रजायते। आत्तरेता हि। इति।

ऐतरेयब्राह्मणेऽपि [१७।३] श्रूयते—

अश्वतरी-रथेनाग्निराजिमधावत्, तासां प्राजमानो योनिमकूलयत्, तस्मात् ता न विजायन्त इति।

अश्वगर्दभसाङ्कर्येण जाताः स्त्रीव्यक्तयोऽश्वतर्यः। तद्युक्तेन रथेनायमग्निराजिमुद्दिश्य धावनं कृतवान्। तदानीं प्राजमानः प्रकर्षेणाश्वतरीः प्रेरयन्। "अज पशुप्रेरणे" इति धातुजन्योऽयं शब्दः। तत्प्रेरणकाले तासां पूर्वपुच्छभागमपस्पृश्य योनिमकूलयत दग्धवान्। तस्माद् दग्ध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योनित्वात् ता अश्वतर्यो न विजायन्ते विजननम् अपत्योत्पादनं न कुर्वन्ति ।* सायणभाष्यम् ।

अश्वतरी गर्भं गृह्णाति, स तु तस्या नाशायैव भवतीति लोकप्रसिद्धिः । अत एव पञ्चतन्त्रे दृश्यते—

सकृद्दुष्टं सखायं यः पुनः सन्धातुमिच्छति ।
स मृत्युमेव गृह्णाति गर्भमश्वतरी यथा ॥ इति ।

योगवासिष्ठे [वैराग्य १४।८] चोक्तम्—

अविश्रान्तमनाः शून्यमायुराततमीहते ।
दुःखायैव विमूढोऽन्तर्गर्भमश्वतरी यथा ॥

इति । व्याख्यातञ्चेदं टीकाकृता—अश्वाद् गर्दभ्यामुत्पन्ना अश्वतरी । तस्या उदरविदारणेनैव गर्भनिर्गमनं प्रसिद्धमिति ।

समासान्तः ।

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

केनापि वैयाकरणम्मन्येन कवयित्रा हरनयनमित्थमुपवर्णितम्—

धूमध्यामककुम्भि भूधरतटत्रुटद्द्विषन्ति स्फुटा-
टोपोल्लुण्ठितसागराम्पि विफलव्यालोकभास्वन्ति च ।
दृप्यत्तूर्णमरुन्ति कातरतरभ्रश्यज्जगन्ति प्रभो-
रुद्यन्ति त्रिपुरान्तकृन्ति नयनादर्चींषि पुष्यन्तु वः ॥

सदुक्तिकर्णामृतम् १।१४।१

अत्र केषाञ्चन व्यञ्जनान्तशब्दानां नपुंसकलिङ्गानां प्रथमाबहुवचनगतानि रूपाणि प्रदर्शितानि । तत्र स्फुटाटोपोल्लुण्ठितसागराम्पिपदं

---

* *Mule*, a cross between a jack (male) ass and a horse mare. The hybrid is sterile . . ., but very occasional cases of mule mares producing foals have been reported. *Chambers's Encyclopaedia.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुद्वेगमेवोपजनयति सहृदयानाम्, "ऋक्पूरब्धूःपथामानक्षे" [पा० ५।४।७४] इति प्रसिद्धतमानुशासनविरोधात्। व्याकरण-ग्रन्थेषु परिदृश्यमानं स्वाम्पिपदं साध्वेव, तत्र "न पूजनात्" [पा० ५।४।६९] इति सूत्रेण समासान्तस्याप्रवृत्तेः। कविनानेन स्वाम्पिपद-सादृश्येन स्फुटाटोपोल्लुण्ठितसागराम्पि-पदं प्रयुक्तम्। तच्च समासान्तविधेरनित्यत्वमाश्रित्य कथञ्चित् साधनीयमिति शम्।

Cinema-शब्दस्य निर्वचनम्।

मञ्जुला-सम्पादकस्य भागिनेयी नितरां चलच्चित्रव्यसनिनी। प्रायेण प्रतिदिनमेव तया मातुलस्य सविधमागम्योच्यते, आर्य, अभिनवं चलच्चित्रं समागतम्, नूनं मया भवदनुमत्या द्रष्टव्यमिति। एकदा मातुलेनोक्तम्, वत्से, Cinema-शब्दस्य निर्वचनमेव निवारयति जनांस्तद्दर्शनात्। तथाहि आङ्लभाषायां सी (see) शब्दस्यार्थः—पश्य। फरासीसभाषायां ने (ne)-शब्दस्यार्थः—न, संस्कृतभाषायां माशब्दो वारणार्थकः। अत एव शब्दत्रयस्यास्य सम्मेलनेन समुत्पन्नस्य Cinema-शब्दस्यार्थः—मा मा द्राक्षीरिति। तच्छ्रुत्वा सम्पादक-दुहित्रोक्तम्, तात, एतत्तु विपरीतमेवोक्तम्। परमार्थतस्तु सी-शब्दस्यार्थः—पश्य, नेशब्दो वङ्गभाषामयोऽनुनयार्थकः, माशब्दोऽपि मातृवाचकः; अत एव Cinema-शब्दः श्रोतृश्चलच्चित्रदर्शने प्ररोचयति, तस्य चार्थः—पश्य मातः पश्य, पश्य वत्से पश्य (वङ्गभाषायां—देखे ने मा) इति।

स्वैर्दोषैर्भवति शङ्कितो मनुष्यः।

काचन महिला नातिशिक्षितासीद्धूमशकटचालने। तथापि स्त्रीजन-सुलभेनाशिक्षितपटुत्वेन गर्वमावहन्ती सहचरीसमेतैकदा धूमशकटं प्राचालयत्। ततश्च सङ्कीर्णेन मार्गेण गच्छन्ती शाखाच्छेदनार्थं वृक्षमारोहन्तौ पुरुषौ दृष्ट्वा सहचरीमवदत्, अये, अपि मे शकटचालनं तथा भीषणं येनेमौ प्राणभयाद् वृक्षाग्रमाश्रयत इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Study of Sanskrit Literature

"The study of Indian classics is the foundation for the study of one of the major civilisations of the world", said Dr. John Brough, M. A., D. Litt., Professor of Sanskrit in the University of London, in his Sir George Birdwood Memorial Lecture to the Commonwealth Section of the Royal Society of Arts in London recently.

If it was accepted that a study of classical literature and civilisation was a worth-while pursuit, said Professor Brough, then his task was simply to show that the Sanskrit classics of India need not fear comparison with the established masterpieces of Greece and Rome. It was now more than 150 years since the west discovered the existence of of India's classical language and literature but in Europe hardly anything of this literature had become known outside the very narrow circle of specialists. In giving reasons for this neglect, Professor Brough referred to the minute of Lord Macaulay advising the then Government of India that the whole range of Sanskrit literature consisted of puerilities and fairy tales and said that it was unnecessary to comment that Macaulay's opinion was not founded upon an adequate knowledge of Sanskrit. There was the further misfortune that Sanskrit had been very badly served by translations into English.

The study of Classical India in the widest sense would include history, archaeology, art, the history of science and religion; and in all these fields there remained a great deal of new research work waiting to be done. But he intended to confine himself to a few aspects of Indian thought and literature.

Linguistic Study.

One of the most notable intellectual achievements of India was the early development of linguistic study. In the phonetic and morphological analysis of their language the

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Indians had achieved by the 4th century B. C. results far in advance of anything known in Europe until modern times. It is well known that the Sanskrit Grammar of Pāṇini was to a large extent the stimulus which brought into being modern comparative linguistic studies at the beginning of the 19th century. In addition to purely formal analysis of language, the problems of general linguistics and the theory of meaning were discussed with a penetration and insight which still command our admiration. The majority of important problems in these fields were already familiar in the early centuries of the Christian era, and were summed up in masterly fashion in the 7th century A. D. by Bhartṛhari in his "Vākyapadīya."

Closely related to the theory of meaning is the theory of knowledge and of inference; and here also the Indians made considerable progress in the early centuries of the Christian era. The well-known criticism of J. S. Mill of the Aristotelian syllogism—namely, that the consequence cannot be deducted from the major premise, since the major premise itself cannot be known to be true unless the consequence is already known to be true—would not be applicable to the Indian syllogism. This was normally propounded in five propositions, the major premise being explicitly derived by induction from experience. The development of logic is in fact a good example of the independence of Indian thought. Such an eminent authority as Barnett went so far as to say that of all the peoples in the world, only the Greeks and the Indians seem to have produced philosophies, and that in the case of the Indians there were grounds for believing that their philosophy was ultimately due to Greek influence. It seemed to him very doubtful whether such an influence could be legitimately claimed.

Theory of Meaning.

The theory of meaning in connection with linguistic studies was later developed and expanded by writers on aesthetics to

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

include poetic meaning. The outstanding work here was the "Dhvanyāloka" of Ānandavardhana, in the 9th century A. D. The study of poetics in India is of course very much older than this. But most of the earlier works on the subject are formal studies of rhetoric, minutely analysing and classifying the figures of sound and sense. Alongside this formal treatment there developed the theory of "rasa," or poetic emotion, which was in the first place propounded in connection with the aesthetic appreciation of the drama. Ānandavardhana saw the essence of poetic meaning in the suggested or implied sense rather than in the literal meaning of the words of the poem. The most important kind of poetic meaning, he maintained, was the suggestion of the poetic emotion, "rasa," which is clearly something quite different from the actual experience of the corresponding emotion in everyday life.[1] This doctrine of suggestion was severely criticised in succeeding centuries. Kuntaka, for example, denied the existence of the implied sense and, reviving an older theory, maintained that the essence of poetry was the striking and effective use of unusual, non-everyday language ("vakrokti").[2] In the end the theory of suggestion prevailed, and together with the classification of poetic emotions formed the keystone of almost all the important

---

[1] प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ।।
काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ।। ध्वनिकारिका १।४-५
रसभावतदाभासतत्प्रशान्त्यादिरक्रमः ।
ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः ।। ध्व० २।३

[2] शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ।।
उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः ।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते ।। वक्रोक्तिजीवितम् १।७,१०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

works on poetics after the 12th century. A fair proportion of the vast literature on poetic theory in Sanskrit is somewhat arid rhetoric. But even when this is discounted, there remains much interesting literary criticism and aesthetic theory at least as well worth reading as Aristotle's "Poetics" or Horace's "Ars Poetica," and in many ways much more sensitive in its approach to poetry than either of these works.

Professor Brough then gave indications of the scope and general characteristics of the literature of Sanskrit which is worth reading for its own sake. He chose for quotation a hymn to Varuṇa from the "Rigveda" which he described as strongly reminiscent of the penetential Hebrew pslams :

उत स्वया तन्वा सं वदे तत् कदा न्वन्तर्वरुणे भुवानि ।
किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यम् ॥
किमाग आस वरुण ज्येष्ठं यत् स्तोतारं जिघांससि सखायम् ।
प्र तन्मे वोचो दूळभ स्वधावोऽव त्वानेना नमसा तुर इयाम् ॥

"And I said in my heart : when shall I appear before the presence of God ? How shall he leave his anger and delight in my sacrifice ? When shall I in gladness behold the merciful God ? What was the sin, O Varuṇa, that I have greatly sinned that thou so afflictest thy servant who sings thy praises ? For thou art blessed and art not deceived. O tell me, that I may in innocence swiftly come before thee in adoration." (RV. vii. 86.2,4)

Great Epics.

Passing on to the great epics, the "Mahābhārata" and the "Rāmāyaṇa", he pointed out that while the former was the work of generations of poets the latter was in the main the work of a single poet. In later times Vālmīki, the author of the "Rāmāyaṇa," was accorded the title of "First of Poets," a judgment which was largely justified, for the "Rāmāyaṇa" contained a definite attempt at conscious

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

poetic embellishment; and in the use of similes and other figures of poetry most of the chief characteristics of later classical poetry are fore-shadowed.

Professor Brough quoted a single example of a striking simile taken from a brilliant description of winter :

रविसंक्रान्तसौभाग्यस्तुषारावृतमण्डलः ।
निश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥

"The moon's beauty is usurped by the sun, and she shines but feebly, shrouded in mist, like a mirror blind with breath."

Between the epics and the form already fully matured in the works of As'vaghoṣa in the 2nd century A. D., Professor Brough felt, there was a gap in the tradition and much had undoubtedly been lost. There was, however, some evidence of the type of development which Indian poetry was undergoing between the end of the Vedic age and the earliest classical poems.

In the classical Sanskrit poetry, he said, India shows a marked contrast to Greece. In the latter case most of the great literature was already written before the spread of Hellenistic civilisation. In India on the other hand the greatest flowering of Sanskrit poetry comes at a time when the language was no longer living and developing as a popular speech. This is a surprising state of affairs and it is almost as if mediaeval Latin or Byzantine Greek had produced poets to outshine Virgil and Homer. None the less, Sanskrit had remained so vigorously alive as the language of all educated men that the situation is perhaps not so paradoxical as at first sight it may appear.

In some of its less admirable characteristics, classical Sanskrit does indeed show tendencies similar to those of Alexandrian Greek literature. Thus both indulged in trivialities, such as the composition of stanzas which could be written in the shape of an axe or an altar. And in one

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

direction Sanskrit was able to go far beyond the artificiality of Alexandria, namely, in paronomasia (श्लेष). The Sanskrit language has a most alarming capacity for punning ; and in later times the art of equivoke was developed to such a degree that we find poets who compose whole epics with a double meaning in every stanza, so that a single work may be read in one way as the story of the Mahābhārata, and in another way as that of the Rāmāyaṇa. Even triple punning on this epic scale is not unknown.

Intellectual Exercise.

To be fair to the authors of these works, it must be admitted that the unravelling of their meanings involves an intellectual exercise at least comparable to chess, and rather superior to the modern crossword puzzle. And, of course, there are occasions when a double meaning can be used with pleasing effect. Thus, for example, in Bhavabhūti's drama "Mālatī-mādhava" the heroine's maid-servant brings a message to the hero who is engaged in weaving a garland of flowers ; and with the modesty which the situation demands she speaks to him apparently only about the flowers :

[अथ तस्याः करेणुकारोहणसमय एव ततः सखीकदम्बकादन्यतमा वारयोषिद्विलम्ब्य कुसुमावचयक्रमेण नेदीयसी भूत्वा प्रणम्य कुसुमापीडव्याजेन मामेवमुक्तवती] महाभाग, सुश्लिष्टगुणतया रमणीय एष सन्निवेशः । कुतूहलिनी च नो भर्तृदारिकास्मिन् वर्तते । अस्यामभिनवो विचित्रः कुसुमेषुव्यापारः । तद् भवतु कृतार्थता वैदग्ध्यस्य । फलतु निर्माणरमणीयता । समासादयतु सरस एष भर्तृदारिकायाः कण्ठावलम्बनमहार्घताम्" इति ।

"Sir, the even spacing of the flowers on the thread makes your plaiting most attractive, and my mistress is curious about it. Such skilful floral work is quite new to her. She would like very much to have this fresh garland to wear round her neck."*

* महान् भागो भागधेयं यस्य ।...आकृतिविशेषेणैवोपलक्ष्यमाणमहाभाग्यातिशयेत्यर्थः । एष सन्निवेशः कुसुम[illegible] सुश्लिष्ट-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

But by the punning force of some of the words, her speech can also be taken to mean :

"Sir, the excellent qualities of both of you, being mutually compatible, would make the union of such noble persons desirable, and my mistress is eager for it. The working of the god of love is new and strange to her. May you fall in love with her, and come to clasp her in an embrace.*"

गुणतया सुसंघटितग्रन्थिमत् सूत्रत्वेन रमणीयो मनोहरः। कुतूहलिनी चास्मिन् विदग्धातिशये कुसुमदामविरचनाविशेषे चास्माकं भर्तृदारिका। तस्यामधिकरणभूतायामभिनवोऽन्यत्रादृष्टपूर्वो विचित्रश्चमत्कारकारी कुसुमेषु विषये व्यापारः माल्यग्रथनरूपोऽस्ति। स्वयमस्यां कुसुमरचनायामतिशयेनासाधारणीं प्रसिद्धिमुपागता स्ववैदग्ध्यसदृशं भवतो माल्यग्रथनकौशलमुपलभ्येदानीं कौतुकाक्रान्तमानसा वर्तत इत्यर्थः। तत् तस्मात्त्वदीयस्य वैदग्ध्यस्य कुसुमदामरचनाप्रावीण्यस्य कृतार्थता विदग्धया तयोपलालनाच्चरितार्थता भवतु। यथाह— "आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्" इति। अस्या अपि स्रजो निर्माणस्य रमणीयता अभिज्ञजनमनोरञ्जनेनैव फलेन फलतु। अपचितकुसुमानां स्वस्वफलाजनकत्वेऽप्येतदेव फलमस्त्वित्यर्थः। तदेष ते सरसोऽम्लानः, तथा सारस्येन चातुर्येणान्वितः, तथा त्वयानुरागेण समर्पितः, कुसुमव्यापारो भर्तृदारिकायाः कण्ठावलम्बनेन ग्रीवालङ्कारतया धारणेन महार्घतां महामल्यतामासादयतु प्राप्नोतु। यथा किञ्चिदुत्तमं रत्नमुत्तमकनकभूषणस्थापितं महामूल्यं भवति, तथेदमपि बकुलदाम रत्नभूतं भर्तृदारिकाकण्ठाभरणत्वेन महामूल्यं भवत्विति प्रकृतोऽर्थः।

* अन्यस्तु——एषोऽस्मादृशस्य सखीजनस्य तटस्थसहृदयलोकस्य चाशास्यत्वेन बुद्धौ विपरिवर्तमानः सन्निवेशो भवतोः सम्बन्धोऽभिलाषमात्रम्। तस्यां विषयेऽभिनवः केनापि विरहिणाननुभूतपूर्वः, अत एव विचित्रो विस्मयकारी कुसुमेषोर्व्यापारः। त्वामुद्दिश्य स्मरेण बलवदभिभूयत इत्यर्थः। तत्तस्मादन्योन्यसमागमेनोभयोर्वैदग्ध्यस्य सकलकलापरिज्ञानस्य कृतार्थता भवतु। त्वदीयवैदग्ध्यसारं सैव लोके वेदितुमर्हा, तस्याश्च त्वमेवेत्यन्योन्यसदृशाभिज्ञविषयलाभादुभयोर्वैदग्ध्यं चरितार्थमस्त्वित्यर्थः, ।..निर्माणस्य भवदुभयसृष्टिलक्षणस्य विधातृव्यापारस्य रमणीयता सर्वलोकातिशायिसौन्दर्यसम्पादकत्वेन मनोहरता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Tricks of this sort, however, are merely embellishments of poetry, and in a great poet like Kālidāsa they appear hardly at all. They are indicative nevertheless of a general characteristic of classical Sanskrit poetry, namely, that it is a highly intellectual literature.

Referring to this characteristic, Professor A. B. Keith, former teacher of Professor Brough, wrote in the Preface to his "History of Sanskrit Literature": "The neglect of Sanskrit Kāvya is doubtless natural. The great poets of India wrote for audiences of experts: they were masters of the learning of their day, long trained in the use of language, and they aim to please by subtlety, not simplicity of effect. They had at their disposal a singularly beautiful speech, and they commanded elaborate and most effective metres. Under these circumstances it was inevitable that their works should be difficult."

Kāvya Literature.

The range of this literature is very considerable. At the summit stand the great epics, "mahākāvya", most of which take their themes from the old epics or the legends of the Purāṇas. Here we have the famous names of As'vaghoṣa, Kālidāsa, Bhāravi, Bhaṭṭi, Māgha, and a whole host of lesser writers. Here we have no reason to dissent from the judgment of Ānandavardhana given in the 9th century:

"अस्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवय इति गण्यन्ते ।

"Out of the constant succession of competent poets which the passing years bring before us, only a mere handful—Kālidāsa and a few others—rank as great poets." In the

---

भवदुभयसमागमेनैव फलेन फलतु, अन्यथेदृक् सृष्टिश्रमगुणोज्ज्वलस्त्री-पुंसनिर्माणप्रयासो विधेर्व्यर्थ एव भवेदिति भावः। तदेष त्रिभुवनरत्नभूतः सरसः सानुरागः रसिकाग्रणीश्च भवांस्तस्याः कण्ठावलम्बनेन कण्ठालिङ्गनेन महार्घतां प्राप्नोतु । त्रिपुरारिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

shorter kāvya, poem ("khaṇḍa-kāvya"), Kālidāsa is equally pre-eminent; and his masterpiece in this field, the "Cloud Messenger" ("Meghadūta"), inspired such a multitude of imitations that "messenger poems", both in Sanskrit and the later Indo-Aryan languages, form by themselves a distinct literary type.

In the drama, India has nothing directly comparable to the great tragedies of Greece, and tragedy as such is definitely excluded by the dramatic theory. There are nevertheless in some of the great dramas moments of pathos handled with great tenderness and imagination; and although Aristotle's pity and terror tend not to come together in Sanskrit, both are recognised among the emotions ("rasa") proper to drama. A wide range is covered by the extant plays, from the romantic legends of Kālidāsa's "S'ākuntala" and "Vikramorvas'īya" to the political intrigue of Vis'ākhadatta's "Mudrārākṣasa", from short one-act comedies such as "The Saint and the Lady" ("Bhagavadajjukīya") to the ten-act "Balarāmāyaṇa" of Rājas'ekhara. Sanskrit drama is not likely to attract the western reader for its dramatic qualities. It is in general weak in characterisation and with few exceptions uninventive in plot. On the other hand, in its best examples it contains much excellent poetry, and is worth reading for this alone. We are of course not in a position to judge the full artistic impact of an ancient Sanskrit play which in its presentation on the stage made full use of the arts of music and dancing.

Professor Brough then goes on to quote examples which convey something of the quality of the poetry which when translated preserves at least some fragment of the force of the original. One stanza of Bhaṭṭi he chose was rendered:

"He saw at dawn the waters before him inlaid with the sun's rays; it was as if the beams, melted by the sun's own heat, had been gathered together in one place on the earth."

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[तिग्मांशुरश्मिच्छुरितान्यदूरात् प्राञ्चि प्रभाते सलिलान्यपश्यत् ।
गभस्तिधाराभिरिव द्रुतानि तेजांसि भानोर्भुवि सम्भृतानि ॥२।१२]

The stanza, he said, was a variant of an idea which had earlier been used more effectively by Ārya S'ūra, who described the tropical sea in the calm before a storm as : "The sapphire-blue sea, as if the sky had melted in the heat of the sun". This had provoked an anonymous critic to exclaim : 'S'ūra is a poet, S'ūra is indeed a great poet. He described the sea as melted sky !"

Another canto he quoted of Bhaṭṭi's showed that the poet was not without a sense of humour. Here the demon Rāvaṇa sends his servants to seek the aid of Kumbhakarṇa in the fight against Rāma, and these envoys act in true demonic fashion.

राक्षसेन्द्रस्ततोऽभैषीदैक्षिष्ट परितः पुरम् ।
प्रातिष्ठिपच्च बोधार्थं कुम्भकर्णस्य राक्षसान् ॥
तेऽभ्यगुर्भवनं तस्य सुप्तं चैक्षिषताथ तम् ।
व्याहार्षुस्तुमुलान् शब्दान् दण्डैश्चावधिषुर्भृशम् ॥
केशानलुञ्चिषुस्तस्य गजान् गात्रेष्वचिक्रमन् ।
शीतैरभ्यषिचंस्तोयैरलातैश्चाप्यदम्भिषुः ॥
नखैरकर्तिषुस्तीक्ष्णैरदाङ्क्षुर्दशनैस्तथा ।
शितैरतौत्सुः शूलैश्च भेरीश्चानीनदन् दृढाः ॥
स तान्नाजीगणत् सर्वानिच्छयाबुद्ध च स्वयम् ।
अबूबुधत मां कस्मादप्राक्षीच्च निशाचरान् ॥१५।१-५

"Then the king of the demons was afraid, and looked all around the city ; and despatched demons to inform Kumbhakarṇa. And they came to his dwelling, and found him asleep. And straightway they uttered confused cries, and beat him with sticks. They pulled out his hair, and drove elephants over his limbs ; they poured cold water over him, and burnt him with red-hot coals. They scratched him with their sharp nails, bit him with their teeth, prodded him with sharpened stakes, and beat drums in his ears. But he

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

regarded them not at all, and at length awoke of his own accord."

In conclusion Professor Brough said that many Europeans found that Indian literature was too far removed from their own standards to afford them much pleasure. But the importance of the study of Sanskrit went far beyond the aesthetic value of literature. It was in fact the key to almost all branches of the study of Indian civilisation and the contributions of this civilisation to the development of human thought and culture generally were very considerable. The study of the Indian classics was the foundation for the study of one of the major civilisations of the world. From the purely practical point of view, he believed that a University degree in Sanskrit could offer the student an intellectual, literary and philosophical training in every way comparable in value to a Classical Tripos or an Honours School of Literae Humaniores. More generally, the study of the great Asiatic civilisations demanded far more attention than it had hitherto received in the West, if they were to rid themselves of the provincialism which tacitly assumed that the history of Western Europe was the history of mankind. *

वैयाकरणानां सरणिः

संज्ञा च नाम यतो न लघीय इति प्रामाणिकवचनं शिरसि कुर्वद्भिर्देवनन्दिवोपदेवप्रभृतिभिर्वैयाकरणप्रवरैः प्रायेण शब्दानां प्रथममेवाक्षरं संज्ञात्वेन व्यवह्रियते। वर्षेभ्यः कतिपयेभ्यः पूर्वमीदृशं संक्षिप्तीकरणमुद्दिश्य प्रथिततमायाम् Punchपत्रिकायाम् A. P. Herbert महोदयेन लिखितम्—

* *Re-printed with additions from the "Hindu" (Madras).*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

So many troubles has John Bull,
Such numerous officials,
He cannot name them all in full
But has to use initials ;
Old poets sang of English soil
And how we kept it free,
But our tongues refuse the toil,
We call it A. R. P.

But praises be
To H. M. G.
Applaud the P. C. too !
And shout "Hooray !
H. M. the K. !
Likewise H. M. the Q. !"

The President of the B. O. T.
Has sent a commissar
To do a deal for H. M. G.
With dear U. S. S. R.
In "Buckhouse" now resides the Court,
And Scapa's going strong ;
But if our time is quite so short,
Why not have names less long ?

Oh, H. M. Gov.
We dearly love :
And H. M. Cab. as well.
Sing, three times three,
The H. of C.
Likewise the H. of L. !

Our wordy ancestors no doubt
Had much more time to waste ;
So they could spell things slowly out ;
We moderns have to haste.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

But though I see the point of view,
The piece of news I crave
Is "What exactly do we do
With all the time we save?"

Yet praises be
To H. M. G.
Applaud the P. C. too !
And shout "Hooray !
H. M. the K. !
Likewise H. M. the Q. !"

पाठविमर्शः

[श्रीक्षितीशचन्द्र-चट्टोपाध्यायः]

रघुवंशस्य द्वितीयसर्गस्थं

तदीयमाक्रन्दितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घम् ।
रश्मिष्विवादाय नगेन्द्रसक्तां निवर्तयामास नृपस्य दृष्टिम् ।।

इति श्लोकं व्याचक्षाणेन सुमतिविजयेनोद्धृता कारिका—

व्याददाने चतुर्थी स्याद् दर्शने कथनेऽपि च ।
आदाय करणे योगे सप्तमी कैश्चिदिष्यते ।।

इति । अत प्रथमार्धे सम्प्रदानचतुर्थ्याः कतिचित् स्थलानि प्रदर्श्यन्ते । अत एव "व्याददाने" इत्यत्र व्यकारानुरोधेनानुप्रासानुरोधेन च "द्रव्यादाने" इति पठनीयमिति प्रतिभाति । अत्र "क्रियया यमभिप्रैति स सम्प्रदानम्" इति सूत्रेण सम्प्रदानसंज्ञा । ततश्च दर्शने—

तत्तद्भूमिपतिः पत्न्यै दर्शयन् प्रियदर्शनः ।
अपि लङ्घितमध्वानं बुबुध न बुधोपमः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[रघु० १।४७] इत्यादिषु। कथने च—

यूपवत्यवसिते क्रियाविधौ कालवित् कुशिकवंशवर्धनः।
राममिष्वसनदर्शनोत्सुकं मैथिलाय कथयाम्बभूव सः ॥

[रघु० ११।३७] इत्यादिषु च "क्रियाग्रहणमपि कर्तव्यम्" इत्यादि-वार्त्तिकेन च सम्प्रदानम्। "रश्मिष्विवादाय" [रघु० २।२८] इत्यादि-स्थले दाधातोर्योगेऽपि चतुर्थी न भवति, करणे तृतीया भवति, केषाञ्चिन्मते सप्तमी भवतीति द्वितीयार्धेनोक्तम्—आदाय-करणे योगे सप्तमी कश्चिदिष्यते" इति।

कालिदास-भवभूती।

[स्वर्गत-द्विजेन्द्रलाल-रायः]

नायकेन सर्वगुणान्वितेन भाव्यम् इति यो विधिर्वर्तते तस्येदमेव तात्पर्यं यत् नाटकस्य वस्तुनोदात्तेन भवितव्यमिति। अत एव प्रायेण नाटकानां नायका राजानो वा राजपुत्रा वा। पृथिव्यां श्रेष्ठकला-विद्भिः कार्यद्वारा सम्भावितोऽयं विधिः। शेक्सपीयरस्य सर्वश्रेष्ठानां नाटकानां नायकाः सम्राजो वा राजानो वा राजतनया वा। (म्याक्-बेथ आयत्यां राजैवाभवत्, ओथेलोऽपि सेनापतिरेव। इटालीदेशस्य श्रेष्ठतमैश्चित्रकरैर्यीशुखृष्टस्यैव जीवनवृत्तान्तः स्वचित्रेषूपवर्णितः। होमारस्येलियड् काव्यमपि राज्ञां युद्धमधिकृत्य विरचितम्।

इदानीन्तने नाट्यसाहित्ये नैवानुस्रियतेऽयं नियमः। महाकविना इब्सेनेन विरचितानां नाटकानां नायकाः सर्व एव मध्यवित्तगृहस्थाः। गृहस्थानां वृत्तान्त एव सामाजिकनाटकस्य वस्तु। हिस्पानीया ओलन्दाजीया आङ्लाश्च चित्रकरा अकिञ्चित्करान् मनुजान् वस्तूनि चाङ्कयित्वा त्रिजगद्वन्दनीयाः सञ्जाताः। परं शेक्षपीयरस्य श्रेष्ठतमानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाटकानां तुलामधिगन्तुं नैव प्रायेण प्रभवेयुरिब्सेनीयानि नाटकानि। एवमेव Raphael, Titian, Michael Angelo एतेषां नामभिः समस्वरेण Rubens इत्यस्य Turner इत्यस्य वा नामोच्चारयितुं को वोत्सहेत प्रेक्षावान्।

सामान्यतः संस्कृतालङ्कारशास्त्रीयो विधिरयमतिमात्रं समीचीनः। विषयस्योदात्तताभावे नाटकगतानां कार्याणां गरिमा नानुभूयते। केनापि महाचित्रकरेणेष्टकास्तूपमात्रं नाङ्कितम्। कदाचित् तेनेष्टकास्तूपो नितरां स्वाभाविकतया निर्दोषतया चाङ्कयितुं प्राभविष्यत, परं चित्रमिदं कदाचिदपि Raphael-विरचितस्य Madonna चित्रस्य समशीर्षिकामारोढुं नैवालमभविष्यत्। केनापि श्रेष्ठेन नाटककारेण कोऽपि लेखकः (clerk) नाटकस्य नायकपदे नैवाभिषिक्तः। ईदृशस्य चित्रस्याङ्कने कदाचित् कवेः शक्तिः स्फुटतामियात्, तत्र च सुसूक्ष्मा वर्णना दार्शनिकं च विश्लेषणं यथेष्टमवतिष्ठेत, परमीदृग्विधं नाटकं Shakespeare विरचितस्य Julius Caesar नाटकस्यार्धासनमारोढुं नैव प्रभवेत्। ईदृशेन चित्रेण नायकेन वा दर्शकस्य श्रोतुर्वा हृदयं स्तम्भं वा स्पन्दनं वा नापद्यते, केवलं कलाविदः प्रकृतिविज्ञानेन सहर्षो विस्मयो मनसि पदं करोतीत्येव। यत्र कलाविदो नैपुण्यमेवोदयमभिविन्दति मानसे, स ह्यतीव तुच्छो व्यापारः। महीयसि व्यापारे दर्शको वा श्रोता वा कवेः सत्तामेव विस्मरिष्यति, तस्य रचनयाभिभूत एव स्थास्यति। Irving-महोदयस्याभिनयसमये यदि मनसि समुदियात्, अहो रमणीयताभिनयस्यारभिङ्महोदयस्य तर्हि सोऽभिनय उत्तमतया परिगणयितुं न युज्यते, यदा तावच्छ्रोता द्रष्टा वा ह्यामलेटरसेन Irving-महोदयस्यास्तित्वमपि विस्मरति तदैव तस्याभिनयः साधुरिति वक्तुं साम्प्रतम्। ग्रन्थकारविषयेऽप्ययं नियमः। यत् तावन्नाटकं वाचयन् पाठको मन्यते अहो कौशलं ग्रन्थकारस्य, अहो शक्तिः, अहो सूक्ष्मेक्षिका, अहो सौन्दर्यज्ञानं न खलु तन्नाटकं समुन्नतश्रेण्यां सन्निवेशनमर्हति। यन्नाम नाटकं पाठकं तन्मयमेव विदधाति, वाचकस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वाश्चिन्ताः, सर्वा अनुभूतीः, सर्वा मनोवृत्तीः संग्रसते, तदेव नाटकं श्रेष्ठकोटौ निवेशयितुं युक्तम् ।

राज्ञः प्रेम, राज्ञो युद्धम्, राज्ञ उन्मत्तता—एतेषु कापि मोहिनी शक्तिर्वर्तते, राजेति शब्द एवाधारो भावविशेषस्य । स च भावोऽयमेव—अत्रभवान् निखिलानां पौराणां प्रतिनिधिः, सर्वे एव तस्यानुवर्तिनः, स खलु सर्वेषां पौराणां महिमा च बन्धनञ्च केन्द्रञ्च । राज्ञि रथ्यायामागते सर्व एव सन्दर्शनाय रथ्यायां सम्मिलन्ति । तस्मिन् राजसभामलङ्कुर्वति, सर्वे एव निमेषशून्यैर्नयनैस्तमापिबन्ति । राज्ञो व्यापारेषु किमपि निगूढत्वं विलसतीव । यदासावुत्तिष्ठति राजा उत्थित इति वादः, यदासौ शेते राजा शयित इति च वादः प्रसरति । राजा लम्पटोऽपि राजैव । शिशुरपि राज्ञो वृत्तान्तमाकर्णयितुं वाञ्छति । अत एव पितामही कथां कथयति—आसीदेको राजा, स चैकदा मृगयां गच्छन्नपश्यत् काञ्चन परमरमणीयां राजकुमारीमिति । न खलु राजकन्यामन्तरेण भवत्याख्यायिका हृदयहारिणी । परम् अतिमात्रमिदं विस्मयस्थानं यद् वक्ता वा श्रोता वा राजानमधिकृत्य किमपि न विजानातीति । एतस्मादेव कारणाद् व्यापारेऽस्मिन्नेवंविधा मोहिनी शक्तिरिति मे प्रतीतिः । य खलु विषयमधिकृत्य किमपि न जानामि अथच यमधिकृत्यान्तरान्तरा किञ्चिच्छृणोमि, तस्य समधिकज्ञानाय कुतूहलि सञ्जायते मानसम् । किञ्च, न खल्वयं यः कोऽपि, राजैवायम् । स खलु ऊर्ध्वप्रेरिताभ्यामेव नयनाभ्यां द्रष्टुं शक्यते, इङ्गितेनैव तस्य लक्षः सैन्याः समरक्षेत्रं प्रति धावन्ति, तस्यार्थः प्रतिदिनं लक्षपरिवारान् पोषयितुमलम्, तस्य प्रासादः गहनमिव काननं कक्षावलीनाम् । एभिरेव कारणै व्यापारोऽयं सम्मोहक इव प्रतिभाति ।

नाटककारा अपि राज्ञो वृत्तान्तं वर्णनीयतया मन्यन्ते । तेऽपि काङ्क्षन्ति प्रशस्तं कार्यक्षेत्रं—यत्र कार्यस्य गतिः स्यादप्रतिहता, अन्तरेण समुद्रं कस्य वा तरङ्गान् प्रदर्शयन् सुखमधिगच्छेद्दर्शयिता ।

एतस्मादेव कारणात प्रायेण श्रेष्ठानां नाटकानां नायको

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नरपतिरेव। एतावता विषयो महान्जातः। तत्रापि स चेद्राजा निखिलगुणगणमण्डितः स्यात् तर्हि महत्तरः सञ्जायेत विषयः।

नाटकस्य विषयेणोदात्तेन भाव्यमिति विधिः समीचीन एवेति मे मतम्। परं राजैव नायको विधेय इति नियमोऽर्थशून्यः। न खलु दुर्लभा महती वृत्ति र्गृहस्थेष्वपि। कदाचित् प्राकृतोऽपि जनः परमार्थत एव वीरो भवेत्। पारमार्थिकं शौर्यं पारमार्थिकं धैर्यं पारमार्थिकं च कर्तव्यपरायणत्वं प्राकृतजनस्यापि कार्यावलिषु प्रदर्शयितुं शक्यते। गृहस्थोऽपि नाटकस्य नायको भवेत्, परं गृहस्थेन तेन महता भवितव्यम्।

नायकः सर्वगुणसम्पन्नो वा दोषलेशरहितो वा स्यात् इति विधिर्नितरां नियन्त्रकमेव कविस्वातन्त्र्यस्य। एतादृशस्य कठोर-विधेर्दोषद्वयं सन्दृश्यते। प्रथमतस्तावत् सर्वाणि नाटकानि समान-संस्थानानि सञ्जायन्ते। द्वितीयतश्च पात्रमतिमानुषं भवति, स्वभावानुगतं नैव जायते। प्रतिमानुषं ह्यल्पो वा बहुलो वा दोषो वर्तत एव। समुपवर्णिते मनुजे दुष्प्रवृत्तीनां सर्वासामसद्भावे स मनुजो जीवञ्छस्वश्च न भवति। स केषाञ्चिद् गुणानां पिण्डे परिणमति। एतच्च idealistic नाटकेषु सम्भवति। परं Realistic School-गतान्यपि नाटकानि जगति वर्तन्ते, आवश्यकान्यपि तानि। तत्र चेद्दोषरहिता मनुजा नायकपदे व्रियन्ते अप्राकृतो भवति नायकः।

परमेतदपि निश्चितम्, न खलु लम्पटो वा पाषण्डो वा कस्यापि नाटकस्य वा काव्यस्य वा नायको भवितुमर्हतीति। तथाविधस्य चरित्रस्य चित्रणेन जगतः सुषमा सन्दर्शयितुं न शक्यते। न खलु यदेव प्राकृतं तदेव सुन्दरम्। तथात्वे सुन्दरशब्द एवोच्छिद्येत। कुत्सितं वर्तत इत्येव केषाञ्चन पदार्थानां सुन्दरव्यपदेशेन तेभ्यः पृथक्करणमावश्यकं भवति। न खल्वसुन्दरो नाटके नायको विधातुमुचितः, न खलु कोऽपि महांश्चित्रकारो वा कविर्वा असुन्दरं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनं पदार्थं वा केन्द्रीयं चित्रं विधायालेख्यमङ्कितवान्। परं सुन्दरं तुलनया सुन्दरतरतया प्रदर्शयितुं कुत्सितं चित्रयितुं युज्यते।

कामं महाकविना शेक्षपीयरेण नैवानुसृतोऽयं विधिः, तस्य सर्वोत्कृष्टस्य नाटकस्य विषयो महान्, परं नायकानां तस्य विशेषतः केऽपि गुणा न वर्तन्ते, पितृभक्तिरेवैको गुणो ह्यामलेटस्य, परं समाप्त एव नाटके तस्याव्यवस्थितचित्ततैव स्फुटीभवति, King Lear उन्मत्त एव। केवलं मौखिकमुच्छ्वासमेवासौ सन्तानस्य पितृभक्तेः परिचायकं मन्यते। किञ्च तदीयं प्रधानं दुःखं दुहितृभ्यां रेगान्गोनिरिल्भ्यां तस्य पार्श्वचरा दूरीकृता इति। तयोश्च पितृभक्तेरभावं दृष्ट्वासौ परिदेवयते—Ingratitude, thou marble-hearted fiend, अकार्तज्ञ्य, रे अश्महृदय दानव इत्यादि। तस्य विलापा उन्मत्तानामिव प्रलापाः प्रतीयन्ते। Othello ईर्ष्यापरवशस्तथान्धीभूतो यथा प्रमाणानपेक्ष एव साध्वीं सहधर्मिणीमवधीत्। Macbeth तावत् कृतघ्न एव। Julius Caesar साटोपाहङ्कृतिदुष्टः। परं नाटकेष्वेषु शेक्षपीयरेण तेषां चरित्रदौर्बल्यानां पापप्रवृत्तीनां वा विभीषणः परिणामः प्रदर्शितः। सर्वत्रैव पापस्य नैष्फल्यमात्मघातो वा प्रदर्शितः। गेटे-विरचिते Faust-नाटकेऽपि तथैव।

परं शेक्षपीयरेण ग्रन्थेष्वेषु तावतामुदात्तानां पात्राणां समावेशो विहितो यथा तैर्नायकानां समन्ताद् भास्वरं ज्योतिर्विकीर्य प्रोज्ज्वलितानि नाटकानि। Hamlet-नाटके Horatio, Polonius, Ophelia, Lear-नाटके Kent, Fool, Edgar, Cordelia, Othello-नाटके विशुद्धचरित्रा Desdemona, तदीया सहचरी च; Macbeth-नाटके Banquo तथा Macduff; Antony and Cleopatra-नाटके Octavius; Julius Caesar-नाटके Brutus, Portia, सवऽप्येते नायकान् स्वेन ज्योतिषा समाच्छादितवन्तः।

तथापि कथं वा शेक्षपीयरेणैवं विहितम्? तस्य कारणमिदमेव प्रतिभाति—स धनेन शक्त्या च गर्वित आङ्ल इति। पार्थिवशक्तिरेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य समधिकलोभनीयतया प्रतीयते। न खलु महच्चरित्रं तं तथा मोहयति स्म यथा विराजं चरित्रम्। विराजा शक्तिः, विराजा बुद्धिः, विराजो विद्वेषः, विराजासूया, विराजा प्रतिहिंसा, विराजो लोभः—तस्य सविध इम एव समधिकं लोभनीया आसन्। मन्ये तन्मतेन निरीहः शिशुः, परदुःखकातरो बुद्धः, भक्तो वा चैतन्योऽतिमात्र-मकिञ्चित्करं पात्रम्। न खलु तेन सर्वथा स्वार्थत्यागस्य माहात्म्यं नावबुद्धं, परं तेन शक्तिमाहात्म्यस्याडम्बरमाहात्म्यस्याधस्तादेव स्थापितं चरित्रमाहात्म्यम्। (क्रमशः)

नरपति-पारिषद-संवादः

[श्रीपञ्चाननकाव्यतीर्थ-ज्योतिर्विनोदः]

गौडेषु गोपालनामा नरपतिरुवास। एकदा उषसि शयनागारं विहाय बहिरायातः स मलहारकमवलोकितवान्। निशावसान-समय एव पापावलोकनेन स भृशं चुकोप, मलहारिणो वधमादिदेश च। निरपराधः स मलहारको राजरोषात् विमूढो जातः। नरपतेः सदसि सुमतिनामैको मतिमान् पारिषद आसीत्। स रहसि मलहारकं बभाषे—वधसमये आदौ मम समीपम् आयाहि मां च किमपि वद। तदहं तव वधरोधं करोमीति। सायं वधभूमौ नीतो मलहारी जनतया करुणमवलोकितः सुमतिसमीपं गतवान्, रहसि च तं किमपि बभाष इव। अथ राजा सुमतिमाहूय उवाच—मलहारी किमवददिति। स उवाद—दिनादौ नृपतेरवलोकनादेव जीवननाशो मे भवति परं ममाव-लोकनेन भूभृतः किमपि न घटते; अतः आवयोः कतरः पापीयान् इति विचारयतु। राजावदत्—किं तवानुकथनमासीत्? सुमति-रुवाच—किमपि न। ततो भूमिपालः मलहारिणो नैतिकभाषणं यथा-यथं भावयन् तं वधादेशं रहितवान्। स च मुदा निजावासं यातः सुमतेः सुचिरं जीवनं विभुं ययाचे। बलात् कौशलं बलीयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रभाषीयः

[आचार्यकृष्णस्वामी]

— १ —

कवरः—(cover)—करवरः > कवरः। करो हस्तो लिपिर्लेख इति यावत्, तस्य वर आच्छादः।

करदः—(card)—करे दीयते। करदे पत्र गोप्यं नास्ति।

कर्जी (debtor)—(Hindi) [पा० ५।२।११५]

करण्यः, कर्मण्यः—(good at work) करणे, कर्मणि साधुः [पा० ४।४।९८]

गमन्यः (good pedestrian)

गायन्यः (good at music)

टेकरः, टीकरो वा (ticket) [टिकृ टीकृ गतौ]

तरण्यः (good at crossing, fit to cross ; one to be passported) तरणे साधुः, तरणमर्हतीति वा।

तारकः (passport)

दानीयः (worthy to be helped, one deserving) [पा० ८।४।२५]

धर्म्यः (to be achieved by धर्म) धर्म्यं पुरुषार्थत्रयम्।

नाव्यः—(to be ferried by boat) नावा तार्यः।

न्याय्यः (approved by justice) न्याय्यो विधिः [पा० ४।४। ९१, ९२]

पुस्तकडपः, ०डिपो वा (book depot) [डप डिप संघाते चुरादी] एवं तारडिपः (tram depot)

एनामिकः (Hindi)—इनाममर्हति। [पा० ५।१।६३]

रैक्षः (rickshaw puller) (Hindi) [पा० ४।३।१२०]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लेखकः (clerk) लैपिको वा (one filling forms for others at any office and receiving a small remuneration)

लेखन्यः (one who writes beautifully) लेखने साधुः ।

लिपिकरः (copyist)

वासितः शम्बः (scented soap), धुन्यः शम्बः (washing soap)

स्नान्यः शम्बः
स्नानीयः फेनलो वा } (bathing soap)

—२—

आपूपिकः (वणिक्)—(cake-seller) [पा० ४।४।५१]

आपूपिको (वर्णी)—(whose food is cake) [पा० ४।४।६१]

आपूपिकः—(ऋत्विक्) (to whose health cake is conducive) [पा० ४।४।६५]

आपूपिकः (छात्रः)—(one who receives cake on appoined terms) [पा० ४।४।६६]

क्रैडनिकः (dealer in articles of games) [पा० ४।४।५१]

ग्रान्थिकः (book-seller)

ग्रान्थिकः (one to be bound) ग्रन्थिमर्हति ।

चायिकः (tea-seller) (Hindi)

ताम्बूलिकः (seller of pān)

ताम्बूली—तम्बोली (Hindi) [पा० ५।२।११५]

पानिकः (seller of pān) (Hindi)

मैष्टिकः (sweet-meat-seller)

लैखनिकः (pen-dealer)

लैखनिकः (journalist) [पा० ४।४।६१]

वास्त्रिकः (cloth-dealer)

शास्त्रिकः (seller of arms)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—३—

वर्गः (class) अध्यापकः (teacher)
उपाध्यायः (reader) प्राध्यापकः (lecturer)
आचार्यः (professor) महाचार्यः (D. Litt.)
परापरज्ञः (Ph. D) मुनिः (research fellow)
अनुकः (secretary) [पा० ५।२।७४]
रहोऽनुकः (private secretary)
अभिकः, अभीको वा (counsellor) [पा० ५।२।७४]
मण्डलः (cabinet)
माण्डलिकः (member of the cabinet)
पार्श्वकः (underground worker) [पा० ५।२।७५]
पदिकः, पत्कः (pedestrian) [पा० ४।४।१०]
आचयकः (fund collector) [पा० ५।२।६४]
जित्वरः, जयकः (expert rider)
दीपकः (lamplighter)
अश्मकः (collector of stones)
दूत्यः (the portion of an ambassador) दूतस्य भागः। (work of an ambassador) दूतस्य कर्म । [पा० ४।४।१२०]

समालोचनम्

ऋग्वेदसंहिता। पदादिसूच्यात्मकः पञ्चमो भागः। सोनटक्के इत्युपाह्वः श्रीपादसूनुः नारायणशर्मा काशीकरोपाह्वो गणेशसूनुः चिन्तामणिशर्मा इत्येताभ्यां सम्पादितोऽयं ग्रन्थः, पुण्यपत्तनस्थवैदिकसंशोधनमण्डलेन प्रकाशितः। मूल्यं पञ्चाशद्रूप्यकाणि ।

विदितमेवैतत् प्रायेण प्रियपाठकमहाभागानां यत् पुण्यश्लोकस्य तिलकमहोदयस्य स्मरणार्थं प्रतिष्ठापिततिलकविश्वविद्यालयतः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोनटक्केकाशीकरमहोदयाभ्यां महता श्रमेण प्रभूतेन चार्थव्ययेन भारतवर्षस्य तेभ्यस्तेभ्यः प्रदेशेभ्यः सुबहूनि हस्तलिखितानि वेदपुस्तकानि संगृह्य सायणभाष्यभूषिताया ऋग्वेदसंहितायाः भागचतुष्टयं प्रकाशितम्। इदानीमन्तिमं भागं प्रकाश्य ऋग्वेदसंहिता सभाष्या समाप्तिं नीता। अस्मिंश्च पञ्चमे भागे—

पदसूची (१-६९२), उत्तरपदसूची (६९३-७८३), खिलपदसूची (७८४-८६९), मन्त्रसूची (८६९-१००३), खिलमन्त्रसूची (१००४-१०१४), ऋषिसूची (१०१५-१०२४), देवतासूची (१०२५-१०३९), छन्दःसूची (१०४०-१०४८), सर्वानुक्रमः (१०४९-११२० इत्येताः सूच्यो विलसन्ति। ऋग्वेद एवादिमो ग्रन्थ आर्याणाम्, अत एवात्र कानि वा पदानि वर्तन्ते, किं वा तेषां स्वरूपमिति ज्ञातुं के वा न समुत्कण्ठन्ते। आभिः सूचीभिर्जिज्ञासूनाममीषां परमोपकारः स्यादित्यत्र लेशतोऽपि संशयो नास्ति।

अत्रोपोद्घाते षष्ठपृष्ठ उक्तम्—

Another suggestion made was to publish lists of passages or sūtras quoted from different works in Sāyaṇabhāṣya, such as Pāṇini's grammar, Yāska's Nirukta···This, in our opinion, would involve much labour and additional expense without any material gain. In his commentary on the first Maṇḍala, Sāyaṇa has made a comprehensive attempt at explaining each and every word occurring in the Ṛgveda on the basis of Pāṇini's grammar and has, therefore, quoted the various sūtras often and often. Further he has left that practice considering that the elucidation made in the commentary on the first Maṇḍala covered practically everything. ..Therefore it did not matter much if a particular Sūtra of Pāṇini was found quoted in the commentary on a particular mantra.

सर्वमेतदविचारितरमणीयम्। अस्माभिरेव सोनटक्के-महोदयस्य सविध उक्तम्—ईदृशी सूत्रसूची वार्त्तिकादिसूची च महत उपकारायैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्याद् भाष्याध्येतॄणामिति। तथाहि—ऋतश्छन्दसीति सूत्रं प्रायेण विस्मृतमेव भाष्यकृद्भिः। अन्तत एतत् तैः स्मृतं वा, स्मृतञ्चेत् क्व वा स्मृतमिति ज्ञातुं कस्य वा कौतूहलं न भवति? भाष्ये "क्रियाग्रहणमपि कर्तव्यम्" इति वर्तत आहोस्वित् "क्रियाग्रहणं कर्तव्यम्" इति आहोस्विदुभयम् इति ज्ञानमपि सर्वथापेक्षितम्। एवञ्च समग्रं भाष्यमेकेनैव विदुषा विरचितमाहोस्विद् द्वाभ्यामुताहो बहुभिरित्यपि निर्णेतुं शक्येत। किञ्च न केवलं प्रथम एव मण्डले भाष्यकृद्भिः सविस्तरं व्याख्याता व्याकरणप्रक्रिया, उत्तरत्राप्यन्तरान्तरा तथा विहिता, किंवात्र बीजमित्येतदपि निर्णेतव्यम्। आशास्यते खण्डान्तरे सर्वेषामेतेषामालोचनं विधीयेतेति।

यैरादिमं खण्डचतुष्टयं संगृहीतं तेषामवश्यं संग्राह्यं खण्डमिदम्, यैश्च न संगृहीतं तैरप्यवश्यं संग्राह्यमिदम्। चिरं जीवतां श्रीमन्तौ सोनटक्के-काशीकरमहाभागौ प्रकाश्य च सुविशुद्धानि सव्याख्यानानि वेदान्तराणि सेवेतां च सुरसरस्वतीमिति प्रार्थ्यते।

किराते-अर्जुने। श्रीभुजङ्गभूषणरायकाव्यसांख्यतीर्थविरचितो वङ्गभाषामयः प्रबन्धः। सत्यव्रत लाइब्रेरी १६७, कर्णओयालिस् ष्ट्रीट्, कलिकाता ६ इत्यत्र लभ्यम्। मूल्यं सपादो रूपकः।

सुमनोहरेऽस्मिन् प्रबन्धे भारवि-विरचितस्य किरातार्जुनीय-समाख्यस्य प्रथिततमस्य महाकाव्यस्य सारः सुललितया वङ्गभाषयोपनिबद्धः। भूमिकायां च भारविगताः किंवदन्त्योऽपि सुनिपुणमुपवर्णिताः। पण्डितोत्तंसस्य श्रीभुजङ्गभूषणरायमहोदयस्य देवभाषायां च मातृभाषायां चातिमात्रं प्रावीण्यं वर्तते, कवित्वमपि प्रतिपदमेव स्फुरति। तेन प्रबन्धोऽयं परमोपादेयः संवृत्तः। येषां छात्राणां किरातार्जुनीयस्य कियांश्चन भागोऽध्येयतया निर्दिष्टो वर्तते; येषां चाध्यापकानां किरातार्जुनीयमध्याप्यतया निर्णीतमस्ति, येषां च विदुषां किरातार्जुनीयकाव्यगतं कौतूहलं वर्तते सर्वैरेवामीभिरवश्यं संग्राह्योऽयं वङ्गभाषामयो ग्रन्थः। मुद्रणसौष्ठवमप्यस्य प्रशंसनीयमेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जैमिनीयमुपदेशसूत्रम् । Critically edited with his own commentary in Sanskrit, exhaustive introduction in English, translation into English and appendices by Prof. K. V. Abhyankar, M. A., Retd. Professor of Sanskrit, Gujrat College. Published by Gujarat Vidyasabha, Ahmedabad. Demy 8vo., pp.120, 245. Price *Rupees Eight only*.

ज्योतिषशास्त्रीयं जैमिनीयमुपदेशसूत्रमतिमात्रं समीचीनं परममुपादेयञ्च प्रेक्षावताम् । यैस्तावज्ज्यौतिषिकर्मतान्तरेण गणनादिकं क्रियते तैरप्यायुर्गणनार्थं जैमिनीयमेव मतं शिरसि धार्यते । परं सूत्रात्मकोऽयं प्रबन्ध इति प्रायेण दुर्बोधतया व्याख्यासापेक्षोऽयं संवृत्तः । व्याख्याश्च प्राचीना अस्य नैवोपलभ्यन्ते, अर्वाचीनाः, काश्चनोपलभ्यमाना अपि नैव सर्वान् संशयानुच्छिन्दन्ति । अत एव महदिदमुपकृतमभ्यङ्करमहोदयेन यद् दुर्बोधस्यास्य ग्रन्थस्य सुमनोरमेयं टीका निरमायि । प्रथमतः परःशतेषु पृष्ठेषु गणितफलितज्योतिषगतानि सुबहूनि तत्त्वान्याङ्लभाषया विशदीकृतानि । व्याख्यातुर्मतेन यद्यपि उपदेशसूत्रस्य रचयिता पूर्वमीमांसासूत्राणां प्रणेतुर्विभिन्न एव तथापि प्रायेण तस्यैवाभ्युदयकाले प्रादुर्भूतः । तत्र च शब्दद्वितयं प्रमाणत्वमगाहते । स्वात् स्वामिनः कण्टकादिष्वपारदौर्बल्यम् [२।३।१६] इत्युपदेशसूत्रेऽपारदौर्बल्यमुपलभ्यते, श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौबल्यमर्थविप्रकर्षात् [३।६।१४] इति मीमांसासूत्रेष्वप्युपलभ्यते । पूर्वमीमांसासूत्रे पारदौबल्यमित्यस्यार्थः—उत्तरोत्तरस्य दुर्बलतरत्वमिति । उपदेशसूत्रेऽपि अपारदौर्बल्यशब्दस्य तद्विपरीत एवार्थो भवितुमर्हति—उत्तरोत्तरस्य बलीयस्त्वमिति । यद्यपि केनापि टीकाकृता नायमर्थः स्वीकृतस्तथापि प्रकरणाद्यनुरोधेनायमेवाङ्गीकरणीय इति प्रतिभाति । किञ्च, पापैः कीकटे इत्युपदेशसूत्रे [२।२।२७] कीकटशब्दः समुपलभ्यते । तत्राभ्यङ्करमहोदयेनोक्तम्—

* Kīkaṭa—The name of this people occurs only in one passage of the Rigveda, where they appear as hostile to

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयस्थाने पापग्रहस्य योगे दृष्टौ वा कीकटे नाम अनार्यनिवासे मगधादौ देशे मरणं स्यात्। कीकटशब्द ऋग्वेदे तृतीयमण्डले विश्वामित्रस्यार्षे किं ते कृण्वन्ति कीकटषु गावः [३।५३।१४] इत्यत्र दृश्यते। तद्व्याख्यानं यास्काचार्यैः "किं कृताः किं क्रियाभिरिति प्रेप्सा वा" [निरुक्त ६।३२] इति शब्दैरनार्यनिवास इति कृतम्। कीकटशब्दप्रयोगोऽत्र सूत्रकाराणां प्राचीनत्वं यास्कसमानकालीनत्वरूपं दर्शयतीत्यूह्यम्। इति।

ग्रन्थेऽत्र १२० पृष्ठात्मिका विविधविषयविचारभासुरा भूमिका, १६० पृष्ठात्मिका सव्याख्याना तृतीयाध्यायस्य तृतीयपादान्ता सूत्रराजिः, ततश्च तृतीयाध्यायस्यान्तिमपादस्य, चतुर्थाध्यायस्य च पादचतुष्टयस्य सूत्रं मूलमात्रम्, ततश्च प्रथमे परिशिष्टे जैमिनिसूत्रकारिका द्वितीयाध्यायान्ते, द्वितीये च परिशिष्टे चतुर्दशाध्यायात्मकमथर्ववेदोक्तमथर्वज्योतिषापरनामकम् आत्मज्योतिषम्, ततश्च प्रथमद्वितीयाध्यायगतानां सूत्राणामाङ्ग्लानुवादो विलसति। यद्यपि सर्वत्राभ्यङ्करमहोदयेन साकमस्माकं मतस्यैक्यं नास्ति तथापि भूमिकायां व्याख्यायां च तस्यानितरसाधारणं पाण्डित्यं प्रतिपदमेव प्रकटीभवतीति निर्माय-मेवोच्यते। अवश्यं संग्राह्यमिदं पुस्तकं ज्योतिषशास्त्रानुरागिभिरिति शम्।

---

the singer and as under the leadership of Pramaganda. Yāska declares that Kīkaṭa was the name of a non-Aryan country, and later, Kikaṭa is given as as a synonym of Magadha. Hence Zimmer concludes that the Kikaṭas were a non-Aryan people living in the country later known as Magadha. Weber holds that this people were located in Magadha, but were Aryan, though at variance with other Aryan tribes, perhaps because of heretical tendencies, for Magadha was later a seat of Buddhism. But the identification is uncertain and doubted by Oldenberg and Hillebrandt. *Vedic Index.*

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतशिक्षासहचरः। A co-ordinated course of reading, grammar and composition. (द्वितीयं खण्डम् ।) श्रीफटिकलाल दास बि, ए, से आ पे विरचितः। वङ्गभाषामयस्य ३६०-पृष्ठात्मकस्य सुबृहतोऽस्य पुस्तकस्य मूल्यं सार्धरूपकमात्रम् । चेन्दननगर, हुगली (Chandernagore, Hooghly, W. Bengal) इत्यत्र ग्रन्थकारसकाशाल्लभ्यम् ।

पुस्तकस्यास्य प्रथमं खण्डं पूर्वमेव समालोचितमस्माभिर्मञ्जूषायाम् । तदैव गणितशास्त्रनिष्णातस्य संस्कृतभाषाविशारदस्य च ग्रन्थकर्तुः फटिकलालदासमहाशयस्य परिचयोऽपि प्रदत्तः । अत्र च पुस्तके प्रथममेव मङ्गलाचरणत ऊर्ध्वं संस्कृतभाषामयी विज्ञप्तिर्विलसति । तत्र च स्वप्रयास इत्थमुपवर्णितो ग्रन्थकृता—

नवां रीतिं समाश्रित्य शिक्षाविज्ञानसम्मताम् ।
बालानां सुखबोधाय सर्वत्र विहितः श्रमः ॥
यथा विद्यातिभारेण नावसीदन्ति बालकाः ।
तथा मे सर्वतो दृष्टिर्वृथा नो चेद्विचेष्टितम् ॥
यदेव बालबोधाय श्रेयस्तल्लिख्यते मया ।
विबुधानां विबोधाय नात्र काचिद्विडम्बना ॥ इति ।

अत्र भाषाया मूलं वाक्यम् इति मतमनुसृत्य प्रथमत एव वाक्यं सन्निविष्टिम्, तदुपयोगीनि च सुबन्तानि तिङन्तानि च पदानि प्रदर्शितानि । एवं च प्रतिपाठमेव केषाञ्चन सुबन्तानां तिङन्तानामव्ययानां च शिक्षणेन छात्राणामतीव सौकर्यं भवति, अनायासेन च तत्तच्छब्दरूपाणि धातुरूपाणि च गुडूचीलागं लगन्ति तेषां मानसेषु। अत्र प्रथमतः संस्कृतभाषाामयाणि वाक्यानि वङ्गभाषामयाश्च तदर्था दृश्यन्ते, ततश्च कानिचन संस्कृतानि पदानि तेषामर्थाश्च, ततश्च केचन धातवः, तेषामर्थाश्च, ततश्च प्रयोगप्रदर्शकानि वाक्यानि, ततश्च भाषान्तरारोपणार्थं संस्कृतानि वङ्गीयानि च वाक्यानि। ततश्च प्रतिपाठं हास्यरसात्मकं संस्कृतव्याकरणस्य तत्तद्विशेषप्रदर्शकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूदारचन्द्रोपाख्यानम्। एवं च क्रमेण निपातानाम् अर्थोल्लेखः प्रयोगप्रदर्शनं विविधलकाराणां विविधविभक्तीनामर्थकथनं प्रयोगप्रदर्शनञ्च ग्रन्थेऽस्मिन्नतीव सरलया रीत्या विहितम्। वङ्गीयेषु विद्यालयेषु पुस्तकमिदं पाठ्यतया निर्देक्ष्यते इत्यस्माकं बलवती प्रत्याशा। चिरं जीवतात् फटिकलालमहोदयः, ईदृशानाञ्चापरेषामपि प्रबन्धानां विरचनेन परिचरताच्च सुरसरस्वतीमिति प्रार्थ्यते।

१। **प्रवेशपाठावलिः।** A First Reader of Sanskrit by Prof. Y. Mahalinga Sastri. Price As. 10.

२। **संस्कृतमध्यमपाठावलिः।** A Middle Reader of Sanskrit by Prof. Y. Mahalinga Sastri. Price As. 12.

३। **संस्कृतप्रौढपाठावलिः।** An Advanced Reader of Sanskrit by Prof. Y. Mahalinga Sastri. Price As. 12. Publishers: B. G. Paul Co., 4, Fancis Joseph Street, G. T. Madras.

संस्कृतभाषायां प्रवेशं व्युत्पत्तिं चाधिगन्तुमिच्छूनां बालानां कृते रचितानीमानि परममनोरमाणि पुस्तकानि विद्वत्प्रवरेण श्रीमता महालिङ्गशास्त्रिमहाभागेन। तत्र प्रथमे पुस्तके अतिमात्रसरलया भाषया सरसान्युपाख्यानानि सन्दृब्धानि, रामायणगतानि सरलानि च पद्यानि सन्निविष्टानि, भर्तृहरिप्रभृतीनां महाकवीनां च वाक्यानि सरलया संस्कृतभाषया समुपनिबद्धानि।

संस्कृतमध्यमपाठावली—गणेशगीतम्, योगनन्दाख्यायिका, मार्गानुयोगिभीतः, मनःसदृशी सिद्धिः (पद्यम्), हरस्वामिकथा, मुनिमूषिककथा (पद्यम्), चिरदातुः कथा, कर्पटिकाख्यायिका (पद्यम्), भोजनं देहि राजेन्द्र, सन्तोषपुष्टानां परिव्राजकानाम् (प), अलसनाथः, पौरुषकथा (प), क्षमावतो मुनेः (प), विक्रमौदार्यम्, एकबलीवर्दस्वामिनः कथा (प), लोकानुवर्तनम्, छागभक्षकाणां ग्राम्याणाम्, क्षीरिणीवाहीकः, मूषकाख्यवणिक्पुत्रस्य (प), सातवाहनकथा, अजगरपतिव्रतयोः (प), अविमारके विदूषकचन्द्रिकयोः (भासनाटकात्), दिलीपगोरक्षण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथा, रघुकौत्सयोः, अजगजयोः, दशरथशापः, मायामृगः (प), समुद्रक्षोभणम् (प) जन्मभूमिप्रशस्तिः (प), अक्षरक्रमोपदेशमालिका (प) इत्येते विषया विराजन्ते ।

संस्कृतप्रौढपाठावलौ श्रीकृष्णलीलागीतम्—मृद्भक्षणम्, अलसः कश्चन बालः, धौम्यशिष्य उपमन्युः, वटुचापलम् (प), कैलासभीतः, गजदर्शिनोऽन्धाः (प), मूर्खपण्डिताः, हरिशर्माख्यायिका (प), कौलिकराक्षसः, अर्थवर्म-भोगवर्मणोः (प), कुक्कुटानां बिडालस्य च, कोटिद्वयम्, अलीकमन्त्रिणः कथा, निरवसाना कथा, समुद्रशूरकथा (प), रूपकस्येतिवृत्तम् (modelled on Addison's essay on *The Adventures of a Shilling*), अम्बुवाहः (Translation of Shelley's *The Cloud*), अच्छोददर्शनम्, रामस्यायोध्याप्रवेशः (रघु १४), कुशस्यायोध्याप्रत्यक्षम् (रघु १६), ऋतुसंहारसारः, शिवगीतम्, निगमनम् इत्येते विषया वर्तन्ते । एषां केचन शिक्षाप्रदाः केचन हास्यरसोद्रेकिणः, सर्व एव चित्ताकर्षिणः । पुस्तकत्रितयमिदं विद्यालयेषु पाठ्यतया निर्दिष्टं चेच्छात्राणां महानुपकारः स्यात् ।

श्रीशिवकैवल्यचरितम् । कैकिण्युपनामकेन श्रीमञ्जुनाथात्मजेन डाः व्यङ्कटरावसाहित्यभूषणेन सन्दृब्धं महाकाव्यम् । मूल्यं रूप्यकमात्रम् । Popular Book Depot, Lamington Road, Bombay 7 इत्यतो लभ्यम् ।

बहोः कालात् पूर्वमनेके सारस्वतब्राह्मणा कश्मीरतः प्रस्थाय दाक्षिणात्यमनुप्रपद्यमानाः गोयापत्तनान्तर्गते कुशस्थलीग्रामे वसतिं कल्पयामासुः । ततश्च गोयाप्रदेशे पर्त्तुगीजैरधिकृते कौशिकगोत्रसम्भूतैः पण्डितोपाह्वैरेभिर्मनीषिभिः कारओयारप्रदेशान्तर्गते कैकिणीग्रामेऽवस्थितिर्विहिता । एभिश्च कुलदेवता शान्तदुर्गापि कैकिणीमानीता, तत्र च सुमनोहरं मन्दिरं निर्माय यथाशास्त्रं प्रतिष्ठापिता । अस्मिन्नेवान्ववाये प्रादुर्भूता [illegible] । तेषामेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महनीयं चरितमत्रोपवर्णितं प्रसादरम्येणानुष्टुप्छन्दसा भिषक्चक्रचूडामणिना ग्रन्थकृता।

अत्र प्रस्तावनायां गन्थकारमहोदयेनोक्तम्—यथा चीनदेशस्य राष्ट्रभाषा चीनी, इङ्ग्लण्डदेशस्य ईङ्लीशम्, तथा भारतस्य भाषावश्यमेव भारती (संस्कृतम्) भवति। अधुना हिन्दीभाषा विशेषकारणानुसारेण राष्ट्रभाषापदं नीता। तथाप्यचिराद् गीर्वाणभाषाखिलभारतस्य राष्ट्रभाषापदं प्राप्स्यतीत्यनेकेषां दृढो विश्वासः। जगति प्रचलितानेकभाषाणां जननीभूता गीर्वाणभाषा भारतस्य राष्ट्रभाषा भूत्वा देशस्य गौरवमसंशयं वर्धयिष्यति। गीर्वाणभाषा मृतभाषेति प्रतिपादनं नूनं परिहासविजल्पितमेव" इत्यादि।

प्रशंसनीयतमोऽयं प्रयासः किङ्किणीमहोदयस्य। अत्रत्येषु पद्येषु बहुत्र प्राणस्पन्दनमनुभूयते। काव्यमिदमस्मद्देशे समादरं लप्स्यत इति नः प्रतीतिः।

Pearls beyond Price compiled by Prof. S. C. Gupta, M.A. Published by Kumar Prakashan (Publications), Moradabad. Price Annas Fifteen only.

सुदर्शने सुमनोहरे सुमुद्रितेऽस्मिन् "अमूल्यमौक्तिक"समाह्वे आङ्लभाषामयसुभाषितग्रन्थे विविधानि सुभाषितानि संगृहीतानि। न केवलं वैदेशिकान्येव सुभाषितान्यत्र सन्निवेशितानि वेदादिभ्योऽपि हृदयङ्गमानि वाक्यान्युद्धतानि, रवीन्द्रनाथ-राधाकृष्णन्-जहरलालप्रभृतीनामपि मञ्जुलानि वचनान्यन्तरान्तरा संयोजितानि। विषयानुसारेण सुभाषितानां सन्निवेशे वाचकानां सौकर्यं स्यात्, आशास्यते पुनर्मुद्रणकाले तथैव विधीयतेति। पुस्तकमिदं छात्राणां प्रभूतमुपकारं विधास्यतीति नः प्रतीतिः। मुद्रणसौष्ठवेन चित्रबाहुल्येन च सन्दृष्टमात्रमेवैतन्मनो हरति।

गौडपादीयमागमशास्त्रम्। महामहोपाध्यायविधुशेखरशास्त्रिरचितया वृत्त्या सहितम्। कलिकाता विश्वविद्यालयतः प्रकाशितम्। मूल्यं सार्धाष्टरूप्यकम् (Rs. 8/8/-)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकदर्शन। (हिन्दीभाषामयः प्रबन्धः) डाः फतहसिंह एम् ए, बी टी, डी लिट् विरचितम्। प्रकाशक—संस्कृति सदन, कोटा, राजस्थान। मूल्य रूपकपञ्चकम्।

भूयान् खलु कालो व्यतीतः समधिगतस्य समीचीनतमस्यास्य प्रबन्धद्वितयस्य। आगामिन्यां संख्यायामवश्यमेव विधास्यते समालोचनम्।

Deccan College Post-Graduate and Research Institute Poona 5 इत्यतः प्रकाशितान्यधोलिखितानि पुस्तकानि समालोचनार्थमागतानि विभूषयन्ति नः पाठागारम्। सर्वाणीमानि सम्पादकानां पाण्डित्यातिशयं च भूरिपरिश्रमं च संसूचयन्ति। क्रमेणैषां विस्तरेणालोचनं विधास्यते। त्वर्यतां वाचकमहाभागैरेतेषां संग्रहायेति शिवम्।

Historical Grammar of Apabhrams'a by Gajanan Vasudev Tagore, M.A., B.T., PH.D. Rs. 21/-

Historical Grammar of Inscriptional Prakrits by Madhukar Anant Mehendale, M.A, PH.D. Rs. 21/-

Cultural History from the Vāyupurāṇa by Devendrakumar Rajaram Patil, M.A., LL.B., PH.D. Rs. 15/-

Citations in Sabara-Bhāṣya by Damodar Vishnu Garge, M.A. PH.D. Rs. 16/-

Anekārtha-Tilaka of Mahīpa critically edited by Madhukar Mangesh Patkar, B.A. Rs. 6/-

The Amaramaṇḍana of Kṛṣṇasūri critically edited by V. Raghavan, M.A., PH.D. Rs. 3/-

Verbal Composition in Indo-Aryan by Ramchandra Narayan Vale, M.A., B.T., PH.D. Rs. 18/-

---

संस्कृत-मासपत्रिका

मधुरवाणी। प्रधानसम्पादकः—पं गलगली रामाचार्यः। सम्पादकः—पण्डितः पण्ढरीनाथाचार्यः। वार्षिकं मूल्यं रूपकपञ्चकम्। प्राप्तिस्थानम्—बा. गलगली, बीजापुर।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यास्तावद्देवभाषामय्यः पत्रिकास्तृणीकृतस्वार्थाः प्रचरन्ति भारतभूम्यां तेष्वेवेयमन्यतमा प्रधानतमा च मधुरवाणीत्यन्वर्थनाम्नी मासपत्रिका। अस्याश्च सम्पादकवर्यैर्महतीमपि हानिमुररीकृत्य साम्प्रतमपि प्रकाश्यते मधुरवाणीति सहस्रशस्ते धन्यवादानर्हन्ति। प्रियवाचकमहाभागाः, आसीदस्माकं बलवता प्रत्याशा यद् भारतवर्षस्य स्वाधीनतासमधिगमादनन्तरं पुनरपि प्रोड्डीना स्याद्देवभाषा-वैजयन्ती सर्वत्रैवाप्रतिहतम्। परं के वयमेवमाशंसितुम्। दुर्भाग्यतः खल्वस्माकमिदानीं सर्वैरपि हिन्दी हिन्दीति रारट्यते संस्कृतभाषायै चासूय्यते। आर्याः, हिन्दीभाषाया अपि मूलं संस्कृतमेव, हिन्दीभाषाया अप्यभ्युदयो नान्तरेण संस्कृतभाषाविज्ञानं सुघटः संसाधयितुमिति न खलु विस्मर्तव्यं भवद्भिः। अत एव संस्कृतभाषामयपत्रिकादीनां समुन्नतिविधौ सर्वात्मना प्रयतनीयमेव।

साम्प्रतमस्माभिर्मधुरवाण्याः षोडशवर्षस्य ४-५ सञ्चिकाः समधिगताः। अत्र च मङ्गलाचरणम्, मासावतरणिका, सम्पादकालोकः, आर्यसंस्कृतिः, किर्लोस्कर-दिल्लीविशेषाङ्कः, संस्कृतभाषाया अन्तःशक्तिः, मैथिलीपते, कविता कामिनी कौतुकाय, संस्कृतसाहित्ये गद्यकाव्यविरलतायाः कारणम्, मधुरवाणीशुभाशंसनम्, अनामिका सार्थवती बभूव, वैजयन्ती, सङ्गीतसम्राट्, अहो विस्मरणम्, समासविचारः, संस्कृत-समाचारः, सम्पादकानां संस्कृतभाषणम् इत्येते गद्यपद्यप्रबन्धा विलसन्ति। सम्पादकमहोदयानां लेखाः पीयूषयूषकल्पाः प्रतिपदमेव मधु निष्यन्दमाना कस्य वा सचेतसश्चेतो न विद्रावयेयुः। अन्येषामपि लेखा नितरामेवावर्जयिष्यन्ति मानसानि सहृदयानामित्यस्माकं बलीयसी प्रतीतिः। संस्कृतभाषायां व्युत्पत्तिमधिगन्तुकामैश्छात्रैर्व्युत्पन्नैश्च प्रवयोभिः सर्वैरेव मधुरवाण्या ग्राहकत्वमङ्गीकर्तव्यम्। चिरं जीवतु मधुरवाणी, अनुदिनं च समेधमानवैभवा संसाधयतु हितं भारतवर्षस्य भव्यं च भारतवर्षीयाणामिति भगवान् भूतभावनः प्रार्थ्यते। वार्षिकं मूल्यं रूप्यकपञ्चकमात्रम् Pandit Pandharinathacharya Galgali, House no. 472, Bagalkot, Bijapur इत्यत्र प्रेषणीयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दार्थत्वे शास्त्रस्याव्यापकत्वदोषेणानारम्भशङ्का उभयार्थत्वकथनेन, शब्दार्थ-सम्बन्धानित्यत्वे अन्योन्याश्रयादिदुष्टतयानारम्भशङ्का सिद्ध इत्यादिना तन्नित्यत्व-कथनेन च निरस्तेत्युपोद्घातत्वेनेदमाह्निकम् । चतुर्दशसूत्र्या अपि शास्त्र-प्रवृत्त्यर्थत्वात् तत् समर्थनमप्युपोद्घात एव । अत एवेदं पस्पशाह्निक-मित्युच्यते । शास्त्रारम्भसमर्थकोपोद्घातग्रन्थसन्दर्भस्य पस्पशाशब्देन वृद्धै-र्व्यवहारात् ।

शास्त्रस्यारम्भको ग्रन्थ उपोद्घात इतीरितः ।
स एव ग्रन्थसन्दर्भः पस्पशः कथितो बुधैः ॥

Mādhava says in his Dhātuvṛtti under स्पश बाधन-स्पर्शनयोः—

पस्पशा । यङ् लुगन्तादचि टाप् । संज्ञापूर्वको विधिरनित्य इति नाभ्यासस्य दीर्घः । . . अत्र स्वामी पष इत्येके इति, तेन पाषण्डः पाषाण इत्याह । दुर्गशाकटायनयोरप्ययमेव पक्षः । अनयोः पाठे "प्रति स्पशो वि सृज तूर्णितमः" [ऋ० सं० ४।४२।३], उपसर्गश्च स्पशः, शब्दविद्येव नो भाति राजनीतिरपस्पशा [शिशुपालवधः २।११२] इत्यादिप्रयोगा अननुगुणाः ।

Vallabha says under S'is'u ii. 112:

अपस्पशा अनुक्तप्रयोजना । अविद्यमानः पस्पशः प्रयोजनग्रन्थो यस्याः सा अपस्पशा । यावन्न तत्रोक्तम्—"रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" इति तावन्न तत्र गौरवं स्यात् ।

Mallinātha says under the same stanza:

पस्पशः शास्त्रारम्भसमर्थक उपोद्घातसन्दर्भग्रन्थः ।

One MS. of the commentary Kalā on Nāges'a's Laghu-Mañjūṣā (p. 90 f. n.) reads :

स्पश्यते स्पृश्यत उपोद्घाततया तावदुपगम्यते इति स्पशः कर्मण्यङि बाहुलकाद् द्वित्वे रूपम् ।

Bhaṭṭoji in his Prauḍhamanoramā contents himself with quoting the view of Mādhava.

Jñānendrabhikṣu says in his *Tattvabodhinī* :

पस्पशा । यङन्तादचि "यङोऽचि च" [२।४।७४] इति लुक् । "अजाद्यतः०" [४।१।४] इति टाप् । "दीर्घोऽकितः" [७।४।८३] इत्य-भ्यासस्य दीर्घो न भवति, संज्ञापूर्वकविधेरनित्यत्वादित्याहुः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

It is most unfortunate that Indian grammarians do not postulate a root *spas'* in the sense of 'seeing'. We can easily detect the root in that sense in the words *spaṣṭa* 'evident' and *spas'* 'spy'. It is found with the loss of the initial sibilant in *pas'yati*, *apas'yat* etc. which have nothing to do with *dṛs'* except in sense. The English words *spectator*, *spectacles*, *species*, *spy* etc. are derived from the European counterpart of this root. Lat. *specere* means 'to see, to look at'. The root appears in Greek with metathesis as *skeptomai* 'I look clearly at.' In the Rigveda we find :

यत् सानोः सानुमारुहद् भूर्यस्पष्ट कर्त्वम् ।
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ।।१।१०।२।।

'As up he rose from ridge to ridge and looked upon much that yet remained to be done, Indra learns this object of his, and as a ram he set himself in motion with his troop (the Maruts).'

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
इन्द्रस्य युज्यः सखा ।।१।२२।१९ ।।

'Look ye on Viṣṇu's works, from where he pays heed to his ordinances, the true friend of Indra.'

Patañjali quotes कपोतः शरदं पस्पशाते under vii. 3. 37. 1 and Kaiyaṭa says स्पशिर्वार्त्तिककारवचनादपठितोऽपि धातुः।..."स्पश बाधनस्पर्शनयोः" ...इति केचित् पठन्ति ।

Paspas'ā, therefore, means that which shows up the whole thing, gives a bird's eye-view of the thing and corresponds in meaning to *synopsis* (Gk. *sun* together and *opsis* sight, view) a general view, an outline. In स्पश बाधनस्पर्शनयोः commentators explain स्पर्शन as ग्रथन. If it is explained as चक्षुरिन्द्रियेण ज्ञानम् no difficulty will arise.

Āhnika—what was taught or read in a day was known as Āhnika. It may be translated by "lecture."

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

APPENDIX I.

Grammar and its Critics

Grammar, strictly speaking, is a natural science. Its function is to register the facts of a language in a certain stage of its development. For its purpose, words which conform to its canons or "correct words" are as valuable as "incorrect" words, *i.e.*, those which do not so conform but have passed current in the language. In every country, however, it soon attains the status of a normative science and arrogates to itself the task of regulating the language of the people. As soon as this happens, a certain section of easygoing people begins to look askance at it.

There is always and everywhere a class of people who are intolerant of any discipline. With grammar, ethics, logic and the like they have no patience. We speak out of an inner necessity, they hold, and the most natural words and expressions are the best. As Patañjali points out, it is not necessary for us whenever we have occasion to use words to go to the house of a grammarian and order some words, just as when in need of pots we go to a potter and order them. यथा घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाह—कुरु घटं कार्यमनेन करिष्यामीति, न तद्वच्छब्दान् प्रयोक्ष्यमाणो वैयाकरणकुलं गत्वाह—कुरु शब्दान् प्रयोक्ष्य इति। (Mahābhāṣya ed. by Kielhorn, Vol. I, pp. 7-8). A lover does not care for grammar when pouring out his heart to his beloved, a mother does not think of grammatical accuracy when giving vent to her grief for the loss of her son. Yet the words of the moonstruck lover and the bereaved mother are far more impressive than all the grammarians in the world could ever make them. On the other hand, grammarians and Mīmāṁsakas have always been considered constitutionally incapable of understanding the softer emotions that stir the human heart. As the king's counsellor very plausibly points out in the Das'akumāracarita :—

यावता च नयेन विना न सिध्यति लोकयात्रा स लोकत एव सिद्धो नात्र शास्त्रेणार्थः। स्तनन्धयोऽपि तैस्तैरुपायैर्लिप्सते स्तन्यपानं जनन्याः (Ucchvāsa VIII).

'The amount of policy without which one cannot make one's

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

way in the world one acquires from the world. S'āstra is not necessary for this purpose. Even an infant at the mother's breast makes various movements to suck the milk.' Exactly the same thing may be said of grammar. All the knowledge that is necessary for us to communicate our thoughts to others we acquire unconsciously from the conversations of our elders and from our intercourse with the world. Even in the matter of lending grace to a poetic composition, Grammar is not of much use, for its restrictions often lead people to use harsh unmelodious words jarring to the ear. And what useful purpose can grammar serve? You cannot use a word simply because it is sanctioned by grammar if it has not passed current in the language ; on the other hand if a word is already established in popular usage, rules for its formation are unnecessary. Grammarians might cry till they are hoarse but they cannot banish words likh "vis'r ma," "puratah," etc. from the language.

लोके तु सर्वभाषाभिरर्थो व्याकरणादृते ।
सिध्यति व्यवहारेण काव्यादिष्वप्यसंशयम् ।।
काव्यशोभास्वपि त्वेतद् नात्रातीवोपयुज्यते ।
वैयाकरणदोषाद्धि कष्टाञ्छब्दान् ऽयुञ्जते ।।
न च लक्षणमस्तीति प्रयोक्तव्यमलौकिकम् ।
लोकसिद्धप्रयोगे तु लक्षणं स्यादनर्थकम् ।।

(Tantravarttika, ed. Chowkhamba, p. 205.)

It is for this reason that the Naiyāyikas, the most intellectual of philosophers, do not care an 'earthen jar' for grammatical purity in their language. Their view on this point is exeeedingly beatifully summed up in the pithy saying attributed to one of them : अस्माकूनां नैयाय्रिकेषां अर्थनि तात्पर्यं शब्दनि कोश्चिन्ता ? The mass also thinks in the same way. There is the popular saying—

मूर्खो वदति विष्णाय ज्ञानी वदति विष्णवे ।
द्वयोरेव समं पुण्यं भावग्राही जनार्दनः ।।

'An illiterate man says *visṇāya* whereas a learned man says *visṇave*. Equal merit accrues to both, for Janārdana considers the inner spirit.'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Grammar is worse than useless, urge these people. In the first place, the observance of the rules of grammar argues "slave mentality." Secondly, what is the use of burdening the memory "with loads of learned lumber" which will have later to make room for more useful things. "Wozu denn immer lernen was man später doch vergisst!" And have the grammarians themselves followed their own precious rules? Do we not find authoritative sages, authors of the Kalpasūtras, and Gṛhyasūtras, Smṛtis and Mīmāṁsā using any number of ungrammatical words and expressions? Is there any limit to the number of ungrammatical forms in the epics, Purāṇas and other sciences like the Hastiśikṣā, etc.? Do we not find what pedants are pleased to term "ungrammatical expressions" in the Vedas even, expressions which no rule of grammar can ever justify? Has it not been said that there are a hundred *apaśabdas* in Māgha, three hundred in Bhāravi and innumerable in Kālidāsa? अपशब्दशतं माघे भारवौ तु शतत्रयम् । कालिदासे न गण्यन्ते कविरेको धनञ्जयः ॥

To take some concrete examples. Every schoolboy knows that the neuter singular nominative of '*itara*' is '*itarat*' and not '*itaram*,' yet Mas'aka writes: *samānam itaram jyotiṣṭomena* and the Sūtrakāra himself writes: *samānam itaram gavaikāhikena*. It is well-known that when the benefit of the action accrues to the agent, then and then alone Ātmanepada is used, yet in direct violation of all rules of grammar the Sūtrakāra writes—*ahīne bāhiṣpavamānaih sadasi stuvīran* where the nominative is the three officiating priests who do not reap the fruit of the action. Āśvalāyana writes: *pratyasitva prāyas'cittaṁ juhuyāt* where he uses the suffix "*lyap*" though the root is preceded by a preposition. A greater outrage on grammar could hardly be imagined. In the aphorism "*gavyasya ca tadādiṣu*" (VII. 2. 18) Jaimini uses the word '*gavya*' to mean the sacrifice known as "*gavām ayana*" a meaning the word simply does not possess. On a par with this is his use of the word '*Dyāvoh*' in the Sūtra "*Dyāvostatheti cet*" (IX. 3. 18) where he means "*Dyāvāpṛthivyoh*." The author of the Gṛihyasūtra writes *mūrdhanyabhijighrāṇam* where the substitution of "*jighra*" for "*ghrā*" is absolutely unwarranted. And Yāska whose *Nirukta* professes to impart

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

perfection to grammar has erred in the opposite direction by not substituting *"vac"* for *"brū"* in the line *"brāhmaṇo bravaṇāt."*

It is for this reason that some have gone so far as to make fun of Pāṇini's rules. One ingenious poetaster writes:

काचं मणिं काञ्चनमेकसूत्रे
गृथ्नाति बाला न हि तद्विचित्रम् ।
विशेषवित् पाणिनिरेकसूत्रे
श्वानं युवानं मघवानमाह ॥

'No wonder that the girl strings together glass, gems and gold, for Pāṇini, who ought to know better, has spoken of the dog, the youth and the king of the gods in the same breath.[2]'

A lover is made to cry out in the agony of his soul:

नपुंसकमिति ज्ञात्वा प्रियायै प्रेषितं मनः ।
तत्तु तत्रैव रमते, हताः पाणिनिना वयम् ॥

'I sent my mind as an emissary to my beloved, thinking it to be neuter. It, however, dallies in her company. I have to thank Pāṇini for this calamity.'

Another scholar with a touch of the logician in him points out that according to Pāṇini, neither the Ganges nor the Jumna is a river, it is land that is a river.

पाणिनेर्न नदी[3] गङ्गा यमुना वा नदी स्थली ।

---

[1] Paṇini VI. 4. 133 श्वयुवमघोनामतद्धिते.

[2] Cf. "Mary, Mary, quite contrary,
How does your garden grow?
With cockle shells,
And silver bells,
And pretty maids all in a row."

[3] There is a play here upon the word नदी, which means a river in literature but is also a technical term in Pāṇini's grammar, meaning roughly speaking, feminine words ending in ई and ऊ and declined like नदी and वधू.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Some think that Pāṇini, Patañjali and others might have been more profitably engaged in composing love-poems and didactic poems. They point out the great potentiality in this direction in the writings of grammarians. Take for instance such "*samasyāpūraṇa*" stanzas as :

गुर्वन्तिके ह्रिया पूर्वं संज्ञयार्थविबोधनम् ।
करोति पत्युर्युवतिरथ शब्दानुशासनम् ॥

'In the presence of the elders the bashful young bride instructs her husband in love by means of gestures, then (after the elders have moved away) she conveys her instructions in words.' This is a *samasyāpūraṇa* with "*atha s'abdānus'āsanam*" the opening words of the Mahābhāṣya.

"सर्वस्य द्वे" जगति नियते सम्पदापच्च जन्तो-
"र्वृद्धो यूना" सह परिचयात्त्यज्यते कामिनीभिः ।
"एको गोत्रे" भवति पुरुषः सम्पदामाश्रयो यः
"स्त्री पुंवच्च" व्यवहरति चेद् विद्धि गेहं प्रनष्टम् ॥"[1]

"Each has double"—prosperity and adversity are the inevitable lot of every creature.
"The elder, when with the younger"—young maids get friendly is left in the lurch.
"One in a family"—there is only one such and he is the one who is prosperous.
"Feminine like masculine"—when this begins, know the house is ruined.

"उपसर्गाः क्रियायोगे"[2] पाणिनेरपि सम्मतम् ।
निष्क्रियोऽपि तवारातिः सोपसर्गः सदा कथम् ॥

'Even the great Pāṇini thinks that *upasarga*[3] is united to

---

[1] This is a *samasyāpūraṇa* with Pāṇini VIII. 1. 1; I. 2. 65; IV. 1, 93; I. 2. 66.

[2] Pāṇini I. 4. 59.

[3] There is a pun here on the word "upasarga," which means both "preposition" and "calamity."

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

action. How then is your enemy, though (rendered) inactive, still united to *upasarga* ?'

राजन् यद्यपि ते बाहू कान्तालिङ्गनलालसौ ।
तथापि समरे भेत्तुं "शक्तौ हस्तिकपाटयोः" ॥[1]

'Though your arms, O king, long to embrace the beloved, still for shattering in battle they have "strength in case of elephant-*kavāta*" (*i. e.*, they are strong enough to shatter the temples of elephants in battle).'

Appendix II.

दुष्टः शब्दः etc. p. 11.

व्याकरणप्रयोजनप्रतिपादनपरे वचने "दुष्टः शब्दः" इति प्रतीकमुपलभ्यते। समग्रश्च श्लोको यथा—

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ इति ।

'स्वरतः' स्वरेण उदात्तादिना । 'वर्णतः वा' अथवा वर्णेनाकारादिना ककारादिना च। आद्यादेराकृतिगणत्वात् "आद्यादिभ्य उपसंख्यानम्" इति वार्त्तिकेन सार्व-विभक्तिकस्य तसेर्विधानात् तृतीयार्थे तसिः । 'दुष्टः' अशुद्धः 'शब्दः' नामाख्यातोपसर्गनिपातरूपः । 'मिथ्या' अयथावत् 'प्रयुक्तः' उच्चारितः 'तम् अर्थम्' यदर्थप्रतिपादनाय प्रयुक्तस्तमर्थं 'न आह' स्वरदोषाद्वा वर्णदोषाद्वा उभय-दोषाद्वा वक्तुरभिमतमर्थं नाभिधत्ते । न केवलं तमर्थं नाह, प्रत्युत प्रत्यवायोत्-पादनद्वारा हिंसको भवतीत्याह—स वाग्वज्र इति । वागेव वज्रः । मयूरव्यंस-कादित्वात् समासः, द्वन्द्वे द्विवचननपुंसकत्वयोरन्यतरस्य प्रसङ्गात्, बहुव्रीहौ दुष्टशब्दपरामर्शिना स इत्यनेन सामानाधिकरण्यानुपपत्तेः । रूपकालङ्कारेण दुष्टाया वाचोऽमर्षित्वममोघहिंसत्वं च प्रतीयते । 'यजमानं हिनस्ति' येन खल्वभ्युदयाय महताभिनिवेशेन प्रभूतेन परिश्रमेण गरीयसा चार्थव्ययेन यागः प्रारब्धः तमेव यजमानं न केवलमभ्युदयेन न योजयति, प्रत्युत हिनस्ति विनाशयति, तस्य महतीं हानिं करोतीत्यर्थः । 'यथा' 'स्वरतः' स्वरेण 'अपराधात्'

[1] Pāṇini III. 2. 54.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोषात् अयथोच्चारितेन स्वरेणेति यावत्। 'इन्द्रशत्रुः' लक्षणयेन्द्रशत्रुरिति शब्दः यजमानं त्वष्टारम् अहिनदिति शेषः। "इन्द्रशत्रुर्वर्धस्व" इति मन्त्रे इन्द्रस्य शत्रुः शातयिता घातक इत्यस्मिन्नर्थे विवक्षिते समासस्येतिसूत्रेण सामान्यतस्तत्पुरुषसमासस्यान्तोदात्तत्वादन्तोदात्त एव कर्त्तव्ये नियतेर्नियोगात् त्वष्ट्राद्युदात्तत्वेन प्रयुक्तत्वात् 'बहुव्रीहौ पूर्वपदं प्रकृत्या' इति स्मरणात् बहुव्रीहि-र्निष्पन्नः, तेन च इन्द्रः शत्रुर्घातकः यस्य इत्यर्थस्योपजायमानत्वाद् यज्ञफलेन यो वर्धितः स वृत्र एवेन्द्रेण निहतः, न पुनरिन्द्रो वृत्रेण। एवञ्च यजमानस्यानभिमतमेव संवृत्तम्। यद्यप्यत्र वृत्रस्य पितैव यजमानो निहतश्च वृत्रः, अत एव यजमानस्य न हिंसा परं तत्पुत्रस्य। तथापि पुत्रहिंसायाः पितुरपि दुःखहेततुया, पितुर्हिंसायामेव पर्यवसानम्। शाखान्तरे वृत्रकर्तृक एवायं यागः। तस्मात् स्वर-वर्णाद्यपराधपरिहारायाध्येयं व्याकरणम्। अत्र इन्द्रशत्रुशब्दे शत्रुशब्दस्यामित्र-पर्यायत्वे बहुव्रीहि-तत्पुरुषयोरविशेषः ; अत एव यौगिकार्थस्वीकारः। अत्राभिचार-कर्मणि मन्त्रे इन्द्रशत्रुशब्द ऊहितः। ऊह्यमानस्य चामन्त्रत्वात् "यज्ञकर्मण्यजपन्यूङ्ख-सामसु" इति जपादिपर्युदासेत मन्त्राणामेकश्रुतिर्विधीयमानेह न भवति। श्लोकोऽयं पाणिनीयशिक्षायामप्युपलभ्यते, केवलं तत्र 'दुष्टः शब्दः' इत्येतस्य स्थाने "मन्त्रो हीनः" इति पाठः।

व्याकरणप्रयोजनोपवर्णनपरे वचने "यदधीतम्" इति प्रतीकमुपलभ्यते। समग्रः श्लोको यथा—

यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥

इति। 'यत्' वाक्यम् 'अधीतम्' गुरूच्चारणानूच्चारणपुरःसरं शब्दतो गृहीतम, 'अविज्ञातम्' अर्थतो नावबुद्धम्। अत एव 'निगदेन' पाठमात्रेण 'एव' 'शब्द्यते' समुच्चार्यते, न पुनरर्थतो विचार्यते, न वा यथावसरं प्रयुज्यते। 'अनग्नौ' अनलरहिते प्रदेशे 'शुष्कैधः' शुष्कं काष्ठमिव कर्हिचित् कदापि तत् न ज्वलति स्वार्थं न प्रकाशयति स्वेन भासा वक्तुः श्रोतुश्च हृदयं नोद्भासयति। नीरसया समिधा होमादिकमनुष्ठीयते, पाकादिकमभिनिर्वर्त्यते, तमस्ततिश्चापसार्यते, परं तदर्थमनलोऽप्यपेक्ष्यते। यथा नीरसमपि काष्ठं भूमौ प्रक्षिप्तमन्तरेणानलं नालं भवति प्रज्वलितुम्, तथाधीतमपि शास्त्रमर्थावबोधमन्तरेण न भवत्यलमान्तरं तिमिरं वा हन्तुं व्यवहारे पाटवं वोप-जनयितुम्। अर्थज्ञानं च सर्वथा व्याकरणाधीनमेव। प्रकृतिप्रत्ययविभागज्ञानात् पदार्थज्ञानम्, ततो वाक्यार्थज्ञानम् इति सार्वजनीनप्रतीतेः। अत एव यच्छास्त्रं महता श्रमेण कण्ठे क्रियते तस्य श्रमस्य साफल्याय शास्त्रस्य च तस्य सार्थक्याय व्याकरणमध्येयम्। पाणिनिनापि महर्षिणा "तदधीते तद्वेद" इति सूत्रे वेदनाध्ययनयोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पार्थक्यं प्रकटीकृतम् । निरुक्तेऽपि वचनमिदमुपलभ्यते, तत्र च यद्गृहीतमिति पाठः ।

यस्तु प्रयुङ्क्ते p. 11.

व्याकरणस्य प्रयोजननिर्देशपरे वचने यस्तु प्रयुङ्क्ते इति प्रतीकमुपलभ्यते । समग्रः श्लोको यथा—

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले ।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ॥

इति । अनेन व्याकरणाध्ययनस्याभ्युदयहेतुत्वमन्वयमुखेन व्यतिरेकमुखेण च प्रतिपाद्यते । 'यस्तु वाग्योगवित्' यस्तावत् वाचः प्रकृतिप्रत्ययसम्बन्धज्ञो वैयाकरणः 'विशेषे' शब्दविशेषे अर्थविशेषे च 'कुशलः' व्युत्पन्नः 'व्यवहारकाले' लौकिकवैदिकानुष्ठानवेलायाम् । तथाचोक्तं पस्पशायाम्—चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति—आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति । 'शब्दान्' विवक्षितार्थप्रतिपादनपटूनि पदानि 'यथावत्' यथाशास्त्रं प्रयुङ्क्ते विनियोजयति, 'सः' तादृशो व्युत्पन्नः पुरुषः 'परत्र' मरणादूर्ध्वं स्वर्गलोकमनुप्रपन्नः 'अनन्तं' निरवसानं 'जयं' 'प्राप्नोति' समधिगच्छति ततश्च सामर्थ्यात् अवाग्योगविदित्यध्याहार्यम् । अवाग्योगवित् प्रकृतिप्रत्ययादिसम्बन्धानभिज्ञः पुनः 'अपशब्दैः दुष्यति' इहापि शिष्टजनानां गर्हणीयो भवति, अमुत्रापि निरयनियन्त्रणामनुभवति ।

अत्र वाग्योगवित् इति पदस्य मध्यमणिन्यायेनोभयत्राप्यन्वयः सम्भवति । तथाहि यस्तावद् वागयोगवित् स व्यवहारवेलायां साधुशब्दान् प्रयुञ्जानः स्वर्गे लोके चाभ्युदयेन युज्यते, अपशब्दान् पुनरुच्चारयन् महता दोषेण लिप्यते । यः पुनर्वाचोयुक्तिपटु र्न भवति, तस्यापशब्दप्रयोगो नैव तथाविधदोषाय भवति, उदेति दोषादपि दोषलाघवमित्यभियुक्तोक्तेः । यद्वा, यो हि शब्दाञ्जानात्यपशब्दानप्यसौ जानाति, एवं तस्य शब्दज्ञानाद्धर्मः अपशब्दज्ञानाच्चाधर्म उत्पद्यते । अथवैकैकस्य शब्दस्यानेकापभ्रंशसम्भवाद् भूयानधर्मः प्राप्नोति । अनया रीत्या वाग्योगविद्दुष्यति चापशब्दैः । स तु दोषो नलिनीदल इव सलिलबिन्दु र्न चिरमवतिष्ठते, सुशब्दसमुद्भूतेन गुणेन विच्छिन्नाभ्रविलायं विलीयते । यद्वा शास्त्रवचनमेवास्माकं प्रमाणम् । शास्त्रञ्च शब्दज्ञाने धर्ममाह, नापशब्दज्ञानेऽधर्मम , अतो न काप्यनुपपत्तिः । यद्वा, अपशब्दज्ञानं साधनमेव शब्दज्ञाने । अत एवापशब्दज्ञानपूर्वके शब्दज्ञाने धर्म इति सर्वमवदातम् ।

सन्निधेश्च सामर्थ्यस्य बलीयस्त्वात् प्रथममेव व्याख्यानं समीचीनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अविद्वांसः p. 16.

व्याकरणप्रयोजनप्रतिपादपरे वचने अविद्वांस इति प्रतीकमुपलभ्यते । समग्रः श्लोको यथा—

> अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।
> कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥

इति । 'अविद्वांसः' अत्र योग्यत्वाद् व्याकरणं कर्म बोध्यम् । व्याकरणज्ञानरहिताः 'प्रत्यभिवादे' अभिवादनानन्तरप्रयोज्ये वचने 'नाम्नः' अभिवादकनाम्नः टेः 'प्लुतिं' प्लुतस्वरापादनं 'ये न' 'विदुः' जानन्ति 'तेषु' 'कामम्' निःशङ्कं 'विप्रोष्य' प्रवासात् एत्य 'स्त्रीष्विवायमहं वदेत्' यथा स्त्रीष्वभिवादनवाक्ये "अभिवादये सोमशर्माहं भोः" इत्यनुक्त्वा केवलम् "अयमहम्" इत्युच्यते तथैवाविद्वत्स्वपि प्रयोक्तव्यम् । एवं धर्मशास्त्रकाराः समामनन्ति । अभिवादनकाले सोमशर्मणा "अभिवादये सोमशर्माहं भोः" इति वक्तव्यम् , प्रत्यभिवादनवाक्ये चाचार्यप्रभृतिभिः–"आयुष्मानेधि सोमशर्म३न्" इति वाक्यस्य टेः प्लुतं विधायोच्चारणीयम् । ये तावदनधीतव्याकरणग्रन्था अविज्ञातप्लुतादिका न प्रभवन्ति यथावत् प्रत्यभिवादनवाक्यं समुच्चारयितुं तेषां सविधे समग्रस्याभिवादनवाक्यस्योच्चारणं खरसूकराणामिव मृष्टमन्नं सर्वथा निष्फलमेव स्यात् । अत एव यथा स्त्रीणामविज्ञातव्याकरणत्वात् तासां सविधे केवलम् अयमहमित्युच्यते ; तथैव व्याकरणानभिज्ञानामपि सविधे अयमहमिति वक्तव्यम् । एवञ्चानभिज्ञाः स्त्रीभिस्तुल्यमूल्या भवेयुः । कस्मै वा सहृदयायैतद्रोचेत । अत ईदृशनिकारनिवारणायावश्यमध्येयं व्याकरणम् ।

> अभिवादात् परं विप्रो ज्यायांसमभिवादयन् ।
> असौनामाहस्मीति स्वं नाम परिकीर्तयेत् ॥
> नामधेयस्य ये केचिदभिवादं न जानते ।
> तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैव च ॥
> भोःशब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने ।
> नाम्नां स्वरूपभावो हि भोभाव ऋषिभिः स्मृतः ॥
> आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने ।
> अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः ॥
> यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ।
> नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥

[म० सं० २।१२२-१२६] इति मनुवचनमत्रानुसन्धेयम् । अत्रेदमवधेयम्—पाणिनिना महर्षिणाभिवादनविषये स्त्रीपुंसयोः कोऽपि भेदो नास्थितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्य हि सूत्रं "प्रत्यभिवादेऽशूद्रे" इति। उत्तरवर्तिभिरेव वार्त्तिककारादिभिरुक्तम्, अत्यल्पमिदमुच्यते--अशूद्रइति। अशूद्रस्त्र्यसूयकेष्विति वक्तव्यमिति।

व्याकरणस्य प्रयोजनप्रतिपादनपरे वचने 'चत्वारि' इति प्रतीकं वर्तते। प्रकृतोपयोगि चत्वारिप्रतीकं मन्त्रद्वितयमृक्संहितायामुपलभ्यते। तत्राद्यं यथा—

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश॥

[ऋ० सं० ४।५८।३] इति। सूत्रमिदं सम्प्रदायभेदेन विविधं व्याख्यायते। तत्र वैयाकरणानां व्याख्यानं यथा—'अस्य' महतो देवस्य शब्दलक्षणस्य 'चत्वारि शृङ्गा' चत्वारि शृङ्गाणि नामाख्यातोपसर्गनिपातलक्षणानि। शृङ्गा। "जश्शसोः शिः" इति शिः। "शेश्छन्दसि बहुलम्" इति शेर्लोपः, प्रत्ययलक्षणमाश्रित्य "नपुंसकस्य झलचः" इति नुम्। "सर्वनामस्थाने चासम्बुद्धौ" इति उपधादीर्घः। "नलोपः प्रातिपदिकान्तस्य" इति नलोपः। 'त्रयः पादाः' त्रयः काला भूतभविष्यद्वर्तमाना अस्य पादरूपेण विलसन्ति। "प्रकृत्यान्तःपादमव्यपरे" इत्यभिनिहितसन्धेरभावः। अस्य द्वे शीर्षे शिरोद्वयम्—नित्यकार्यभेदेन शब्दात्मनो द्वैविध्यात्। 'सप्त हस्तासः' सप्त हस्ताः। सप्त विभक्तयः अस्य पाणिरूपेण विराजन्ते। हस्तास इत्यत्र "आज्जसेरसुक्" इत्यसुगागमः। 'त्रिधा' त्रिप्रकारेण 'बद्धः' नियन्त्रितः उरसि कण्ठे शिरसि च, प्रायेण वर्णानां स्थानत्रितयान्यतमसम्भूतत्वात्। 'वृषभः' कामानां वर्षिता 'रोरवीति' शब्दायते। रौतेः शब्दकर्मणो यङ्लुगन्तस्य लटि रूपम्। रु शब्दे। "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्" इति भृशार्थे यङ्। "यङोऽचि च" इति यङो लुक्। प्रत्ययलक्षणेन यङन्तत्वात् "सन्यङोः" इति द्वित्वम्। "गुणो यङ्लुकोः" इत्यभ्यासस्य गुणः। धातुत्वाल्लट्, लस्य तिप्। "शेषात्" कर्तरि इति परस्मैपदम्। "कर्तरि शप्" इति शप्। "चर्करीतं च" इत्यदादौ पाठात् "अदिप्रभृतिभ्यः शपः" इति शपो लुक्। "यङो वा" इति पाक्षिक ईट्। "सार्वधातुकार्धधातुकयोः" इत्युवर्णस्य गुणे "एचोऽयवायावः" इत्यवादेशे रूपम्। 'महो देवः' महान् देवः शब्दलक्षणः। मह पूजायाम्। "क्विप् च" इति क्विप्। "सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः" इति सोर्डादेशः। यद्वा महच्छब्दसमानार्थकमहशब्दोऽपि वेदे समुपलभ्यते, स च महधातोर्घञर्थे के निष्पद्यते—मह्यते पूज्यते मह इति, तस्य प्रथमैकवचने रूपम्। 'मर्त्यान्' मरणधर्मणो मनुष्यान् 'आ विवेश' मर्त्येष्वाविष्टः। मर्त्यान् इत्यस्य नकारस्य संहितायां "दीर्घादटि समानपादे" इति रुत्वम्। "अत्रानुनासिकः" इत्यनुवृत्तौ "आतोऽटि नित्यम्" इत्याकारः सानुनासिकः। "भोभगोअघोअपूर्वस्य योऽशि" इति रोर्यकारः। तस्य च "लोपः शाकल्यस्य" इति लोपः। लोपस्यासिद्धत्वान्न पुनः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्धिकार्यम् । व्याकरणाध्ययनेन महता देवेन नः सायुज्यं स्यात्, अतस्तदर्थमध्येयं व्याकरणम् ।•

भाष्ये "महता देवेन नः साम्यं यथा स्यात्" इति पाठ उपलभ्यते स च न सम्यग् लगति, महान् देवो वैयाकरणेषु प्रविष्टो भवति अत एव वैयाकरणैर्महता देवेन सायुज्यं काम्यते । अत एव साम्यम् इत्यत्र सात्म्यमिति पठनीयमिति प्रतिभाति ।

व्याकरणप्रयोजनप्रतिपादनपरे वचने चत्वारि इति प्रतीकमुपलभ्यते । प्रकृतोपयोगि च चत्वारिप्रतीकं मन्त्रद्वयमृक् संहितायां सन्दृश्यते । तत्र द्वितीयो मन्त्रो यथा—

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥

[ऋ० सं० १।१६४।४५] इति । ऋग्वेदस्य प्रथममण्डलगतो मन्त्रोऽयं बहुभिर्बहुधा व्याख्यायते । तत्रादौ वैयाकरणरीत्या तात्पर्यं प्रदर्श्यते । 'वाक्' शब्दराशिः 'चत्वारि पदानि परिमिता' नामाख्यातोपसर्गनिपातलक्षणैश्चतुर्भिः पदजातैर्विभक्ता वर्तते । ये मनीषिणः मेधाविनः । मनस ईषिण इति पृषोदरादित्वात् साधुत्वम् । 'ब्राह्मणाः' वेदविदः ते 'तानि' चत्वारि पदजातानि 'विदुः' जानन्ति । विद ज्ञाने । "विदो लटो वा" इति झेः पाक्षिक उसादेशः । 'त्रीणि' तेषामेकैकशस्त्रयो भागा 'गुहा' गुहायाम् । "सुपां सुलुक्०" इति सप्तम्येकवचनविभक्तेर्लुक् । 'निहिता' निहितानि । "शेश्छन्दसि बहुलम्" इति शेर्लोपे प्रत्ययलक्षणेन दीर्घत्वे नकारलोपः । अतिमात्रं निगूढानि 'न इङ्गयन्ति' न निमिषन्ति आत्मानं न प्रकटयन्ति । 'मनुष्याः' प्राकृता मानवाः 'वाचः' 'तुरीयं चतुर्थं 'भागं' 'वदन्ति' । चतुर्णां पदजातानामेकैकस्य चतुर्थभागं मनुष्या अवैयाकरणा वदन्ति । यथान्यदपि भागत्रितयमस्माभिर्बुध्येत च प्रयुज्येत च तथाध्येयं व्याकरणम् । परापश्यन्तीमध्यमावैखरीरूपभागचतुष्टयात्मिकाया वाचः तुरीयं चतुर्थं भागं वैखरीरूपं मनुष्या वदन्ति इति केचित् । सरीसृपाणां स्फुरितं विहगानां कूजितं पशूनां रटितं मनुजानां च व्यक्ता वाक्, एवंरीत्या भागचतुष्टयात्मिका वाक्, तत्र चतुर्थं भागं व्यक्तवाग् लक्षणं मनुष्या वदन्ति । स च चतुर्थो भागो यथा शुद्धतया स्वरसंस्कारानुगततयोच्येत तथाध्येयं व्याकरणम् ।

अत्र सायणभाष्यम् । वाक् वाचः कृतस्नायाः पदानि चत्वारि परिमिता परिमितानि । लोके या वागस्ति सा चतुर्धा विभक्तेत्यर्थः । तानि पदानि ब्राह्मणा वेदविदः मनीषिणः मनस ईषिणः मेधाविनः विदुः जानन्ति । तेषां मध्ये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रीणि गुहायां निहिता निहितानि स्थापितानि न इङ्गयन्ति न रोचन्ते न प्रकाशन्त इत्यर्थः। वाचः तुरीयं पदं मनुष्या अज्ञाः तज्ज्ञाश्च वदन्ति व्यक्तमुच्चारयन्ति व्यवहरन्ति। कानि तानि चत्वारीत्यत्र बहवः स्वस्वमतानुरोधेन बहुधा वर्णयन्ति। सर्ववैदिकवाग्जालस्य संग्रहरूपा भूरादयस्तिस्रो व्याहृतयः प्रणव एक इति। वेदत्रय-सारत्वात् व्याहृतीनाम्, तासामेव सारसंग्रहभूतत्वात् अकाराद्यात्मकस्य प्रणवस्येति सप्रणवासु व्याहृतिषु सर्वा वाक् परिमितेति केचन ब्रह्मवादिनो वदन्ति। अपरे व्याकरणमतानुसारिणो नामाख्यातोपसर्गनिपातभेदेन। क्रियाप्रधानमा-ख्यातम्। द्रव्यप्रधानं नाम। प्रागुपसृज्यत आख्यातपदस्येत्युपसर्गः प्रादिः। उच्चावचेष्वर्थेषु निपतनान्निपातः अपि तु च इत्यादिः। एतेष्वेव सर्वा वाक् परिमितेत्यखण्डायाः कृत्स्नाया वाचश्चतुर्धा व्याकृतत्वात्। "वाग् वै पराच्य-व्याकृतावदत्। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। तस्मादियं व्याकृता वागुद्यते" [तै० स० ६।४।७।३] इति श्रुतेः। अन्ये तु याज्ञिकाः—मन्त्राः कल्पो ब्राह्मणं चतुर्थी लौकिकीति। याज्ञिकैः समाख्यातोऽनुष्ठेयार्थप्रकाशको वेदभागो मन्त्राः, मन्त्रविधानप्रतिपादको वेदभागः "इति मन्त्राः कल्पोऽत उर्ध्वम्" [तै० आ० १।३१।२] इत्यादिनोक्तः कल्पः। मन्त्रतात्पर्यप्रकाशको वेदभागो ब्राह्मणम्। भाषाविषया गामानय इत्यादिरूपा व्यावहारिकी। एष्वेव सर्वा वाग् नियमितेति याज्ञिकाः। ऋग्यजुःसामानि चतुर्थी व्यावहारिकीति नैरुक्ताः। सर्पाणां वाग्, वयसाम्, क्षुद्रसरीसृपस्य च चतुर्थी व्यावहारिकीत्यैतिहासिकाः। पशुषु, तूणवेषु, मृगेषु, आत्मनि चेत्यात्मवादिनः। अपरे मान्त्रिकाः प्रकारान्तरेण प्रतिपादयन्ति। परा पश्यन्ती मध्यमा वैखरीति। एकैव नादात्मिका वाक् मूलाधारादुदिता सती परेत्युच्यते। नादस्य च सूक्ष्मत्वेन दुर्निरूपत्वात् सैव हृदयगामिनी पश्यन्तीत्युच्यते योगिभिर्द्रष्टुं शक्यत्वात्। सैव बुद्धिं गता विवक्षां प्राप्ता मध्यमेत्युच्यते, मध्ये हृदयाख्ये उदीयमानत्वान्मध्यमायाः। अथ यदा सैव वक्त्रे स्थिता ताल्वोष्ठादिव्यापारेण बहिर्निर्गच्छति तदा वैखरीत्युच्यते। एवं चत्वारि वाचः पदानि परिमितानि। मनीषिणः मनसः स्वामिनः स्वाधीनमनस्का ब्राह्मणा रवाख्यस्य शब्दब्रह्मणोऽधिगन्तारो योगिनः परादि-चत्वारि पदानि विदुः जानन्ति। तेषु त्रीणि परादीनि गुहा निहितानि, हृदयान्त-र्वर्तित्वात्। तुरीयं तु पदं वैखरीसंज्ञकं मनुष्याः सर्वे वदन्ति। व्याकरण-प्रसिद्धनामाख्यातादिपक्षे मनीषिणः ब्राह्मणाः प्रकृतिप्रत्ययादिविभागज्ञाः वाग्यो-गविदस्तानि पदानि जानन्ति। अवाग्योगविदः पामरा वाचो वाङ्मयस्य तुरीयं चतुर्थं भागं व्यवहरन्ति अर्थप्रकाशनाय प्रयुञ्जते। अयं मन्त्रो निरुक्ते व्याख्यातः सोऽत्राप्यनुसन्धेयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दानुशासनस्य प्रयोजनप्रतिपादनपरे वचने उत त्वः इति प्रतीकमुपलभ्यते। स च मन्त्रो यथा--

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥

[ऋ० सं १०।७१।४] इति। 'उत' इत्यपिशब्दसमानार्थकः। 'त्वः' एक इत्यर्थः। बहूनामपि समानपृष्ठोदरपाणिपादानां समानमेवाध्ययनमधीयानानाम् एकः कश्चित् 'पश्यन्' अपि 'वाचम्' मनसा स्वभ्यस्ताध्ययनोऽपि 'न ददर्श' न पश्यत्येव, अर्थानभिज्ञत्वात्। स हि तां सम्यक् पश्यति यस्तस्या अर्थं विजानाति। अर्थ-परिज्ञानफला हि वाक् इत्यभिप्रायः। एवमेकः 'शृण्वन्' अपि 'न शणोति' 'एनाम्' वाचम्। य एव हि अर्थमवबुध्यते वाचः, तेनैव हि सा सम्यक् श्रुता भवति, नेतरेण। इतरो ह्यविद्वान् ध्वनिमात्रमेवोच्चारयति यन्न शृणोति वाचम्। साम्प्रतमुत्तरेणार्धेनार्थज्ञं प्रशंसन्नाह—'उतो त्वस्मै' अप्येकस्मै कस्मैचिदर्थज्ञाय। 'तन्वं' 'शरीरं' 'विसस्रे' विस्रंसयति विवृणोतीत्यर्थः। अर्थो वाचः शरीरं तं विवृणोतीत्यर्थः। आत्मानं दर्शयत्येकस्मै कस्मैचिदर्थज्ञाय। कथं विवृणोत्यात्मानमित्याह --जायेव पत्य उशती सुवासाः। यथा हि जाया विवृतसर्वाङ्गावयवा भूत्वा 'उशती' कामयमाना 'पत्ये' इष्टाय भर्त्रे प्रेमणा दर्शयेदात्मानम्। यथा स पुरुषस्तामेनां यथावत् पश्यति स्त्रियं निर्णिक्तवाससम्, नेतरां यो घनपटप्रावृतसर्वगात्रा, एवं स एवैनां वाचं यथावच्छृणोति यः पदशोऽवच्छिद्यैतां विगृह्य वार्थं पश्यति समस्तव्यस्तम्। इति दुर्गाचार्यव्याख्या। तथाच श्रुत्यन्तरम्—

यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति।
यदीं शृणोत्यलकं शृणोति न हि प्रवेद सुकृतस्य पन्थाम् ॥

[ऋ० स० १०।७१।६] इवि। महाभारतेऽप्युक्तम् [१२।३०५।१३-१४]

यो हि वेदे च शास्त्रे च ग्रन्थधारणतत्परः।
न च ग्रन्थार्थतत्त्वज्ञस्तस्य तद्धारणं वृथा॥
भारं स वहते तस्य ग्रन्थस्यार्थं न वेत्ति यः।
यस्तु ग्रन्थार्थतत्त्वज्ञो नास्य ग्रन्थागमो वृथा ॥ इति

सक्तुमिव—p. 24.

शब्दानुशासनस्य प्रयोजनप्रतिपादनपरे वार्त्तिके सक्तुमिवेति प्रतीकमुपलभ्यते। समग्रमन्त्रो यथा—

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥

[ऋ० सं० १०।७१।२] इति। सारस्वतसूक्तं बृहस्पतेरार्षम्। तदगतोऽयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्रः। यत्र यस्मिन् दुर्गमे व्याकरणमार्गे सक्तुम् इव भृष्टयवादिचूर्णमिव। सचेस्तुन्नन्तस्य सक्तुरिति रूपे दुःशोधत्वमर्थः ; कसतेस्तुनि वर्णव्यत्ययेन सक्तुरिति पक्षे विकसितस्तुषमिश्र इत्यर्थः। तितउना परिपवनेन । तनोतेर्डउः सन्वच्च इति पक्षे विस्तारयुक्तेनेत्यर्थः, ततेन चर्मणा नद्धमिति यावत्। तुदधातोः कर्मणि डउः सन्वच्च इति पक्षे बहुच्छिद्रमित्यर्थः। पुनन्तः परिष्कुर्वन्तः धीराः धीमन्तः मनसा वाचम् अक्रत अकृषत। कृञो लुङ्। आत्मनेपदम्। झस्यादादेशः। च्लि लुङि। "मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः" इति च्लेर्लुक्। यणादेशः। अडागम उदात्तः। यथा सक्तुं कश्चित् परिपवनेन पुनाति एवं प्रकृतितः प्रत्ययतश्च शब्दान् अपुनन्। 'अत्रा' अत्र। "ऋचितुनुघमक्षुतङ्-कुत्रोरुष्याणाम्" इति दीर्घः। दुर्गमे 'मार्गे सखायः' समानख्यानाः समानख्याना-नामेव समानेषु शास्त्रेषु कृतश्रमाणाम्, वैयाकरणानां वैयाकरणा एव नैरुक्तानां नैरुक्ता एव। 'सख्यानि' सखिभावान्। विज्ञानानि। "सख्युर्यः" इति यः। इतरेतरस्य यो विज्ञानप्रकर्षः, तं जानन्ति 'एषां' वैयाकरणानां 'वाचि अधि'। अधिः सप्तम्यर्थानुवादकः। 'भद्रा' कल्याणी 'लक्ष्मीः' 'निहिता' स्थापिता। वाक् तावत् सदोषापि भवति निर्दोषापि भवति। यत्र तावद् विद्वांसः मनसा परिचिन्त्य विशुद्धा एव वाचो व्याहरन्ति तत् स्थानं लक्ष्म्या लीलालयो भवति, विशुद्धायां वाचि लक्ष्मीर्निहितेति। अत एव लक्ष्मीलाभोऽपि व्याकरणाध्ययनस्यान्यतमं प्रयोजनम्।

सुदेवो असि वरुण—p. 28.

शब्दानुशासनस्य प्रयोजनोपवर्णनपरे वचने "सुदेवो असि" इति प्रतीकमुपलभ्यते। समग्रो मन्त्रो यथा—

> सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।
> अनु क्षरन्ति काकुदं सूर्म्यं सुषिरामिव ।।

[ऋ० सं० ८।६९।१२] इति। भाष्यकारोक्तदिशास्य व्याख्यानम्—हे वरुण, त्वं सुदेवः सत्यदेवः असि भवसि, यस्य ते सप्त सिन्धवः नद्य इव सप्त विभक्तयः काकुदं तालु अनुक्षरन्ति सुषिरां शोभनच्छिद्रां सूर्म्यम् सूर्मिम् अयःप्रतिमाम्। "अमि पूर्वः" इत्यत्र "वा छन्दसि" इत्यनुवृत्त्या यणादेशः। यतो हेतोर्व्याकरण-ज्ञानाद्वरुण सत्यदेवोऽसि, ततो हेतोरन्येऽपि सत्यदेवा भवन्तु इति कैयटः। तदर्थं व्याकरणमध्येयम्। निरुक्तटीकायां दुर्गाचार्येण मन्त्रोऽयमित्थं व्याख्यातः—प्रियमेधस आर्षम्। अनुष्टुप्। हे वरुण, सुदेवः असि शोभनस्त्वमसि देवः यस्य ते सप्त सिन्धवः अन्तरिक्षनद्यो वा बहुलाह्वेत्येवमाद्याः। सप्त समुद्रा एव वा सप्तसिन्धुशब्देनोच्येरन्। काकुदं तालु अनुक्षरन्ति सूर्म्यं सुषिराम नगरोदकनिःसरणभूमिमिव सर्वतः समन्तात्तत्यभिप्रायः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं तरुणेन्दुशेखरः शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ शरणं नान्यदुपैमि दैवतम् ।।

मञ्जूषा

सम्पादकः—श्रीक्षितीशचन्द्र-चट्टोपाध्यायः

षष्ठ-वर्षम्

आश्विन १८७३—भाद्र १८७४
September 1951—August 1952

श्रीविश्वनाथ-चट्टोपाध्यायः
७१, श्यामबाजार स्ट्रीट्, कलिकाता-४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बगलकोटपत्तनतः प्रकाशिता "मधुरवाणी"—स्वागतं मञ्जूषायै।

कल्कत्तानगरतः शब्दाब्धिलब्धवैदग्ध्यस्य कविताबनितास्वयंवरवृतवरस्य पण्डितप्रवरस्य श्रीक्षितीशचन्द्रचट्टोपाध्यायस्य सम्पादकत्वे प्रतिमासं नियतमाविष्क्रियमाणा मञ्जूषानामिका पत्रिका शिञ्जानमञ्जरीमञ्जुलपदैः गीतगुञ्जारवैश्च रञ्जयति रसिकपुञ्जम्। क्वचित् महाभाष्य-शब्देन्दुशेखरादिगत-सूक्ष्मतमविषयसमीक्षणसंरम्भेण महामहापण्डितपुण्डरीकाणामपि शिरःकण्डूतिम् उपजनयति। कदाचित् कुशलग्रामवृद्ध इव सरसकथाकथनेन कौतुकमुत्पादयति। कुत्रचिच्च प्राचीन-सरस-सुन्दर-सुभाषितानाम् आंग्लानुवादान् प्रकटीकृत्य उपकरोति छात्रवृन्दम्। क्वचिदपि च वेदवेदान्तमन्त्रतन्त्रादीनां भावार्थादिकं जिज्ञासते। मध्ये मध्ये तनुतरविनोदिकथाभिः हास्यलहरीरपि उद्भावयति। तत्र तत्र च शब्दशक्तिप्रकाशेन शब्दशुद्धिविचारैः पुरातनसाहित्यप्रकटीकरणेन च भिन्नभिन्नरुचिमपि वाचककुलं सम्यगाराधयति। प्रायः सर्वत्र सरलतमा सुबोधा च अत्रत्या भाषा विदुषामिव विद्यार्थिनामपि सविशेषं परितोषं जनयति। 'पण्डिता च पतिव्रता' इति ख्यातायाः क्षमादेवीरावमहोदयायाः "परित्यक्ता" इति विचित्रा चैत्राङ्कगता चारुतमकथा चमत्कुरुते सचेतसां चेतांसि हृदयङ्गमया निरूपणभङ्ग्या। तस्मिन्नेव मञ्जूषायाः चैत्राङ्के 'शिवसूत्रस् एण्ड संस्कृत आल्फाबेट्' इति विचारप्रचुरः सम्पादकानाम् आंग्लभाषायां लिखितः विवेचनात्मकः लेखः सर्वेषामपि विपश्चिदपश्चिमानां प्रशंसापात्रं भवतीति निश्चप्रचम्। वयं तु सादरं संसूचयामः "यावच्छक्यं संस्कृतभाषायामेव लेखा लेखनीयाः" येन शुद्धसंस्कृतविदुषामपि उपयोगो भवेत्।

शिञ्जन्मञ्जीरमञ्जूक्तिगुञ्जितै रसिकरञ्जिनी।
क्षितीशकृतिमञ्जूषा केषामेषा न तोषदा॥
सुवर्णकांक्षिभिः सर्वैरर्थलुब्धैर्मनीषिभिः।
अलङ्कारप्रियैरेषा मञ्जूषा गृह्यतां रसात्॥
उत्कृष्टलेखरत्नानां मञ्जूषैषा विशोभते।
सर्वथा समुपादेया सर्वैः सहृदयैरपि॥

Printed and published by Sri Jyotish Chandra Chatterjee, B. A. from 81, Shyambazar Street, Calcutta—4. Printed at the Elm Press 63, Beadon Street, Calcutta—6

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111053
श्री...

मञ्जूषायाः षष्ठवर्षस्य संक्षिप्तं सूचीपत्रम्

आभाणकसुभाषितादि

आभाणकादि ३५, ९७

आभाणकमालिका ६७

सुभाषितानि ९६, ११४

कथा

विचित्रो विवेकः ४४, ११५

स्वाप्निकव्यामोहः ८४

कथिका

नरपतिपारिषद-संवादः १४७

प्रकृष्टमुत्तरम् ४१

विधवाया धवः ४२

समीचीनं प्रशंसापत्रम् ४२

स्वैर्दोषैर्भवति शङ्कितो मनुष्यः १२८

कविता

उत्तिष्ठत जाग्रत ३१

गीतासारः ३४

द्वितीयो भ्राजाख्यः श्लोकः ३९

नामैकदेशग्रहणेन नामग्रहणम् ११५

निर्वचनम्

अश्वतरशब्दस्य १२२

पुत्रशब्दस्य ४३

Cinema-शब्दस्य १२८

पताकास्थानम् ८२

प्रत्याख्येयानि वार्त्तिकानि २८, ५२

भाणः

श्रीमर्कटमार्दलिकः १७

महाभाष्यम् ३३-१३६

रसमञ्जरी ५७

राष्ट्रभाषीयः १४८

विमर्शः

उपनिषदर्थविमर्शः ६८

कालिदास-भवभूती ५३, ७३, १४२

पाठविमर्शः १४१

भारविः सारविद्यः ४९, १०६

महाभाष्यपाठविमर्शः ४०

वेदार्थ-विमर्शः ७२, ९०

व्याकरण-विमर्शः १५, ४८

सायणभाष्यपाठविमर्शः ३६

वैदिकं सूक्तम्

आनोभद्रीयम् (पञ्चम्यां संख्यायाम्)

मधुसूक्तव्याख्यानम् ९८

वैयाकरणानां सरणिः १३९

व्याकरणस्य बीजम् १११

समालोचनम् ५९, १४१

स्तोत्रादिकम्

महावाक्यसिद्धान्तस्तोत्रम् ६५

श्रीनीललोहित-पादादिकेशान्त-स्तोत्रम् १

श्रीव्योमकेश-केशादिपादान्त-स्तोत्रम् ८

श्रीरामलक्ष्मणाष्टकम् ३४

Study of Sanskrit Literature १२९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

111053

Dr. Suniti Kumar Chatterji, M.A., D.LITT. (London)
Professor, Calcutta University, writes :

The *Manjusha* is run by Dr. Kshitish Chandra Chatterjee of the University of Calcutta, who is one of our most erudite authorities on the technical and other niceties of Sanskrit grammar. He is a student of languages and, in addition, he handles Sanskrit with ease. It has been his love of Sanskrit that has made him carry on the work of editing and bringing out this paper since its inception by himself. Financially it has been a thankless task. It has brought other disadvantages also—the editing and financing of a journal without much wide appeal because of its language has been a source of worry which has had its repercussions on his health. But he has not given in, because he is an incorrigible optimist when he is convinced his cause is noble. Prof. Chatterjee is quite an institution in himself. Then, he has been able to enlist a number of disinterested colleagues who help him with contributions and who are enthusiasts for Sanskrit like himself. And he himself writes. It is a remarkable thing that although he finds joy in unravelling the intricacies of Sanskrit grammar, he is not in his mental make-up a dry-as-dust grammarian. He has a wonderful sense of humour supported by an inexhaustible fund of anecdotes and stories which he brings out in racy Sanskrit. So the pages of the *Manjusha* at times sparkle with laughter. Comparative linguistic he brings in frequently in his articles, and this is a remarkable "special feature" of this little paper. Further, it does not confine itself to Sanskrit alone. Proverbs, *Bon-mots*, wise sayings, *Mahavakyas*, etc. from different languages, English, French, German, Latin, etc., are rendered appropriately into Sanskrit, demonstrating the capacity of the language of the Gods to keep pace with turns of expression peculiar to various languages. One can say also that there is an "English Section" to this magazine, devoted as it is entirely to the culture of Sanskrit. Thus, the editor himself is bringing out through this magazine, in instalments, his English translation and commentary on the *Mahabhashya* of Patañjali which, when completed, will be a valuable contribution to the study of Sanskrit grammar through English.

A journal like this deserves a much wider appreciation which is its due. I think our high school students reading Sanskrit will find much of interest, pleasure and profit in it.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

TECHNICAL TERMS AND TECHNIQUE OF

Sanskrit Grammar

A Critical, Comparative and Historical Study

BY

Kshitish Chandra Chatterji, Sastri, M.A., D. Litt.

Lecturer, Calcutta University;
Formerly Editor, Calcutta Oriental Journal;
Surabharati, Oriental Literary Digest, etc., etc.

The Modern Review (December, 1950) **says :**

"Honour to whom honour is due. Dr. Chatterji has broken entirely new ground in his **Technical Terms and Technique of Sanskrit Grammar** and demonstrated clearly that Bengal, though fallen on evil days, can even now produce works on Indology that invite and bear comparison with the best work produced in any part of the world. Who ever thought that all the technical terms admitted of satisfactory explanation and who ever imagined that a work on grammatical terminology could be made as delightful as a novel? In this volume of nearly 350 pages the technical terms of Sanskrit grammar from the Brahmanas, Nirukta, Pratishakhyas, Panini, Katyayana, Patanjali, down to Prayogaratnamala and Harinamamrita have been considered critically and historically in all their bearings and apparently arbitrary technical terms like *gha*, *bha*, *lat*, *lit*, etc., have been traced to their sources. **We have nothing but admiration for this masterpiece of scholarship and warmly recommend it to our readers."**

Price Rupees Ten only. *Foreign Rs. 12/-*
Postage Extra.

VISVANATH CHATTERJI

81, Shyambazar Street,

CALCUTTA—4

Phone : B. B. 4049

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANJUSHA (Sanskrit Monthly Magazine)
Registered No. C. 3278

The Divine Songs of Zarathustra.

A philological study of the Gathas of Zarathushtra containing literal and free English translations, full grammatical and explanatory notes, exhaustive parallel forms and expressions from Sanskrit etc.

BY

Irach J. S. Taraporevala, B. A., Ph. D.,
Barrister-at-Law.

Price Rs. 20/-.

D. B. Taraporevala Sons & Co, Ltd.
210 Hornby Road, Bombay.

CANDRA VYAKARANA

Part I (Chapters 1—3).

Critically edited with Vṛtti, corresponding rules of Pāṇini, Bhoja and others, Introduction etc.

BY

KSHITISH CHANDRA CHATTERJI, SASTRI, M. A., D. LITT.

Lecturer, Calcutta University ;
Formerly Editor, Calcutta Oriental Journal,
Surabharati, Oriental Literary Digest, etc., etc.

Price Rupees Ten only. *Foreign Rs. 12/-*

VISVANATH CHATTERJI

81, Shyambazar Street, Calcutta—4

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri